तं वन्दे शिवरूपिणं निजगुरुं सर्वार्थसिद्धिप्रदम् ।।३।।

काशी द्वारवती प्रयागमथुराऽयोध्यागयाऽवन्तिका
माया पुष्कर कञ्चिकोत्कलगिरिः श्रीशैलविन्ध्यादयः ।।
नैते तारयितुं भवन्ति कुशला यस्य प्रसादं विना
तं वन्दे शिवरूपिणं निजगुरुं सर्वार्थसिद्धिप्रदम् ।।४।।

रेवा सिन्धु सरस्वती त्रिपथगा सूर्यात्मजा कौशिकी
गङ्गासागरसंगमाद्रितनयाऽलौहित्यशोणादयाः ।।
नैते तारयितुं भवन्ति कुशला यस्य प्रसादं बिना
वन्दे तं शिवरूपिणं निजगुरुं सर्वार्थसिद्धिप्रदम् ।।५।।

सत्कीर्तिविमलं यशः सुकविता पाण्डित्यमारोग्यता
वादे वाक्पटुता कुले चतुरता गाम्भीर्यमक्षोभ्यता ।।
प्रागल्भ्ये प्रभुता गुणैर्निपुणता यस्य प्रसादं विना
तं वन्दे शिवरुपिणं निजगुरुं सर्वार्थसिद्धिप्रदम् ।।६।।

लोकेशो हरिरम्बिका स्मरहरो मातापिताऽभ्यागता
आचार्याः कुलपूजितो यतिवरो वृद्धास्तथा भिक्षुकाः
नैते तारयितुं भवन्ति कुशला यस्य प्रसादं विना
तं वन्दे शिवरूपिणं निजगुरुं सर्वार्थसिद्धिप्रदम् ।।७।।
ध्यानं दैवतपूजनं गुरुतपो ज्ञानाग्निहोत्रादयः
पाठो होमनिषेवणं पितृमखो ह्यभ्यागतार्चाविलिः ।।
एते व्यर्थफला भवन्ति नियतं यस्य प्रसादं विना
तं वन्दे शिवरूपिणं निजगुरुं सर्वार्थसिद्धिप्रदम् ।।८।।

पूर्वाशाभिमुखः कृताञ्जलिपुटः श्लोकाष्टकं यः पठेत्
पौरश्चर्यविधिं विनापि लभते मन्त्रस्य सिद्धिं पराम् ।।
नो विघ्नैः परिभूयते प्रतिदिनं प्राप्नोति पूजाफलम्
देहान्ते परमे पदे निवसते यद्योगिनां दुर्लभम् ।।९।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति श्रीवामकेश्वरतन्त्रे पार्वतीश्वरसंवादे श्री गुरुस्तवराजः सम्पूर्णम् ।। शुभम् ।। श्रीरस्तु ।।

1227/307 (2) **GURUSTUTI & RĀMARṢI**

गुरुस्तुति एवं रामऋषि

Author :—Vidhanadāsa

Foll. 1 to 5; 9×8.2 cms.; paper; lines per page 8; letters per line 19; Devanāgarī script; Hindi; 1935 V. S. (1878 A.D.); bound; in the end :—

दास विधना कहैं विघन कुण बापडा ।
काल जम जोध पच हार बैठा ।।१३।। सम्पूर्ण ।।

हाड बड़ो हरभजन कर, करम बडो कुछ देह ।
अकल बडि (डी) उपगार कर, नरतन को फल एह ।।

पोथी प्यारी प्रेम सुं, हर हिवडेंरो हार ।
कोट जतन कर राषजो, इण पोथी सेती प्यार ।।
इति श्रीरामरिषि संपूर्ण ॐ नमः सिद्धं ।।

1038/117 **GURVAṢṬAKAM**

गुर्वष्टकम्

Foll. 4; 15.2×10 cms.; paper; lines per page 5; letters per line 11; Devanāgarī script; Sanskrit; 20th c.;

1065/144 **GURVAṢṬAKAM**

गुर्वष्टकम्

Author :—Miśra Manasārāma

Foll. 5; 15×9.5 cms.; paper; lines per page 5; letters per line 11; Devanāgarī script; Sanskrit; 19th c.

Begins:— ।। श्रीगणेशाय नमः ।। श्रीगुरुचरणारविन्दाभ्यां नमः ।।

यस्याङ्घ्रिभक्तिर्विधुनोति कल्मषं,
तदाश्रितानां पुरुजन्मजं नृणाम् ।।
यथोदितो लोकतमोऽखिलं रवि–
र्नमामि तं श्री गुरुदेवमीश्वरम् ।।१।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यच्चिन्त्यतेऽन्तर्गतमेव योगिभि-
र्यद्ध्यायते ध्यानसमाधितत्परैः ।।
तदञ्जसा यो विदधाति सेवके
नमामि तं श्री गुरुदेवमीश्वरम् ।।२।।

शास्त्राणि सर्वाणि वदन्ति साधनं
तीर्थं तपो दानमहोव्रतादिकम् ।।
ददाति यः सर्वमुपाश्रितः फलम्
नमामि तं श्रीगुरुदेवमीश्वरम् ।।३।।

कुर्वन्तु कर्माणि पठन्तु चागमान्
युञ्जन्तु योगांश्च भवन्तु भावुकाः ।।
सिद्ध्यन्ति नो यस्य कृपां विना जनाः
नमामि तं श्रीगुरुदेवमीश्वरम् ।।४।।

वदन्तु सर्वे सुविचार्य पण्डिताः
श्रीराधिकाकृष्णपदाम्बुजाश्रयम् ।।
करोति को जीव महो परस्ततो
नमामि तं श्रीगुरुदेवमीश्वरम् ।।५।।

वदामि नोक्तं न वदामि वै श्रुतं
दृष्टं वदाम्येव वदामि दर्शितम् ।।
शश्वच्छुखं येन जनाय दीयते
नमामि तं श्रीगुरुदेवमीश्वरम् ।।६।।

अत्यद्भुतं यस्य पराक्रमं महद्
गृहीतबाहुः कृपया कृतोऽस्म्यहम् ।।
कामादिलिप्तोऽपि सुनिर्मलीकृतो
नमामि तं श्रीगुरुदेवमीश्वरम् ।।७।।

नमामि नित्यं प्रणमाम्यहर्निशं
मनोवचोभ्यां शिरसा कृताञ्जलिः ।।
दयानिधिं दीनजनानुकम्पिनं
नमामि तं श्रीगुरुदेवमीश्वरम् ।।८।।

अतो मया सर्वहितैषिणोच्यते
मुहुर्मुहुः स्वस्य गुरौ विधीयताम् ।।
भक्तिर्भवाब्धिं खलु तर्तुमिच्छतां
दृढा-दृढा नौरियमेव लक्षिता ।।९।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रोगुरुलालश(स)खीपदाब्जयुगलध्यानानुरक्ते मयि
तत्कृपया कृतमष्टकं च मनसारामेण शिष्येण सत् ।।
तन्नितरां पठतां तनोति तनुवाक्चित्तेषु भक्ति परां
श्रीगुरुदेवदयानिधेश्च सततं सर्वत्र सिद्धि नृणाम् ।।१०।।

इति श्रीगुरुकृपया मिश्रमनसारामेण विरचितं श्रीगुर्वष्टकं सम्पूर्णम् ।। शुभं भवतु ।। श्रीरस्तु ।। श्रीराधिकावराय ।।

1204/283

GOPĀLALĪLĀSTAVAḤ
गोपाललीलास्तवः

Author :—Nārāyaṇa Parvaṇikaraḥ

Foll. 6; 20.5 × 11 cms.; paper; lines per page 6; letters per line 16; Devanāgarī script; Sanskrit; 1955 V. S. (1898 A.D), Bhādrakṛṣṇā 6, Ravivāra (Sunday); scribe Māṅgilāla Khaṇḍelavāla, Brāhmaṇa of Jayanagara; placed in an envelop on which the following verse is written (perhaps in the hand-writing of the poet who presented it to Mahārāja Sawāī Mādho Singh II) :—

।।श्रीः।। षट्पत्रपदवानेषःस्तवपुस्तकषट्पदः
श्रीमतां करपाथोजरसिकोऽस्तु निरन्तरम् ।।

Begins :— ।। श्रीगणेशाय नमः ।। श्रीकृष्णाय नमः ।। श्रीगुरुभ्यो नमः ।।
वंशीनादविमोहिताभिरभितः प्राप्ताभिराभीरक-
स्त्रीभिर्भीरहिताभिरादरभरप्रारब्धरासोत्सवम् ।
देवैः स्त्रीपुरुगैस्तदीक्षणालसद्धर्षैर्विमानस्थितै-
र्वृष्टिं कल्पमहीरुहस्य कुसुमैर्ध्यायामि कृष्णं हृदि ।।१।।

एवं ध्यायन् पठेत्स्तवम् : --
गोमूर्त्या धरयार्थितः ससुरया भाराथ हाराय यो
देवक्यां वसुदेवतोऽधिमथुरं प्रोद्भूय सद्यो व्रजे ।
नन्दागारमुपेत्य तत्कृतमलं जन्मोत्सवं लब्धवान्
श्रीगोपालमहं नमामि तमहंकारादिकारापहम् ।।२।।

पीतं दातुमुपागतां कपटतो यः पूतनां चासुरं
वात्यारूपधरं निहत्य शकटं हैयंगवीनं हरन् ।
बालोऽश्नन् मृदमुद्दधार कृपया वृक्षौ कुबेरात्मजौ
श्रीगोपालमहं नमामि तमहङ्कारादिकारापहम् ।।३।।

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जग्धुं धेनुगणं समुद्यतमतीन् वत्सं बकं धेनुकं
हत्वाऽघञ्च सुरैः स्तुतोऽथ सुरभीर्वृन्दावने चारयन् ।
कालिन्द्या निरकासयत् वरगरं यः कालियं सान्वयं
श्रीगोपालमहं नमामि तमहंकारादिकारापहम् ।।४।।

नश्यद्वीक्ष्य दवेन गोधनममुं सद्यः पिबन्, बल्लव–
स्त्रीचीराणि हरन् वरऋतुकरस्त्रीदत्तभिक्षामदन् ।
इन्द्रं वर्षणवग्रहेण वरुणं यो नन्दमुक्त्याऽजयत्
श्रीगोपालमहं नमामि तमहङ्कारादिकारापहम् ।।५।।

वल्लीसौरभिणीर्विलोक्य रजनीर्वेणुस्वनैर्बल्लव–
स्त्रीराकृष्य तदीप्सितानि विदधत्तासां मदं संहरन् ।
यस्तद्गीतवशीकृतः सुरनुतो रासं वितेने चिरं
श्रीगोपालमहं नमामि तमहङ्कारादिकारापहम् ।।६।।

लब्ध्वा छिद्रमुपद्रवं विदधतं यः शङ्खचूडं तथा
गोष्ठारिष्टमरिष्टमश्ववपुषं हत्वाऽसुरं केशिनम् ।
कंसामन्त्रणनन्दितोऽथ मथुरां गोपीर्विहायाचलत्–
श्रीगोपालमहं नमामि तमहङ्कारादिकारापहम् ।।७।।

भानौ यात्युदयं प्रविश्य मथुरां यो रङ्गकारं हरन्
कुब्जां दिव्यतनुं विधाय च धनुर्भञ्जँश्चदुर्हस्तिनम् ।
चाणूरादियुतं निहत्य सहसा कंसं प्रपेदे मुदं
श्रीगोपालमहं नमामि तमहङ्कादिकारापहम् ।।८।।

यज्ञार्थं ह्यु पनीतवानिह वसन् कुब्जां च सम्मानयन्
कौन्तेयांश्च परामृशन्नथ जरासन्धं जयन्नैकधा ।
गोमन्तादवरुह्य यो वसतये द्वारावतीं निर्ममे
श्रीगोपालमहं नमामि तमहङ्कारादिकारापहम् ।।९।।

स्वाम्यं तत्र समेत्य यादवयुतो यो रुक्मिणीपूर्विकाः
पत्नीः संपरिणीय तासु विहरन् पुत्रादिसौख्यं भजन् ।
दुष्टान् बाणमुखान् जयन् मुरमुखान् दैत्याँल्लयं प्रापयन्
श्रीगोपालमहं नमामि. तमहङ्कारादिकारापहम् ।।१०।।

हारायावनिभारभूतकुभुजां पार्थं सखायं चरन्–
तद्द्वारेण मदोद्धतः क्षितिभुजामष्टादशाक्षौहिणीः ।
यः संहृत्य च वैरतो यदुकुलं स्वीयं प्रपेदे पदं
श्रीगोपालमहं नमामि तमहङ्कारादिकारापहम् ।।११।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीगोपालपरप्रियेण महता मन्त्रेण सन्दीपितं
तल्लीलाङ्कितमञ्चितं पठति यो गोपाललीलास्तवम् ।
कृत्वा धर्मविधिं समेत्य च निधिं गत्वा ससौख्यावधिं
धन्यः स्तन्यरसानभिज्ञपदवीं निस्संशयं प्राप्नुयात् ।।१२।।

श्रीगोपालमुरद्विषो भगवतस्तत्पादपद्मालिनः
श्रीमन्माधववर्मणो जयपुराधीशस्य च प्रीतये ।
द्वित्रैरेव दिनैरनन्यशरणः श्रीभट्टनारायणः
प्रज्ञाक्षो दशपद्यमेतमकरोद् गोपाललीलास्तवम् ।।१३।।

श्रीपर्वणीकरोपाख्यनारायणसुधीकृतम् ।
गोपालचरितस्तोत्रं भूमौ विजयतां सदा ।।

संवत् १९५५ भाद्रपदकृष्णा ६ रविवासरे लिख्यतं
माँगीलाल ब्राह्मण खण्डेलवाल, सवाई जैनग्रमध्ये ।।

1231/311 **GOPĀLASAHASRANĀMA**

गोपालसहस्रनाम

From :—Sammohana tantra

Foll. 39; 15×10.5 cms.; paper; lines per page 7; letters per line 14; Devanāgarī, script; Sanskrit; 19th c.; loose bound.

1239/319(3) **GOPĀLASAHASRANĀMA**

गोपालसहस्रनाम

From—Sammohanatantra

Foll. 169 to 192; 17×13 cms ; paper; lines per page 9; letters per line 17; Devanāgarī script; Sanskrit; 19th c; bound

1383/463 **GOPĀLASAHASRANĀMA STOTRAM**

गोपालसहस्रनाम स्तोत्रम्

From – Sammohanatantra

Foll. 11; 22.3×10.5 cms ; paper; lines per page 8/10; letters per line 25/30; Devanāgarī script; Sanskrit; 1741 V. S. (looks like 1761) (1684 A D.), Vaiśākha Sudi 9, Sunday; scribe—Charaṇadāsa p/o Kṛṣṇadāsa for Gaṅgadāsa Vaiṣṇava at the Vāpika of Gaṅgadāsī; preserved between two card-boards.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1297/377

GOPĀLASAHASRANĀMA

गोपालसहस्रनाम

From—Sammohanatantra

Foll. 48; 16×10.5 cms.; paper; lines per page 5; letters per line 15; Devanāgarī script; Sanskrit; 20th c; scribe Rāma Chandra Lekhaka at the age of eighteen years; received from Amālī (belongings) of Dādījī Śrī Dhīrāvatajī (w/o Sawai Ram Singh II) on Āśāḍha Sudi 5, 1982 V.S. (1925 A.D.)

1213/293

GOPĪSTAVAḤ

गोपीस्तवः

From—Bhāgavata X (I)

Foll. 11; 8·5×8 cms.; paper; lines per page 5; letters per line 8; Devanāgarī script; Sanskrit; 19th c; bound.

117/252

GOVINDĀṢṬAKAM

गोविन्दाष्टकम्

Foll 4; 17×11 cms; paper; lines per page 6; letters per line 17; Devanāgarī script; Sanskrit; 1937 V.S. (1880 A.D) Bhādrapada Śuklā; 13; presented by Māṅgīrāma Lekhaka.

Begins : ।। श्री वरदमूर्तिर्जयति ।। अथ गोविन्दाष्टकं प्रारम्भः ।।
सत्यं ज्ञानमनन्तं नित्यमनाकाशं परमाकाशं
गोष्ठमाङ्गणरिङ्गणलोलमनायासं परमायासम् ।।
मायाकल्पितनानाकारमनाकारं भुवनाकारम्
श्यामानाथमनाथं प्रणमत गोविन्दं परमानन्दम् ।।१।।

मत्स्यामत्स्यीहेतियशोदाताडनशैशवसंत्रासं
व्याधितवक्त्रा लोकति लोकालोकचतुर्दशलोकालम् ।।
लोकत्रयमूलंमूलस्तम्भं लोकालोकमनालोकं
लोकेशं परमेशं प्रणमत गोविन्दं परमानन्दम् ।।२।।

त्रैविष्टपरिपुवीरघ्नं भवरोगघ्नं कैवल्यं
नवनीताहारमनाहारं भुवनाहारं·········।।
कैवल्यस्फुटचेतोवृत्तिविशेषाभासमनाभासं
शैवं केवलशान्तं प्रणमत गोविन्दं परमानन्दम् ।।३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गोपालं प्रभुलीलाविग्रहगोपालं कुलगोपालं
गोपीखेलनगोवर्धनधृतिलीलालालितगोपालम् ।
गोपीनिगदितगोविन्दस्फुटनामानं बहुनामानं
गोपीगोचरदूतं प्रणमत गोविन्दं परमानन्दम् ॥४॥

गोपीमण्डलगोष्ठीभेदाभेदावस्त्वथभेदाभेदं
शश्वद् यो खुरनिर्धूताधृतिधूलितधूसरसौभाग्यम् ॥
श्रद्धाभक्तिगृहीत्वानन्दमचिन्त्याचिन्तितसद्भावं
चिन्तामणिमणिमानं प्रणमत गोविन्दं परमानन्दम् ॥५॥

स्नानव्याकुलयोषिद्वस्त्रमपादायागमपारूढं
व्यादित्सन्त्यथ दिग्वस्त्रावस्त्रं दानमपाकर्षन्तम् ॥
निर्धूतद्वयशोकविमोहं बुद्धं बुद्धेरन्तस्थं
सत्तामात्रशरीरं प्रणमत गोविन्दं परमानन्दम् ॥६॥

कान्तं कारणकारणमादिमनादिं कालघनाभासं
कालिन्दीहृदि काले शिरसि नृत्यन्तं मुहुरत्यन्तम् ॥
कालं कालकलातीतं कलिताशेषं कलिदोषघ्नं ।
कालत्रयगतिहेतुं प्रणमत गोविन्दं परमानन्दम् ॥७॥

वृन्दावनभुवि वृन्दारकगणवृन्दाराधितवन्देऽहं
कुन्दाभामलमन्दस्मेरसुधानन्दं वसुधानन्दम् ॥
वन्द्याशेषमहामुनिमानसवन्द्यानन्दपदद्वन्द्वं
वन्द्याशेषगुणाब्धिं प्रणमत गोविन्दं परमानन्दम् ॥

गोविन्दाष्टकमेतद्गीते गोविन्दार्पितसचिन्तये ।
गोविन्दाच्युत माधव विष्णु गोकुलनायक कृष्णेति ॥

इति श्री गोविन्दाष्टकं समाप्तम् ।
भाद्रपद शुक्ला १३ गुरु सं० १९३७ का

1054/133

GAURĪDAŚAKA STOTRAM

गौरीदशकस्तोत्रम्

Author:—Śaṅkarācharyaḥ

Foll. 3; 16 × 10 cms; paper; lines per page 7; letters per line 14/17; Devanāgarī script; Sanskrit; 1922 V.S. (1865 A.D.); presented by Kahnīrama Paṇḍita.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Begins :— ।। श्रीगणेशाय नमः ।।

लीलारब्धस्थापितलुप्ताखिललोकां
लोकातीतैर्योगिभिरन्तश्चिरमृग्याम् ।
बालादित्यश्रेणिसमानद्युतिपुञ्जां
गौरीमम्बामम्बुरुहाक्षीमहमीडे ।।१।।

Ends :

नित्यस्सत्यो निष्कल एको जगदीशः
साक्षी यस्याः सर्गविधौ संहरणे च ।
विश्वत्राणक्रीडनलीलां शिवपत्नीं
गौरीमम्बामम्बुरुहाक्षीमहमीडे ।।१०।।

प्रातःकाले भावविशुद्धि विदधानो
नित्यं भक्त्या जल्पति गौरीदशकं यः ।।
वाचां सिद्धि सम्पदमुच्चैश्शिवभक्ति
तस्यावश्यं पर्वतपुत्री प्रददाति ।।११।।

इति श्रीमच्छङ्कराचार्यविरचितं गौरीदशकं समाप्तम् ।।
सं० १६२२ आश्विन शुक्लेऽष्टम्यां गुरौ शं ।।

1097/176 CHATURAŚĪTIJÑĀTISTOTRAM

चतुरशीतिज्ञातिस्तोत्रम्

Author:—Preached by Sūrya

Foll. 5; 11×8.5 cms; paper; lines per page 6; letters per line 11; Devanāgarī script; Sanskrit; 19th c.; presented by Gaṇeśa Lekhaka.

Begins :— ।। श्रीगणेशाय नमः ।।

नत्वा श्रीजगदम्बपादयुगलं ज्ञातिक्रमं प्रोच्यते
विप्राणां चतुराशिसंख्यममलं तेभ्योऽखिलेभ्यो नमः ।।
औदीच्या द्विविधा द्विधैव कथिता खेड़ास्त्रिधा मेधया
गौड़ाः पञ्च च नागराः प्रकथिताः षोढा च मोढास्त्रिधा ।।१।।
विप्राष्टोलकिया सहस्र इति यो द्वेधारुदीच्यास्ततः
खेटाश्चान्तरवाह्यकाः प्रकथिताः स्युर्मेदपाटास्त्रिधा ।।
वेद्या चाष्टभटाः क्रमेण पुरतो मोढास्तथैकादश
चातुर्वेदिचतुस्त्रिवेदिरिति वै कुर्यात् सदा मङ्गलम् ।।२।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गौडाः पञ्चविधाः क्रमेण हरियाणा मालवीयास्ततो
गौडाः गुर्जरगौडकाः प्रकथिताः स्युर्मेडतावासिनः ।।
वाह्याभ्यन्तरचित्रकूटजनितास्तच्छिद्रकाः षष्टिकाः
प्रश्नोरेति षडेव नागरगणाः कुर्यात् सदा मङ्गलम् ।।३।।

श्रीमालास्त्वथ पुष्करा दशहरा दिक्पालका गौतमाः
जाल्होराश्च खडायताः सुपुदराः साचोरका भार्गवाः ।।
कुंडालाश्च दधीचजाः कपिलजाः वालेव बेधायुजाः
वाल्मीकाश्च बलाद्रिजाः प्रतिदिनं कुर्यात् सदा मङ्गलम् ।।४।।

नांदोराश्च उदुंबराः हरसिराः खण्डेलवालाः क्रमान्-
मेमालास्त्वथ याज्ञवल्क्यजनिताः स्युर्वैरिसिद्धोद्भवाः ।
तस्माद् गायकवालिकाः द्विजहराः कामेणजातास्ततो
धीनोजास्त्वथ रोडवालकवराः कुर्यात् सदा मङ्गलम् ।।५।।

भाठेलास्त्वथ नापिलाः प्रकथिताः सारस्वताः सोमपाः
उन्नेवालकपल्लिवालकवराः स्युर्गोमतीबालकाः ।।
तस्मात् सायमुनोद्भवाः द्विजवराः स्युर्नन्दजाः दायमाः
पञ्चा नादसमुद्भवाः प्रकथिताः कुर्यात् सदा मङ्गलम् ।।६।।

द्वाविंशा गुरुलोद्गुलान्यथ चतुर्विंशा गयावालकाः
गंगायास्तनयाः सनोड़जनिताः स्युः कान्यकुब्जोद्भवाः ।।
शाकद्वीप्यथ गौडदेशजनिताः सर्यू द्विजाः मैथिलाः
काश्मीराः मथुरोद्भवाः प्रकथिताः कुर्यात् सदा मङ्गलम् ।।७।।

ग्राभीराः मरहट्टकाः द्रविड़जास्तस्माद् हरिद्वारजा-
स्तैलङ्गाः कनडाः प्रयागजनिताः स्युः कौङ्कणाः पर्वताः ।।
इत्येवं दिशि स्वालकेन कथितं सूर्येण विप्रक्रमं
ज्ञातीयं 'चउराशि' संख्यकथितं कुर्यात् सदा मङ्गलम् ।।८।।
इति चतुरशीतिज्ञातिस्तोत्रम्

Note :—In the fourth line of each of the verses from no. 1 to 7 above it should be कुर्युः in place of कुर्यात्

1196/275 CHATURAŚĪTIJÑĀTAYASSTOTRAM

चतुरशीतिज्ञातयस्स्तोत्रम्

Author :—As in no. 1097/176 above.

Foll. 5; 10.7×7.7 cms.; paper; lines per page 5; letters per line 10; Devanāgarī script; Sanskrit; 19th c.; presented by Gaṇeśa Brāhmaṇa.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1266/346 **CHATUŚŚLOKI BHĀGAVATAM ETC.**

चतुश्श्लोकिभागवतम् आदि

Foll. 7; 11.5 × 8 cms ; paper; lines per page 5; letters per line 11; Devanāgarī script; Sanskrit; 19th c.; old; preceded by सप्तश्लोकिगीता and एकश्लोकिरामायण

1301/381 **CHATUHṢAṢṬIYOGINĪ STOTRAM**

चतुःषष्टियोगिनी स्तोत्रम्

Foll. 7; 16·7 × 10 cms ; paper; lines per page 4; letters per line 10; Devanāgarī script;; Sanskrit; 20th c.; written in bold letters;.

955/34 **CHĀNDRĀYAṆAVRATA-KATHĀ**

चान्द्रायणव्रतकथा

Foll. 4; 19 × 14 cms; paper; lines per page 10; letters per line 16; Devanāgarī script; Sanskrit; 20th c.; also known as द्वात्रिंशत् पूर्णिमाव्रतम्

1191/270 **CHAURAPAÑCHĀŚIKĀ**

चौरपञ्चाशिका

Author—Bilhaṇa-Kaviḥ

Folio 1 (scroll); 120·8 × 17·8 cms.; paper; lines 119 in all; letters per line 25/26; Devanāgarī script; Sanskrit; 19th c.; the lower portion is blank. It should be classified as a Kāvya.

1075/154 **CHAURĀŚIKĀSTOTRAM**

चौराशिकास्तोत्रम्

Author :—Veṇīramaḥ

Foll. 2; 18 × 9·5 cms.; paper; lines per page 6; letters per line 17/18; Devanāgarī script; Sanskrit; 19th c.; the names of the gotras of Audīchya Brāhmaṇas are given :—

।।श्रीगणेशाय नमः ।।

प्रणम्य विश्वेश्वरमादिदेवं गुरुं गणेशं हृदि सन्निधाय ।
कुर्वेऽहमौदीच्यसहस्रपूर्वां श्रीभूसुराणां गणनां क्रमेण ।।१।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

टोल्कीया: वडनागराश्च विशला: षष्ट्यूदराश्चित्रका:
प्रष्णोरा: पृष्णिगर्भाः वसुमतिकथिता: मोकला: सारसाश्च ।
भट्टा: मेवाड़संज्ञास्त्रितयपटनाश्चोबिशाख्या: शणाश्च
मोढास्त्रिवेदसंज्ञास्त्वपरमपि चतुर्वेदभेदेषु दक्षा: ।।२।।

गोमती च रविवाल रोटवाल वायड़ा च मुनिवाल रैक्यवाल ।
प्रेतवाल करड़ा च गोलवाल खेटकाह्व विधिवाह्व पल्लिवाल ।।३।।

मैथिला च कपिला कनौजिया द्राविडाश्च परिघा खडायता ।
खेडुग्रा च दशरा तडागिया नार्मदा च मरढावला दश ।।४।।

गयावाल वाल्यं जंभू दधीचा दही माथुरीया करेडाभिराया
दिशावाल सूपदिजा मातृलिंगा चोराशक सारस्वत षट्शणोला।।५।।

पराशरोदुम्बरगुज्जगोडा गोमुत्रिया सोमपुरा मुताला ।
स्वामेढवाल्लीयथला प्रसिद्धा: साचोदरा रैवतकश्रिमाली ।।६।।

नोदोजीया वोरसिधा भटेला जालोपाख्या भारथी हरियाणा: ।
गंगापुत्रा: पुष्करा: गौडसंज्ञाश्च गो गै द्वौ मालवीमेढवालौ ।।७।।

धीणोजिया नगदहा विशुद्धा कंदोलिया भार्गवनाड्यविज्ञा: ।
नन्दूग्रणा सारथिशन्नवाढा विश्वे चैता वेणिरामेण चोक्ता:।।८।।

एतच्चोराशिकास्तोत्रं य: पठेत् प्रयत: पुमान् ।
सर्वेषां चैव विप्राणां पूजनीय: पदे पदे ।।९।। ।।९।।

1267/347(1) JAGANNĀTHĀṢṬAKAM

जगन्नाथाष्टकम्

Foll. 2; 21×16·4 cms.; paper; lines per page 13; letters per line 23; Devanāgarī script; Sanskrit; 20th c.; brittle.

1285/365 JAGANNĀTHĀṢṬAKAM

जगन्नाथाष्टकम्

Foll. 3; 17·7×9·3 cms.; paper; lines per page 6; letters per line 23; Devanāgarī script; Sanskrit; 19th c.; old; presented by Gaṇapati lala, Praśnavara.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1289/369 **JAGANNĀTHĀṢṬAKAM**

जगन्नाथाष्टकम्

Foll. 2; 17 3 × 11 cms.; paper; lines per page 9; letters per line 18; Devanāgarī script; Sanskrit; 20th c.

1226/306(5) **JAYA DEVĪ AMBĀ ĀRATĪ**

जयदेवी अम्बा आरती

Foll. 21 to 24; 15·3 × 10·3 cms.; paper; lines per page 6; letters per line 16; Devanāgarī script; Hindi; 19th c.; bound.

1292/372 **JĀNAKĪTRAILOKYAMOHANAKAVACHAM**

जानकीत्रैलोक्यमोहनकवचम्

From—Sammohana tantra

Foll. 4; 17 × 10·5 cms.; paper; lines per page 8; letters per line 20; Devanāgarī script; Sanskrit; 19th c.

1358/438 **JVARASTOTRAM**

ज्वरस्तोत्रम्

From—Bhāgavata

Foll. 3; 21 × 11 cms.; paper; lines per page 5; letters per line 21; Devanāgarī script; Sanskrit; 1947 V S. (1890A D.), Vaiśākha Śukla 8, Sunday; brittle.

Begins :— ।। श्रीगणेशाय नमः ।। अथ ज्वरस्तोत्रप्रारम्भः ।।
विद्राविते भूतगणे ज्वरस्तु त्रिशिरास्त्रिपात् ।
अभ्यपद्यत दाशार्हं दहन्निव दिशो दश ।।
अथ नारायणो देवस्तं दृष्ट्वा व्यसृजज्ज्वरम् ।।१।।

माहेश्वरो वैष्णवश्च युयुधाते ज्वरावुभौ ।।
माहेश्वरः समाक्रन्दन्वैष्णवेन बलार्दितः ।।२।।

अलब्ध्वाऽभयमन्यत्र भीतो माहेश्वरो ज्वरः ।।
शरणार्थी हृषीकेशं तुष्टाव प्रयताञ्जलिः ।।३।।

ज्वर उवाच ।।
नमामि त्वाऽनन्तशक्तिं परेशं सर्वात्मानं केवलं ज्ञप्तिमात्रम ।
विश्वोत्पत्तिस्थानसंरोधहेतुं यत्तद्ब्रह्म ब्रह्मलिङ्गं प्रशान्तम् ।।४।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कालो दैवं कर्म जीवः स्वभावो द्रव्यं क्षेत्रं प्राण आत्मा विकारः ।।
तत्संघातो वीजरोहप्रवाहस्त्वन्मायैषा तन्निषेधं प्रपद्ये ।।५।।

नानाभावैर्लीलयैवोपपन्नै र्देवान्साधून् लोकसेतून्विभर्षि ।।
हंस्युन्मार्गान्हिंसया वर्तमानान् जन्मैतत्ते भारहाराय भूमेः ।।६।।

तप्तोऽहं ते तेजसा दुःसहेन शीतोग्रेणात्युल्वणेन ज्वरेण ।।
तावत्तापो देहिनां तेंऽघ्रिमूलं नो सेवेरन् यावदाशानुबद्धाः ।।७।।

श्रीभगवानुवाच—
त्रिशिरस्ते प्रसन्नोऽस्मि व्येतु ते मज्ज्वराद्भयम् ।।
यो नौ स्मरति संवादं तस्य त्वन्नभवेद्भयम् ।।८।।

इत्युक्तोऽच्युतमानम्य गतो माहेश्वरो ज्वरः ।।
बाणस्तु रथमारूढः प्रागाद्योत्स्यन् जनार्दनम् ।।९।।

इति श्री ज्वरस्तोत्रं सम्पूर्णम् ।। वैशाखशुक्लेऽष्टम्यां रवौ, १९४७

1109/188

DHUṆḌHIRĀJA STOTRAM

ढुण्ढिराजस्तोत्रम्

Foll. 4; 10.5×7 cms.; paper; lines per page 5; letters per line 11; Devanāgarī script; Sanskrit; 19th c. Incorrectly written.

1135/214

DHUṆḌHIRĀJA STOTRAM

ढुण्ढिराजस्तोत्रम्

Foll. 4; 13.2×8.7 cms.; paper; lines per page 5; letters per line 14; Devanāgarī script; Sanskrit; 19th c ; presented by Gaṇeśa, son of Chūniyā Lekhaka.

953/32

TARPAṆA PRAYOGAḤ

तर्पणप्रयोगः

Foll. 6; 20×10 cms.; paper; lines per page 7; letters per line 28; Devanāgarī script; Sanskrit; 20th c.; It pertains to Dharmaśāstra.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1162/241

TĀRĀṢṬAKAM
ताराष्टकम्

From—Nīlatantra

Foll. 4; 16.5×10.5 cms.; paper; lines per page 7; letters per line 17; Devanāgarī script, Sanskrit; 1935 V. S. (1878 A. D); Bhādrapda sudi 13, 1935 V S.; presented by Gaṇeśa Lekhaka, son of Māṅgīrāma.

Begins :— ।। श्रीराजराजेश्वरो जयति ।। अथ ताराष्टकप्रारम्भः ।।
मातर्नीलसरस्वति प्रणमतां सौभाग्यसम्पत्प्रदे !
प्रत्यालीढपदस्थिते शिवहृदि स्मेराननाम्भोरुहे !
फुल्लेन्दीवरलोचनत्रययुते कर्त्त्रीकपालोत्पले
खड्गं चादधती त्वमेव शरणं त्वामीश्वरीमाश्रये ।।१।।

वाचामीश्वरि भक्तकल्पलतिके सर्वार्थसिद्धिप्रदे !
गद्यप्राकृतपद्यजातिरचनासर्वत्रसिद्धिप्रदे !
नीलेन्दीवरलोचनत्रययुते कारुण्यवारांनिधे !
सौभाग्यामृतवर्षणेन कृपया सिञ्च त्वमस्मादृशम् ।।२।।

सर्वे गर्वसमूहपूरिततनौ सर्पादिवेषोज्ज्वले
व्याघ्रत्वक्परिवीतसुन्दरकटिव्याधूतघण्टाङ्किते ।।

सद्यः कृत्तगलद्रजःपरिमिलन्मुण्डद्वयीमूर्धज–
ग्रन्थिश्रेणिनृमुण्डदामललिते भीमे भयं नाशय ।।३।।

मायानङ्गविकाररूपललनाबिन्द्वर्धचन्द्राम्बिके
हुं फट्कारमयि त्वमेव शरणं मन्त्रात्मिके मादृशः ।
मूर्तिस्ते जननि त्रिधामघटिता स्थूलाऽतिसूक्ष्मा परा
वेदानां नहि गोचरा कथमपि प्राज्ञैर्नुतामाश्रये ।।४।।

त्वत्पादाम्बुजसेवया सुकृतिनो गच्छन्ति सायुज्यतां
तस्य श्रीपरमेश्वरत्रिनयनब्रह्मादिसाम्यात्मनः ।
संसाराम्बुधिमज्जनेऽपटुतनुर्देवेन्द्रमुख्यान् सुरान्
मातस्त्वत्पदसेवने हि विमुखान् किं मन्दधीः सेवते ।।५।।

मातस्त्वत्पदपङ्कजद्वयरजोमुद्राङ्ककोटीरिण–
स्ते देवा जयसंगरे विजयिनो निःशङ्कमङ्के गताः ।
देवोऽहं भुवने न मे सम इति स्पर्धां वहन्तः परा–
स्तत्तुल्यं नियतं यथाऽसुभिरमी नाशं व्रजन्ति स्वयम् ।।६।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्वन्नामस्मरणात् पलायनपरा द्रष्टुं च शक्ता न ते
भूतप्रेतपिशाचराक्षसगणा यक्षाश्च नागाधिपाः ।
दैत्या दानवपुंगवाश्च खचरा व्याघ्रादिका जन्तवो
डाकिन्यः कुपितान्तकाश्च मनुजा मातः क्षणं भूतले ॥७॥

लक्ष्मीः सिद्धगणाश्च पादुकमुखाः सिद्धास्तथा वैरिणां
स्तम्भश्चापि रणाङ्गणे गजघटास्तम्भस्तथा मोहनम् ॥
मातस्त्वत्पदसेवया खलु नृणां सिद्ध्यन्ति ते ते गुणाः
कान्तिः कान्तमनोभवस्य भवति क्षुद्रोऽपि वाचस्पतिः ॥८॥

ताराष्टकमिदं रम्यं भक्तिमान् यः पठेन्नरः ।
प्रातर्मध्याह्नकाले च सायाह्ने नियतः शुचिः ॥९॥

लभते कवितां दिव्यां सर्वशास्त्रार्थविद्भवेत् ।
लक्ष्मीमनश्वरां प्राप्य भुक्त्वा भोगान् यथेप्सितान् ॥१०॥

कीर्तिं कान्तिं च नैरुज्यं सर्वेषां प्रियतां व्रजेत् ।
विख्यातिं चापि लोकेषु प्राप्यान्ते मोक्षमाप्नुयात् ॥११॥

इति नीलतन्त्रे ताराष्टकं सम्पूर्णम् ॥ शुभं भूयात् ॥
मिति भादवा सुदि १३ संवत् १९३५ लिप्य गणेश माँगीरामका की

1249/329 (1)

TULASĪKAVAÇACHAM
तुलसीकवचम्

From—Skandapurāṇa
Foll. 1 to 9; 14.3 × 10.7 cms.; paper; lines per page 7; letters per line 15; Devanāgarī script; Sanskrit; 19th c.; loose bound.

1166/159

TULASĪPŪJĀ
तुलसीपूजा

From—Brahmavaivartta purāṇa
Foll. 6; 14 × 11 cms.; paper; lines per page 6; letters per line 10; Devanāgarī script; Sanskrit; 19th c.; presented by Jhūnthā Lekhaka.

Begins :— ॐ श्रीं ह्रीं क्लीं ऐं वृन्दावनीतीडितायै स्वाहा ॥
श्री भगवानुवाच ॥
वृन्दारूपाश्च वृक्षाश्च यदेकत्र भवन्ति च ।
विदुर्बुधास्तेन वृन्दां मत्प्रियां तां भजाम्यहम् ॥१॥'

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पुरा वभूव या देवी ह्यादौ वृन्दावने वने ।
तेन वृन्दावनी ख्याता तां सौभाग्यां भजाम्यहम् ।।२।।

असंख्येषु च विश्वेषु पूजिता या निरन्तरम् ।
तेन विश्वपूजिताख्यां तां च पूज्यां भजाम्यहम् ।।३।।

असंख्यानि च विश्वानि पवित्राणि तया सदा ।
तां विश्वपावनीं देवीं विरहेण स्मराम्यहम् ।।४।।

देवानतुष्टपुष्पाणां समूहेन पयो विना ।
तां पुष्पसारां शुद्धाञ्च द्रष्टुमिच्छामि शोकतः ।।५।।

विश्वे यत्प्रीतिमात्रेण भक्तानन्दो भवेद्ध्रुवम् ।
नन्दिनी तेन विख्याता सा प्रीता भवताद् हि मे ।।६।।

यस्या देव्यास्तुला नास्ति विश्वेषु लिखितेषु च ।
तुलसी तेन विख्याता तां यामि शरणं प्रियाम् ।।७।।

कृष्णजीवनरूपा या शश्वत् प्रियतमा सती ।
तेन कृष्णजीवनीति सा मे रक्षतु जीवनम् ।।८।।

इत्येवं स्तवनं कृत्वा तत्र तस्थौ रमापतिः ।
ददर्श तुलसीं साक्षात् पादपद्मनतां सतीम् ।।९।।

रुदन्तीमभिमेने न मानिनीं मानपूजिताम् ।
प्रियां दृष्ट्वा प्रियः शीघ्रं वासयामास वक्षसि ।।१०।।

इत्येवं कथितं स्तोत्रं ध्यानं पूजाविधिं शृणु ।
वृन्दा वृन्दावनी विश्वपूजिता विश्वपावनी ।।११।।

पुष्पसारा नन्दिनी च तुलसी कृष्णजीवनी ।
एतन्नामाष्टकं चैव स्तोत्रं नामार्थसंयुतम् ।।१२।।

यः पठेत् तां च सम्पूज्य सोऽश्वमेधफलं लभेत् ।।१३।।

पूजनं मूलमंत्रेण कुर्यात् षोडशधा बुधः ।
तुलसीं पुष्पसारां च सतीं पूजां मनोहराम् ।।१४।।

कृतपापेध्मदाहाय ज्वलदग्निशिखोपमाम् ।
पुष्पेषु तुलना यस्या नास्ति वेदेषु वा मुने ।।१५।।

पवित्ररूपा सर्वासु तुलसी सा च कीर्तिता ।
शिरोधार्या च सर्वेषामीप्सिता विश्वपावनी ।।१६।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जीवन्मुक्तां मुक्तिदाञ्च भजेत्तां हरिभक्तिदाम् ।
इति ध्यात्वा च सम्पूज्य स्तुत्वा च प्रणमेद्भुवि ।।१७।।

उक्तं तुलस्युपाख्यानं सर्वपापप्रणाशनम् ।
धनपुत्रप्रियाबन्धुराज्यदं रोगबन्धहृत् ।।१८।।

इति श्रीब्रह्मवैवर्त्ते प्रकृतिखण्डे नारायणकृततुलसीपूजनादि सम्पूर्णम् ।

1087/166 **TRIGUṆĀTMIKĀKĀLI STOTRAM**

त्रिगुणात्मिकाकालिस्तोत्रम्

Author :—Kālidāsaḥ

Foll. 3; 16×10 cms.; paper; lines per page 7; letters per line 16/17; Devanāgarī script; Sanskrit; 19th c.; presented by Gaṇeśa Brāhmaṇa.

Begins : – ।। श्रीगणेशाय नमः ।। अथ त्रिगुणात्मिकाकालीस्तोत्रं लिख्यते ।
अयि गिरिनन्दिनि नन्दितमेदिनि विश्वविनोदिनि नन्दिनुते
गिरिवरविन्ध्यशिरोधिनिवासिनि विष्णुविलासिनि जिष्णुनुते ।।
भगवति हे शितिकण्ठकुटुम्बिनि भूरिकुटुम्बिनि भूतकृते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।१।।

अयि जगदम्ब कदम्बवनप्रियवासनिवासिनि वासरते
शिखरशिरोमणितुङ्गहिमालयशृंगनिजालयमध्यगते ।।
मधुमधुरे मधुरे मधुरे मधुकैटभभञ्जिनि रासरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।२।।

सुरवरवर्षिणि दुर्धरधर्षिणि दुर्मुखमर्षिणि घोषरते
दनुजनरोषिणि दुर्मुखशोषिणि भवभयमोचिनि सिन्धुसुते ।
त्रिभुवनपोषिणि शङ्करतोषिणि किल्विषमोचिनि हर्षरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।३।।

अयि शतखण्डविखण्डितरुण्डवितण्डितशुण्डगजाधिपते
रिपुगजगण्डविदारणखण्डपराक्रमचण्डमृगाधिपते ।
निजभुजदण्डनिपातितचण्डनिपातितमुण्डमठाधिपते
जज जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।४।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अयि सुमनःसुमनःसुमनःसुमनोरमकान्तियुते
स्रुतरजनीरजनीरजनीरजनीकरचारुयुते ।।
सुनयनविभ्रमरभ्रमरभ्रमरभ्रमराधिपते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।५।।

सुरललनाप्त–तथेइ–तथेइ–तथाभिनयोत्तरनृत्यरते
धुधुकुट-धुंगड-धुंगडदायक-दानकुतूहलगानरते ।
धुधुकुट-धुंकुट–धिद्धिमितध्वनिधीरमृदंगनिनादरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।६।।

जय जय जाप्य जयज्जयशब्दपरिस्तुततत्परविश्वनुते
झिणि झिणिझिणिझिणिझिंकृतनूपुरशिंजितमोहितभूतरते ।
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।७।।

महितमहाहवमल्लिमतल्लिमदल्लितवल्लजभल्लरते
विरचितपल्लिकपुल्लिकमल्लिकझल्लिकमल्लिकवर्गयुते ।
कृतकृतफुल्लसमुल्लसतारणतल्लिजवल्लवसाललिते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।८।।

या माता मधुकैटभप्रमथिनी या माहिषोन्मूलिनी
या धूम्रेक्षणचण्डमुण्डमथिनी या रक्तबीजाशिनी ।
शक्तिः शुम्भनिशुम्भदैत्यदलिनी सा सिद्धलक्ष्मीः परा
सा चण्डी नवकोटिशक्तिसहिता मां पातु विश्वेश्वरी ।।९।।

कालिदासकविराजकल्पितं कालिकास्तवनमिन्द्रराज्यदं
यः पठेत् प्रतिदिनभक्तिपूर्वं कालिकाहृदयतुष्टिकृद्भवेत् ।।१०।।

इति कालिदासकृतत्रिगुणात्मिका कालिकास्तोत्रं सम्पूर्णम् ।।

1181/260 **TRIGUṆĀTMIKĀKĀLI STOTRAM**

त्रिगुणात्मिकाकालिस्तोत्रम्

Author :—Kālidasaḥ

Foll. 9; 11 × 7.5 cms.; paper; lines per page 4; letters per line 10; Devanāgarī script; Sanskrit; 19th c.; presented by Gopāla Brāhmaṇa.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1176/255 **TRIPURASUNDARĪKRAMA STOTRAM**

त्रिपुरसुन्दरीक्रमस्तोत्रम्

Foll. 3; 20.5×10.5 cms.; paper; lines per page 7; letters per line 26; Devanāgarī script; Sanskrit; 19th c ; presented by Gaṇeśa Brāhmaṇa.

1359/439 **TRIPURĀ-AṢṬAPADĪ**

त्रिपुराष्टपदी

From—Tripurā-rahasya

Foll. 4; 20.5×12.4 cms.; paper; lines per page 6; letters per line 16; Devanāgarī script; Sanskrit; 20th c.

1379/459 **TRIPURĀ-AṢṬAPADĪ**

त्रिपुरा-अष्टपदी

Foll. 2; 21.5×10 cms.; paper; lines per page 8; letters per line 27; Devanāgarī script; Sanskrit; 20th c.

Begins :— ।।श्रीगणेशाय नमः।।

जय जय देवि परापररूपिणि जय जय जगतां जनयित्रि
जय जय लीलाभासितसकले जय जय सर्वाश्रयरूपे ।।

जय जय सर्वप्रलयविभाविनि जय जय सर्वान्तररूपे
जय जय विद्याविलसितदेहे जय जय शंकरि नः पाहि ।।१।।

निर्गतगुणाकृतिजातिविभेदे चित्सुखसान्द्रसुधाजलधे
परिहृतपरिमितिपरवाग्रूपिणि मूलविलासिनि मुक्तिमयि ।।

स्वातन्त्र्येण समीहितभावे मणिपुरवासिनि पश्यंति
जय जय विद्याविलसितदेहे जय जय शंकरि नः पाहि ।।२।।

त्वदनुज्ञानमयात्मविभक्तान् मध्यमभावान्कलयन्ति
मध्यमरुपानादृतवासिनि मिश्रितरूपे बुद्धिमयि ।

वसुविधशक्तिबहिष्कृतभावे पीठविभेदविचित्रकृते
जय जय विद्याविलसितदेहे जय जय शंकरि नः पाहि ।।३।।

अद्वयसंविन्मात्रशरीरे सद्वयभावं कलयन्ती
जातानुत्तरमुखशरकिरणैर्मिथुनविभेदादपि दशधा ।

आद्या तत्परपरसंयोगाद्द्रूयश्चापि चतुर्विधता
जय जय विद्याविलसितदेहे जय जय शंकरि नः पाहि ।।४।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अन्ते भेदाभेदविभेदादपि नृपसंख्यस्वररूपा
पञ्चविधं तत्पञ्चकमाद्यं व्यत्यययोगाद्वेदविधा ।
तदनु चतुर्धा मध्यमहीना मिथुनद्वितयं कलयन्ती
जय जय विद्याविलसितदेहे जय जय शंकरि नः पाहि ।।५।।

एवं भूशरमितभेदाढ्या विद्या राज्ञी माता त्वं
तत्संभेदादखिलं भिन्नं भावयसि त्वं शब्दमयी ।।
त्वत्कलया यदि नो संभिन्नं गगनमयं स्यादखिलमिदं
जय जय विद्याविलसितदेहे जय जय शंकरि नः पाहि ।।६।।

स्थानत्रयमपि कलयाहीनं तव यदि मातर्नो किंचित्
परमं चापि पदं विकलं चेच्छपयो पेयं नेतरथा ।।
तत्त्वं प्रत्याद्धृतकलया तद्रूपं व्याप्य सदा स्फुरसि
जय जय विद्याविलसितदेहे जय जय शंकरि नः पाहि ।।७।।

वयमिह लोके सर्जनमुख्ये कृत्ये मुक्तास्त्वद्भीत्या
त्वत्पदपद्मप्रभवाः काले सीदन्तस्त्वामविदन्तः ।।
काले काले पादप्रणतान्भीतान्मूढानतिदीनान्
जय जय विद्याविलसितदेहे जय जय शंकरि नः पाहि ।।८।।

इति त्रिपुरारहस्योक्ताष्टपदी सम्पूर्णा ।।

1155/234

TRIPURĀKRAMASTOTRAM
त्रिपुराक्रमस्तोत्रम्

Author :—Śrī Raghunātha Śeṣa

Foll. 4; 16 × 10 cms.; paper; lines per page 7; letters per line 20; Devanāgarī script; Sanskrit; 19th c.; presented by Gaṇeśa Brāhmaṇa

Begins :— ।।श्रीसुन्दर्यै नमः।।
हरानन्दसन्दोहपूर्णे परेशे परानन्दपूर्णालये पूर्णबोधे !
सुधाब्धौ मणिद्वीपमध्ये त्रिकोणे शिवाकारमञ्चस्थिते ते नमोऽस्तु ।।१।।

सहस्रारविन्दे महाशाम्भवेन सह प्रेमभावं व्रजन्तीं पुरेशीं ।
भजेन्मानसे शुद्धभावेन यो वै भवेत्तस्य लक्ष्मीविलासः सभायाम् ।।२।।

कलाकोटिचन्द्रोदयास्ये त्रिनेत्रे महासुन्दरि त्वां स्मरेद्यः सुभक्तः ।
मनश्चक्रमध्ये द्विपत्रे सुदीप्ते भवेत्तस्य वश्या त्रिलोकी समग्रा।।३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लसद्दिव्यपाशः सुवश्यं करोति तथा कर्षयत्यङ्कुशः सर्वलोकान् ।
धनुर्बाणवेधो हि भिन्नं करोति समस्तं महासुन्दरि त्वां नतोऽस्मि ।।४।।

ह्लींकारबीजं विकसज्जपाभं स्मरेन्महासुन्दरि चाद्यकूटे !
विशुद्धचक्रे विशदे सुभक्तस्तव प्रियः स्यात् स तु योगिनीनाम् ।।५।।

हरस्ते तमोवृत्तियुक्तः करोति जगत्त्रासभावं हरिः सत्वयुक्तः ।
जगत्पालयत्याशु विश्वं प्रसूते विधिस्ते रजोद्भूतबुद्ध्या समस्तम्

समस्तं त्रिमूर्तेः स्वरूपं विहृत्य तिरोधाय रूपं स्वकीयं तथेशः ।
त्वदीयां तमोवृत्तिमासाद्य शुद्धां पदे ते निमग्नो भवत्येव मातः ।।७।

करं कामपूर्णं त्वदीयं शिरोऽन्ते गृहीत्वा सदा शंभुराद्ये विशुद्धः ।
महाशुद्धसत्वेन युक्तः प्रकामं चतुर्णां तथा साक्षिभावं करोति ।।८।।

हरत्येव रूपं तुरीयं हि यत्र मनो लीनभावं भजत्येव तत्र ।
महावाक्यसद्बोधयुक्ता विमुक्ताः स्मरन्त्येव साम्यं पदं ते भवानि

लयस्ते पदे यस्य लग्नः प्रपूर्णः समस्तैः सुरैर्वन्दनीयः प्रकामम् ।
इहामुत्र भोगानशेषान् विदित्वा व्रजेदन्तकाले हि सायुज्यतां ते ।।१०।।

ह्लींकारं त्रिपुरे परात्परतरे श्रीराजराजेश्वरि
त्वन्मन्त्रस्य च कूटके द्वितीयके ये संस्मरन्त्यम्बिके !
हृन्मध्ये विशदे त्वनाहतपुरे शुद्धेन भावेन वै
ते यास्यन्ति परं पदं सुखकरं सौभाग्यमुक्तिप्रदम् ।।११।।

समं ते स्वरूपं समस्तेषु सौम्यं समस्तानि वस्तूनि ते मध्यभागे ।
विनोदात् समस्तं क्षणात् संविहृत्य स्वयं चैकरूपासि ते मे प्रणामः

कलामात्रतो देवि ते रूपमेकं विभिद्येद्द्विधा शम्भुजीवाभिधानात् ।
शिवं जीवरूपं च तं शम्भुरूपं तयोरेकरूपं करोषि त्वमेका ।।१३।।

लयादौ त्वमेका लयान्ते त्वमेका त्वमेका त्वमेका त्वमेका महेशि ।
त्वदन्यान्महामूढदेवान्न मन्ये न जाने न सेवे न भावे भवानि ।।१४।।

ह्लीमेकबीजं तव मन्त्रमध्ये तृतीयकूटे निगमादिगम्यम् ।।
स्मरेन्महासुन्दरि ते त्रिकूटां परां श्रिविद्यां स तु मुक्त एव ।।१५।।

इति श्रीरघुनाथशेषप्रोक्तं क्रमस्तोत्रं सम्पूर्णं ।।
मङ्गलं लेखकानां च पाठकानां च मङ्गलम् ।
मङ्गलं सर्वदेवानां भूमौ भूपतिमङ्गलम् ।।
श्रीबालात्रिपुरायै नमः ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1226/306 (4) **TRIPURĀVĀKYA PUṢPĀÑJALIḤ**

त्रिपुरावाक्यपुष्पाञ्जलिः

Foll. 18 to 20; 15.3 x 10.3 cms ; paper; lines per page 6; letters per line 16; Devanāgarī script; Sanskrit; 19th c.; bound.

1226/306 (2) **TRIPUREŚVARĪ-AMBĀ-ĀRATĪ**

त्रिपुरेश्वरी (अम्बा) आरती

Foll. 5 to 7; 15.3 x 10.3 cms.; paper; lines per page 6; letters per line 16; Devanāgarī script; Sanskrit; 19th c.; bound.

1362/442 **TRIŚATĪNĀMASTOTRAM**

त्रिशतीनामस्तोत्रम्

From : —Brahmāṇḍapurāṇa (Lalitopākhyānam)

Foll. 18; 21 x 10.5 cms.; paper; lines per page 6; letters per line 26; Devanāgarī script; Sanskrit; 20th c.; written within red, black and golden border lines.

1382/462 **TRAILOKYAMAṄGALA-KAVACHAM**

त्रैलोक्यमङ्गलकवचम्

From :—Sanatkumāra Saṃhitā (ix paṭala)

Foll. 3; 22 x 9.3 cms.; paper; lines per page 9/11; letters per line 37; Devanāgarī script; Sanskit; 19th c.; benedicted to Sūrya; preserved between 2 card-boards.

1355/435 **TRAILOKYAMOHANA–KAVACHAM**

त्रैलोक्यमोहनकवचम्

From—Rudrayāmala

Foll. 9; 20.2 x 10.6 cms.; paper; lines per page 7; letters per line 22; Devanāgarī script; Sanskrit; 20th c.

1320/400 (3) **DAKṢIṆĀ STOTRAM**

दक्षिणास्तोत्रम्

From—Brahmavaivartta purāṇa (Prakṛtikhaṇḍa)

Foll. 22 to 28; 15 x 12.3 cms.; paper; lines per page 6; letters per line 9; Devanāgarī script; Sanskrit; 19th c.; bound; bold letters.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1019/98

DAŚAŚLOKĪ ĀDI
दशश्लोकिवेदान्तस्तोत्रादीनि

Author :—Śaṅkarāchārya

Foll. 2 to 24; 15×10 cms.; paper; lines per page 7; letters per line 15/17; Devanāgarī script; Sanskrit; 20th c.;

शङ्कराचार्यकृतानि स्तोत्राणि :—

1. अपराधसुन्दरस्तोत्रम्	ff. 2 to 5
2. शिवाष्टकम्	ff. 6 to 8
3. मातृकास्तुतिः	ff. 9 to 11
4. शिवनामावलीस्तोत्रं	ff. 12 to 14 a
5. अर्धनारीनटेश्वरस्तोत्रम्	ff. 14 a to 16 a
6. शिवस्तुतिः (ब्रह्मोत्तरखण्डे)	ff. 16 a to 18 a
7. शिवस्तोत्रम्	ff. 18 a to 21
8. दशश्लोकिवेदान्तशिव- स्तोत्रम्	ff. 22 to 24

1031/110

DĀRUṆASAPTAKAM
दारुणसप्तकम् (आकाशभैरवकल्पे)

From—Ākāśabhairavakalpa

Foll. 5; 15.5×9.5 cms.; paper; lines per page 6; letters per line 17; Devanāgarī script; Sanskrit; 20th c.; a Tāntrik work.

Begins :— श्रीवरदमूर्तिर्जयति ।।

ॐ वन्दे गुरुपदद्वंद्वं वाङ्मनोतीतगोचरम् ।।
रक्तशुक्लप्रभामिश्रमतर्क्यं भैरवं महः ।।१।।

Ends :—

इति गुह्यं महावीर्यं परमं रिपुनाशनम् ।
भानुवारं समारभ्य मंगलान्तं पठेत्सुधी ।।१०।।

ॐ ह्रीं खें खां खं फट् प्राणग्रहासि २ हुं फट् सर्वशत्रु-
संहारणाय शरभशालुवाय पक्षिराजाय हुं फट् स्वाहा ।।११।।

शुभमस्तु ।।छ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1131/210 **DIVYAŚATA NĀMA**

दिव्यशतनाम

From—Viṣṇupurāṇa

Foll. 6; 11×8.5 cms.; paper; lines per page 5; letters per line 9; Devanāgarī script; Sanskrit; 19th c.; presented by Māṅgīrāma Lekhaka.

Begins :— श्रीगणेशाय नमः ।। नारद उवाच ।।

वासुदेवं हृषीकेशं वामनं जलशायिनम् ।
जनार्दनं हरिं कृष्णं श्रीवत्सं गरुड़ध्वजम् ।।१।।

वराहं पुण्डरीकाक्षं नृसिंहं नरकान्तकम् ।
अव्यक्तं शाश्वतं विश्वमनन्तमजमव्ययम् ।।२।।

नारायणं गदाध्यक्षं गोविन्दं कीर्तिभाजनम् ।
गोवर्धनधरं देवं भूधरं भुवनेश्वरम् ।।३।।

वेत्तारं यज्ञपुरुषं यज्ञेशं यज्ञवाहनम् ।।
चक्रपाणि गदापाणि शङ्खपाणि नरोत्तमम् ।।४।।

वैकुण्ठं दुष्टदमनं भूगर्भं पीतवाससम् ।।
त्रिविक्रमं त्रिकालज्ञं त्रिमूर्ति नन्दकेश्वरम् ।।५।।

रामं रामं हयग्रीवं भीमरौद्रं भवोद्भवम् ।।
श्रीपतिं श्रीवरं श्रीशं मङ्गलं मङ्गलायुधम् ।।६।।

दामोदरं दमोपेतं केशवं केशिसूदनम् ।
वरेण्यं वर्द्धनं विष्णुमानन्दं वसुदेवसुम् ।।७।।

हिरण्यरेत्यं संदोपं पुराणं पुरुषोत्तमम् ।
सकलं निष्कलं शुद्धं निर्गुणं गुणसंस्थितम् ।।८।।

हिरण्यतनुसंकाशं सूर्यायुतसमप्रभम् ।
मेघश्यामं चतुर्बाहुं कुशलं कमलेक्षणम् ।।९।।

ज्योतिरूपमरूपञ्च स्वरूपं हृदि संस्थितम् ।
सर्वज्ञं सर्वरूपस्थं सर्वेशं सर्वतोमुखम् ।।१०।।

ज्ञानकूटस्थमचलं ज्ञानदं परमं प्रभुम् ।
योगेशं योगनिष्ठानां योगिनां योगरूपिणम् ।।११।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ईश्वरं सर्वभूतानां सर्वभूतसमं प्रभुम् ।
इति नामशतं दिव्यं वैष्णवं खलु पापहम् ।।१२।।

व्यासेन कथितं पूर्वं सर्वपापप्रणाशनम् ।
यः पठेत् प्रातरुत्थाय स भवेद्वैष्णवो नरः ।।१३।।

सर्वपापविशुद्धात्मा विष्णुसायुज्यमाप्नुयात् ।
चान्द्रायणसहस्राणि कन्यादानशतानि च ।।१४।।

गवां लक्षसहस्राणि मुक्तिभागी भवेन्नरः ।
अश्वमेधयुतं पुण्यं फलमाप्नोति मानवः ।।१५।।

इति श्रीविष्णुपुराणे शतनामदिव्यस्तोत्रं सम्पूर्णम् ।।शुभम् ।।

1320/400 (7) **DURGĀKAVACHAM**

दुर्गाकवचम्

From—Brahmavaivartta purāṇa (Prakṛtikhaṇḍa)

Foll. 56 to 61; 15×12.3 cms.; paper; lines per page 6; letters per line 9; Devanāgarī script; Sanskrit; 19th c.; bound; old; bold letters.

1369/449 **DURGĀPĀṬHAḤ**

दुर्गापाठः (सप्तशती)

From—Mārkaṇḍeya purāṇa

Foll. 106; 18×13.6 cms.; paper; lines per page 9; letters per line 21; Devanāgarī script; Sanskrit; 1967 V. S. (1910 A.D.); Āśvin Kṛṣṇa 30, Sunday.

......./478/88MJM **DURGĀPĀṬHAḤ**

दुर्गापाठः

From—Mārkaṇḍeyapurāṇa

Foll. 1 (scroll); 105×3 cms.; paper; Devnāgarī script; Sanskrit; 18th c.; old; written in very small letters; included in the Catalogue of Manuscripts in the Maharaja of Jaipur Museum at no. 163 pp. 42-43.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

……471/87MJM **DURGĀPĀṬHAḤ**

दुर्गापाठः

From—Mārkaṇḍeyapurāṇa

Foll. 1 (scroll); 35×13 cms.; paper; Devanāgarī script; Sanskrit; 18th c.; old; written in very small letters on both sides of a leaf; Kavacha and Māhātmya only. Included in the Catalogue of Manuscripts in the Mahārāja of Jaipur Museum at no. 162 pp. 42-43.

……./481 **DURGĀPĀṬHAḤ**

दुर्गापाठः

From--Mārkaṇḍeyapurāṇa

Ct. by Kṛṣṇa Bhaṭṭa

Foll. Text 96+6 (Dhyāna and Rahasya); size 39.5×27 cms.; paintings 2–100 according to the cover leaves missing nos; 46, 97 and 98; Devanāgarī script; Sanskrit; 1856 V. S. (1799 A. D.), Āsoja budi 12, Thursday;

ff. nos 20 and 29 missing; ff. 30. 75, 77 and 85 have got panels more than one. Other illustrated folia are of full size; scribe–Baksīrāma (Baksā) under the supervision of Jagannātha Puṇḍarīka; painters—Ūdā, Rāmasevaka, Gopāla, Hukmā and Lakśmaṇa. Its paintings are displayed in the Art Gallery.

1341/421 **DURGĀPŪJĀPADDHATIḤ**

दुर्गापूजापद्धतिः

Foll. 34; 19.8×10.8 cms.; paper; lines per page 7; letters per line 20; Devanāgarī script; Sanskrit; 1922 V. S. (1865 A.D.); Chaitra budi 13.

1342/422 **DURGĀPŪJĀPADDHATIḤ**

दुर्गापूजापद्धतिः

Foll. 60; 22×11.2 cms.; paper; lines per page 7; letters per line 20/21; Devanāgarī script; Sanskrit; 20th c.; written on bluish Bankpaper.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1104/183 **DURGĀRAHASYAM**

दुर्गारहस्यम्

Foll 8; 10.5×5.5 cms.; paper; lines per page 4; letters per line 12; Devanāgarī script; Sanskrit; 19 4 V.S. (1877A.D) Āśvina Śuklā 10, 1934 V.S.

1088/167 **DURGĀVIJAYASTOTRAM**

दुर्गाविजयस्तोत्रम्

From—Durgāsaptaśatī-stotram

Foll. 4; 17×9 cms.; paper; lines per page 6; letters per line 20; Devanāgarī script; Sanskrit; 19th c.

1013/92 **DURGĀṢṬAKAM**

दुर्गाष्टकम्

Author :—Śaṅkarāchāryaḥ

Foll. 6; 19.5×8.5 cms.; paper; lines per page 4; letters per line 20; Devanāgarī script; Sanskrit; 20th c.

Begins :— ।।श्रीगरोशाय नमः।। ॐ नमश्चण्डिकायै ।।

लक्ष्मीशो योगनिद्रां प्रभजति भुजगाधीशतल्पे सदर्पा–
वुत्पन्नौ दानवौ तच्छ्रवरामलमयाङ्गौ मधुं कैटभं च ।।
दृष्ट्वा भीतस्य धातुर्नुतिभिरभिनुतामाशु तौ नाशयन्तीं
दुर्गां देवीं प्रपद्ये शररामहमशेषापदुन्मूलनाय ।।१।।

युद्धे निर्जित्य दैत्यः सुरकुलमखिलं यस्तदीयेषु धिष्णे–
ष्वास्थाप्य स्वान्विधेयान् स्वयमगमदसौ शक्रतां निष्क्रमेरा ।।
तं सामात्याप्तमित्रं महिषमभिनिहत्यास्थितामात्तखड्गां
दुर्गां देवीं प्रपद्ये शररामहमशेषापदुन्मूलनाय ।। ।।२।।

विश्वोत्पत्तिप्रराशस्थितिहृतिपरे देवि घोरामरारि–
त्रासात् त्रातुं कुलं नः पुनरपि च महासंकटेष्वीदृशेषु ।
श्राविर्भूयात्पुरस्तादिति चररानमत्सर्वगीर्वाराणवर्गां
दुर्गां देवीं प्रपद्ये शररामहमशेषापदुन्मूलनाय ।।३।।

हन्तुं शुंभं निशुम्भं त्रिदशगुरानुतां हेमदोलां हिमाद्रा–
वारुढां व्यूढसैन्यान्युधि निहतवतीं धूम्रदृक्चण्डमुण्डान् ।।
चामुण्डाख्यां दधानामुपशमितमहारक्तबीजोपसर्गां
दुर्गां देवीं प्रपद्ये शररामहशेषापदुन्मूलनाय ।।४।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ब्रह्मेशस्कन्दनारायणकिटिनरसिंहेन्द्रशक्तीः स्वभृत्याः
कृत्वा हत्वा निशुम्भं जितबिबुधगणत्रासिताशेषलोकम् ।।
एकीभूयाथ शुम्भं रणशिरसि निहत्यास्थितामात्तखड्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ।।५।।

त्रायस्व स्वामिनीति त्रिभुवनजननि प्रार्थना त्वय्यथार्था
पाल्यन्ते प्रार्थनाभिर्भगवति शिशवः किं त्वदन्या जनन्यः ?
तत्तुभ्यं स्यान्नमस्यैत्यवनतविबुधाह्लादिवीक्षाविसर्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ।।६।।

त्रैगुण्यानां गुणानामनुसररतार्कीलिनानावतारां
त्रैलोक्यत्राणशीलां दनुजकुलवनीवह्निकीलां सलीलाम् ।।
देवीं सच्चिन्मयीं तां विपुलितविनमत्सर्वगीर्वाणवर्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ।।७।।

सिंहारूढां त्रिनेत्रां करविलसच्चक्रशंखादिरम्या
भक्ताभीष्टप्रदात्रीं त्रिभुवनजननीं सर्वलोकैकवन्द्याम् ।।
सर्वालङ्कारदीप्तां विधुयुतमुकुटां श्यामलाङ्गीं कृशाङ्गीं
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ।।८।।

एतत्सन्तः पठन्तु स्तवमखिलविपज्जालतूलानलाभं
हृन्मोहध्वान्तभानुप्रतिमखिलसंकल्पकल्पद्रुकल्पम् ।।
दौर्गं दौर्गत्यघोरातपतुहिनकरप्रख्यमंहोगजेन्द्र–
श्रेणीपञ्चास्यदेश्यं विपुलभयदकालाहिताक्ष्यप्रतापम् ।।९।।

इति श्रीमच्छङ्कराचार्यविरचितं दुर्गाष्टकं सम्पूर्णम् ।।

1027/106 (1) DURGĀṢṬAKAM (2) SŪRYĀṢṬAKAM

दुर्गाष्टकं सूर्याष्टकम् (सूर्यार्यास्तोत्रम्) च

Author :—Śambhuḥ

Foll. 6; 16×10.2 cms ; paper; lines per page 6; letters per line 17; Devanāgarī script; Sanskrit; 20th c ; scribe Gopāla Brāhmaṇa Lekhaka.

1239/319 (3) DURGĀSAPTAŚATI KAVACHAM

दुर्गासप्तशतिकवचम्

From – Mārkaṇḍeyapurāṇa

Foll. 90 to 168; 17× 13 cms.;paper; lines per page 9; letters per line 17; Devanāgarī script; Sanskrit; 19th c.; bound.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1240/320

DURGĀSAPTAŚATĪ
दुर्गासप्तशती

From—Mārkaṇḍeyapurāṇa

Foll. 53+81; 20×16 cms.; paper; lines per page 10; letters per line 21/22; Devanāgarī script; Sanskrit; 1927 V.S. (1870 A.D.); Baisākha budi 9; bound; scribe-Rāmakumāra Śarmā; corrected in Sanskrit Pāṭhaśālā, Jaipur; painter Vihārī Śārmā; written within yellow borders on bluish paper.

1328/408

DURGĀSAPTAŚATĪ
दुर्गासप्तशती

From--Mārkaṇḍeyapurāṇa

Foll. 57 (text)+81 (paintings); 19×15.3 cms.; paper; lines per page 11; letters per line 19/20; Devanāgarī script; Sanskrit; 1927 V. S. (1870 A. D.); Jeṭha budi 14; bound; scribe—Rāmakumāra; corrected in the Pāṭhaśālā (Sanskrit Pāṭhaśālā) at Jaipur; written within rectangles enclosed by yellow and black lines on bluish bank-paper; contains 81 full size paintings examplifying the later period of Jaipur School.

1331/411

DURGĀSTOTRAM
दुर्गास्तोत्रम्

Author—Nārāyaṇa Parvaṇīkaraḥ

Foll. 6; 21.5×12 cms ; paper; lines per page 7; letters per line 21; Devanāgarī script; Sanskrit; 20th c.

Begins :—।। श्रीगणेशाय नमः ।। श्रीदुर्गादेव्यै नमः ।।
यस्या दक्षिणभागके दशभुजा काली कराला स्थिता
यद्वामे च सरस्वती वसुभुजा भाति प्रसन्नानना ।
यत्पृष्ठे मिथुनत्रयं च पुरतो यस्या हरिः सैरिभः
तामष्टादशबाहुमम्बुजगतां लक्ष्मीं स्मरेन्मध्यगाम् ।।१।।

इति ध्यात्वा ।।
लं पृथ्व्यालकमर्पयामि रुचिरं गन्धं हमभ्रात्मकं
पुष्पं यं मरुदात्मकं च सुरभि धूपं विधूतागमत् ।
रं ब्रह्मात्मकदीपकं वममृतात्मानं च नैवेद्यकं
मातर्मानसिकान् गृहाण रुचिरान् पञ्चोपचारानमून् ।।२।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति सम्पूज्य पठेत्-

कल्पान्ते भुजगाधिपं मुररिपावास्तीर्य निद्रामिते
संजातौ मधुकैटभौ सुररिपू तत्कर्णपिञ्जूषतः ।
दृष्ट्वा भीतिभरान्वितेन विधिना या संस्तुताऽघातयद्
वैकुण्ठेन विमोह्य तौ भगवतीं तामस्मि कालीं भजे ।।३।।

या पूर्व महिषासुरार्दितसुरोदन्तश्रुतिप्रोत्थित-
क्रोधव्याप्तशिवादिदेवतनुतो निर्गत्य तेजोमयी ।
देवप्राप्तसमस्तवेषरुचिरा सिंहेन साकं सुर-
द्वेष्टॄणां कदनं चकार नितरां तामस्मि लक्ष्मीं भजे ।।४।।

सैन्यं नष्टमवेक्ष्य चिक्षुरमुखा योद्धुं ययुर्येऽथ तान्
हत्वा शृङ्गखुरास्यपुच्छवलनैस्त्रस्तत्रिलोकीजनम् ।
आक्रम्य प्रपदेन तं च महिषं शूलेन कण्ठेऽभिनद्
या मद्यारुणनेत्रवक्त्रकमला तामस्मि लक्ष्मीं भजे ।।५।।

ब्रह्मा विष्णुमहेश्वरौ च गदितुं यस्याः प्रभावं बलं
नालं सा परिपालनाय जगतोऽस्माकं च कुर्यान्मतिम् ।
इत्थं शक्रमुखैः स्तुताऽमरगणैर्या संस्मृता यद्व्रजं
हन्तास्मीति वरं ददावतिशुभं तामस्मि लक्ष्मीं भजे ।।६।।

भूयः शुम्भनिशुम्भपीडितसुरैः स्तोत्रं हिमाद्रौ कृतं
श्रुत्वा तत्र समागतेशरमणीदेहादभूत्कौशिकी ।
या नैजग्रहणेरिताय सुरजिद्दूताय सन्धां रणे
यो जेता स पतिर्ममेत्यकथयत्तामस्मि वाणीं भजे ।।७।।

तद्दूतस्य वचो निशम्य कुपितः शुंभोऽथ यं प्रैषयत्
केशाकर्षणविह्वलां बलयुतस्तामानयेति द्रुतम् ।
दैत्यं भस्म चकार धूम्रनयनं हुंकारमात्रेण या
तत्सैन्यं च जघान यन्मृगपतिस्तामस्मि वाणीं भजे ।।८।।

चण्डं मुण्डयुतं च सैन्यसहितं दृष्ट्वाऽऽगतं संयुगे
काल्या भैरवया ललाटफलकादुद्भू तयाऽघातयत् ।
तावादाय समागतेत्यथ च या तस्याः प्रसन्ना सती
चामुण्डेत्यभिधां व्यधात्त्रिभुवने तामस्मि वाणीं भजे ।।९।।

श्रुत्वा संयति चण्डमुण्डमरणं शुम्भो निशुम्भान्वितः
क्रुद्धस्तत्र समेत्य सैन्यसहितश्चक्रेऽद्भुतं संयुगम् ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ब्रह्माण्यादियुता रणे बलपतिं या रक्तबीजासुरं
चामुण्डापरिपीतरक्तमवधीत्तामस्मि वाणीं भजे ।।१०।।

दृष्ट्वा रक्तजनुर्वधं प्रकुपितौ शुम्भो निशुम्भोऽप्युभौ
चक्राते तुमुलं रणं प्रतिभयं नानास्त्रशस्त्रोत्करैः ।
तत्राद्यं विनिपात्य मूर्च्छितमलं छित्वा निशुम्भशिरः
खड्गेनैनमपातयत्सपदि या तामस्मि वाणीं भजे ।।११।।

शुम्भं भ्रातृवधादतीव कुपितं दुर्गे त्वमन्याश्रयात्
गर्विष्ठा भवमेत्युदीर्य सहसा युध्यन्तमत्युत्कटम् ।
एकैवास्मि न चापरेति वचती भित्वा च शूलेन या
वक्षस्येनमपातयद् भुवि बलात्तामस्मि वाणीं भजे ।।१२।।

दैत्येऽस्मिन्निहतेऽनलप्रभृतिभिर्देवैः स्तुता प्राथिता
सर्वार्तिप्रशमाय सर्वजगतः स्वीयारिनाशाय च ।।
बाधा दैत्यजनिर्भविष्यति यदा तत्रावतीर्य स्वयं
दैत्यान्नाशयितास्म्यहं वरमदात्तामस्मि वाणीं भजे ।।१३।।

यश्चैतच्चरितत्रयं पठति ना तस्यैधते सन्तति-
र्धान्यं धर्मधनादिकं च, विपदां सद्यश्च नाशो भवेत् ।
इत्युक्त्वान्तरधीयत स्वयमहो या पूजिता प्रत्यहं
वित्तं धर्ममतिं सुतांश्च ददते तामस्मि वाणीं भजे ।।१४।।

इत्येतत्कथितं निशम्य चरितं देव्याः शुभं मेधसा
राजाऽसौ सुरथः समाधिरतुलं वैश्यश्च तेपे तपः ।।
या तुष्टाऽत्र परत्र जन्मनि वरं राज्यं ददौ भूभृते
ज्ञानं चैव समाधये भगवतीं तामस्मि वाणीं भजे ।।१५।।

दुर्गासप्तशतीत्रयोदशमिताध्यायार्थसंगर्भितं
दुर्गास्तोत्रमिदं पठिष्यति जनो यः कश्चिदत्यादरात् ।
तस्य श्रीरतुलामतिश्च विमला पुत्रः कुलालंकृतिः
श्रीदुर्गाचरणारविन्दकृपया स्यादत्र कः संशयः ।।१६।।

(१) १०४ (२) ६९ (३) ४४
वेदाभ्रावनि संमिता नवरसा वर्णाब्धितुल्याः करा-
(४) ४२ (५) १२९ (६) २४ (७) २७ (८) ६२
म्नाया नन्दकरेन्दवो युगकराः शैलद्वयोऽन्यङ्कः ।

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(९) ४१ (१०) ३२ (११) ५५ (१२) ४१
चन्द्राम्भोधिसमा भुजानलमिता बणेषवोऽब्जार्णवा
(१३) २९
नन्दद्वन्द्वसमा इतीह कथिता अध्यायमन्त्राः क्रमात् ।।१७।।

श्रीपर्वणीकरोपाख्यनारायणसुधीकृतम् ।
दुर्गास्तोत्रमिदं धीराः पश्यन्तु गतमत्सराः ।।१८।।

इति श्रीपर्वणीकरोपनामकश्रीगंगारामभट्टपुत्रश्रीनारायण–
भट्टविरचितं श्री दुर्गास्तोत्रं सम्पूर्णम् ।।

1313/393 DEVISTUTISTOTRAM

देविस्तुतिस्तोत्रम्

Foll. 2; 21 × 11 cms.; paper; lines per page 7/5; letters per line 24; Devanāgarī script; Sanskrit; 1941 V.S.(1884 A.D.); Āṣāḍhā śuklā 15, Tuesday.

Begins :—।। श्रीगणेशाय नमः ।।

गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीम् ।
देवीं मन्त्रमयीं नौमि मातृकापीठरूपिणीम् ।।१।।

प्रणमामि महादेवीं मातृकां परमेश्वरीम् ।
कालहृल्लोहलोल्लोलकलनाशमकारिणीम् ।।२।।

यदक्षरैकमात्रेऽपि संसिद्धयै स्पर्धते नरः ।
रविताक्ष्र्येन्दुकन्दर्पशङ्करानलविष्णुभिः ।।३।।

यदक्षरशशिज्योत्स्नामण्डितं भुवनत्रयम् ।
वन्दे सर्वेश्वरीं देवीं महाश्रीसिद्धमातृकाम् ।।४।।

यदेकादशमाधारं बीजं कोणत्रयोद्भवम् ।
ब्रह्माण्डादिकटाहान्तं जगदद्यापि दृश्यते ।।५।।

यदक्षरमहासूत्रप्रोतमेतज्जगत्त्रयम् ।
ब्रह्माण्डादिकटाहान्तं तां वन्दे सिद्धमातृकाम् ।।६।।

अकचादिटतोन्नद्धपयशाक्षरवर्गिणीम् ।
ज्येष्ठाङ्गबाहुहृत्कण्ठकटिपदनिवासिनीम् ।।७।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तामीकाराक्षरोद्धारां सारात्सारां परात्पराम् ।
प्रणमामि महादेवीं परमानन्दरूपिणीम् ।।८।।

अद्यापि यस्या जानन्ति न मनागपि देवताः ।
केयं कस्मात् क्व केनेति सरूपारूपभावनाम् ।।६।।

वन्दे तामहमक्षय्यां क्षकाराक्षररूपिणीम् ।
देवीकुलकलोल्लोलप्रोल्लसन्तीं परां शिवाम् ।।१०।।

वर्गानुक्रमयोगेन यस्यां मात्राष्टकं स्थितम् ।
वन्दे तामष्टवर्गां च महासिद्ध्यष्टकेश्वरीम् ।।११।।

कामपूर्णजकाराद्यश्रीपीठान्तरवासिनीम् ।
चतुराज्ञाकोशभूतां नौमि श्रीत्रिपुरामहम् ।।१२।।

इति द्वादशभिः श्लोकैः स्तवनं सर्वसिद्धिदम् ।
देव्याःस्तवखण्डरूपायाः स्तवनं तव तद्यतः ।।१३।।

Foll. 279; 7.5 × 4.5 cms ; paper; lines per page 4; letters per line 12; Devanāgarī script; Sanskrit; 18th c.; written in miniature letters; bound; illustrations on ff. 1 and 2; included in the Catalogue of Manuscripts in the Maharaja of Jaipur Museum, pp. 12-13 at no. 56.

... 479/A.G. 2173 (BHAGAVAD) GĪTĀ

(भगवद्) गीता

Foll 1 (scroll); 287 × 10 cms ; paper; Devanāgarī script; Sanskrit; 1850 V.S. (1793 A.D.); miniature writing; Kashmiri paper; golden lines. Included in the Catalogue of Manuscripts, in the Maharaja of Jaipur Museum, pp. 12–13 at no. 59.

1070/149 BHAJA GOVINDAM STOTRAM

भज गोविन्दं स्तोत्रम्

Author :— Śaṅkarāchāryaḥ

Foll. 14.5 × 10.5 cms.; paper; lines per page 7; letters per line 14; Devanāgarī script; Sanskrit; 19th c ; presented by Gaṇeśa, son of Māṅgīrāma Lekhaka.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1249/329(?) **BHAJA GOVINDĀṢṬAKA STOTRAM**

भजगोविन्दाष्टक-स्तोत्रम्

Author :— Śaṅkarāchāryaḥ

Foll. 9 to 13; 14.3 × 10.7 cms; paper; lines per page 7; letters per line 15; Devanāgarī script; Sanskrit; 19th c; loose bound.

970/49 **BHAVĀNISTORAM**

भवानिस्तोत्रम्

Foll. 2· 15.7 × 9.5 cms ; paper; lines per page 7; letters per line 21; Devanāgarī script; Sanskrit; 20th c.

978/57 **BHAVĀNISTOTRAM**

भवानिस्तोत्रम्

Foll. 4; 18 × 9 cms.; paper; lines per page 4; letters per line 18; Devanāgarī script; Sanskrit; 1938 V.S.(1881 A.D.); scribe-Rāmaratna Śarmā.

1107/186 **BHAVĀNISTOTRAM**

भवानिस्तोत्रम्

Foll. 8; 10.5 × 8.5 cms; paper; lines per page 4; letters per line 7; Devanāgarī script; Sanskrit; 19th c.

1117/196 **BHAVĀNISTOTRAM**

भवानिस्तोत्रम्

Foll. 7; 10 × 8 cms; paper; lines per page 4; letters per line 9; Devanāgarī script; Sanskrit; 19th c.; presented by Dāmodara Lekhaka.

1119/198 **BHAVĀNISTOTRAM**

भवानिस्तोत्रम्

Foll. 7; 10 × 8 cms.; paper; lines per page 4; letters per line 9; Devanāgarī script; Sanskrit; 19th c.; presented by Dāmodara Lekhaka.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1236/316(i) BHĪṢMASTAVARĀJAḤ

भीष्मस्तवराजः

From—Mahābhārata

Foll. 1 to 41; 17.5×13.8 cms.; paper; lines per page 5; letters per line 9; Devanāgarī script; Sanskrit; 1896 V.S. (1839 A.D.); Jeyṣṭha Kṛṣṇā 12, Friday; bound; scribe-Chhājūrāma Miśra; written in bold letters.

1264/344(3) BHĪṢMASTAVARĀJAḤ

भीष्मस्तवराजः

From—Mahābhārata

Foll. 288 to 326; 14.3×12 cms.; paper; lines per page 6; letters per line 10; Devanāgarī script; Sanskrit; 19th c.; bound.

1265/345(3) BHĪṢMASTAVARĀJAḤ

भीष्मस्तवराजः

From—Mahābhārata

Foll. 147 to 166; 15.5×12 cms.; paper; lines per page 8; letters per line 14; Devanāgarī script; Sanskrit; 1862 V.S. (1805 A.D.); loose bound.

1295/375(i) BHĪṢMASTAVARĀJAḤ

भीष्मस्तवराजः

From—Mahābhārata

Foll. 1 to 23; 15.5×8.5 cms.; paper; lines per page 5; letters per line 18; Devanāgarī script; Sanskrit; 1891 V.S. (1834 A.D.); bound.

1304/384(3) BHĪṢMASTAVARĀJAḤ

भीष्मस्तवराजः

Frow—Mahābhārata

Foll. 106 to 120; 18.5×15 cms.; paper; lines per page 7; letters per line 14; Devanāgarī script; Sanskrit; 1921 V.S. (1864 A.D.) Āṣaḍha Śuklā 4, Friday; bound; scribe-Ghamaṇḍīrāma Śrīmālī.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1337/417 **BHAIRAVA PĀṬHAḤ or STAVARĀJAḤ**

भैरवपाठः स्तवराजो वा

From —Viśvasāroddhāra

Foll. 22; 20.5×10 cms.; paper; lines per page 4; letters per line 19; Devanāgarī script; Sanskrit; 1948 V.S. (1891 A.D.); appears to have been written by Jagannātha Brāhmaṇa

1346/426 **BHAIRAVA PĀṬHĀḤ**

भैरवपाठः

From—Viśvasāroddhāra (Rudrayāmala)

Foll. 46; 23.5×12 cms.; paper; lines per page 3; letters per line 14; Devanāgarī script; Sanskrit; 1948 V.S. (1881 A.D.); wtitten within multi-coloured borders; first page decorative.

1347/427 **BHAIRAVAPĀṬHAḤ**

भैरवपाठः

From—Viśvasāroddhāra (Rudrayāmala)

Foll. 13; 23.3×12.2 cms.; paper; lines per page 6; letters per line 23; Devanāgarī script; Sanskrit; 20th c.

1148/227 **BHAIRAVASTOTRAM**

भैरवस्तोत्रम्

Author—Ṣimānandanātha

Foll. 9; 10.5×11 cms.; paper; lines per page 6; letters per line 9; Devanāgarī script; Sanskrit; 1928 V.S. (1871 A.D.); presented by Prabhu lāla Lekhaka

Begins :—।। श्रीगणेशाय नमः ।।

कं कं कं कालकालं कलिकलुषहरं कामदं कल्पवृक्षं
खं खं खं खड्गहस्तं स्खलितशिवजटाखर्परं सिन्धुपूर्णम् ।
गं गं गं गर्वापहारं गगनघनघटाश्यामलं घोरघोषं
घं घं घं घूर्मिताक्षं अखिलभयहरं भैरवं भावयामि ।।१।।

चं चं चं चञ्चलं च चपलचखचलं चारुचन्द्रावतंसं
छं छं छं छत्रपालं छविछलकछटाछद्मसद्म सुरेशम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जं जं जं जोगजुक्तं जपतपनिरतं याजकं यज्ञभुक्तं
झं झं झं ज्वालझालं झलझलमलद् भैरवं भावयामि ।।२।।

टं टं टं टंकपाशं डमरुत्रिशिखं दण्डकापालहस्तं
ठं ठं ठं ठंकारनादं कपिलशिरजटानागयज्ञोपवीतम् ।
डं डं डं डाकिनीशं डकडकरुधिरापानमत्तं महेशं
नं नं नं निःशङ्कलग्नं नमितसुरनरं भैरवं भावयामि ।।३।।

तं तं तं तीव्रतापं तपति च त्रिविधं तारणं तत्क्षणं च
थं थं थं थानुरूपं स्थिरचरप्रकरं पावनं पूर्णमेकम् ।
दं दं दं दुर्गरूपं मलयमधुभरं दिव्यदेहं पवित्रं ।
धं धं धं धैर्यधीरं अखिलभयहरं भैरवं भावयामि ।।४।।

पं पं पं पापनाशं परमपदप्रदं पावनं पूर्णब्रह्म
फं फं फं फूत्कारघोरं फणिवलितवपुर्भस्मभासोज्वलं च ।
बं बं बं बिघ्नहरवटुकं बहुविधभूतवेतालवन्द्यं
भं भं भं भीमनादं अखिलभयहरं भैरवं भावयामि ।।५।।

यं यं यं यक्षरक्षोरगगणसुभटं रक्षसां त्रासनं च
रं रं रं रक्तवर्णं रसिकरतिरसं राजराजेश्वरं च ।
लं लं लं लोललीलाललितसुललनालालितं लोकनाथं
वं वं वं वाञ्छितार्थप्रदमनिशमहाभैरवं भावयामि ।।६।।

शं शं शं स्वर्गद्वीपे कल्पतरुवने रत्नपीठे निषण्णं
वामाङ्के विद्युदाभां कनकसुलतिकां भैरवीं भ्राजमानाम् ।
षं षं षं षट्वाङ्गं खड्गडमरुत्रिशिखं बिभ्रतं पाणिपद्मे
सं सं सं स्वर्णवृष्टि कृतमधुमुदितं भैरवं भावयामि ।।७।।

हं हं हं हर्षपूर्णं हरिहरप्रकरं हेममाकर्षणं च
लंक्षं स्वक्षं प्रतिक्षं स्वहृदयकमले सच्चिदानन्दपूर्णम् ।
सर्वं शीघ्रप्रदं रसरसायनपरं सिद्धाञ्जनं पादुकां
भक्तानां भूरिभावैर्भवभयहरणं भैरवं भावयामि ।।८।।

कल्पान्तज्वालझालं झलकझलमलं वेदिकां स्वर्णद्वीपे
कल्पवृक्षस्य मूले स्मितमुखकमलं रत्नपीठे निषण्णम् ।
भक्तानां वाञ्छितार्थप्रदमतुलमहादुःखदारिद्रचहन्ता
स्वर्णसंवर्षणं च प्रमुदितमनिशं भैरवं भावयामि ।।९।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्यालं व्यालविभूषितं त्रिनयनं बन्धूकपुष्पारुणं
भास्वद्रत्न ········ रात्माविधं श्वेतातपत्रं शुभम् ।
केयूराङ्गदकिंकिणं किल क्वरणन् मञ्जीरपादाम्बुजं
ध्यायेन्मानसपङ्कजे स्मितमुखं श्रीस्वर्णदं भैरवम् ।।१०।।

वालं व्यालोपवीतं त्रिनयनमरुणं मत्तमाघूर्णमानं
डंडं कापालहस्तं डमरु च त्रिशिखं बिभ्रतं पिंगकेशम् ।
नित्यं निःशङ्कनग्नं नमितसुरनरं निःकलं निःप्रपञ्चं
ध्यायेद् हृत्पङ्कजस्थं स्मितमुखकमलं भैरवं भावयामि ।।११।।

भक्त्या भैरवभावितं भ्रमहरं भूतेश्वरं भूतिदं
भीमं भूरिभवाब्धिभीतिशमनं भुक्तिं च मुक्तिप्रदम् ।
भव्ये भास्करकोटिभासममलं भस्माङ्गभूषोज्ज्वलं
स्वर्णाकर्षणस्वर्णवर्षणरतं हृत्पङ्कजस्थं स्मरेत् ।।१२।।

यो भैरवस्तवमिदं प्रपठति नित्यं
सन्ध्यात्रयं मनसि वाञ्छितसिद्धिदं च ।
सौवर्णरत्नगुटिकां जनपादुकादीन्
शीघ्रं लभेदिति षिमानंदवाक्यसत्यम् ।।

इति षिमानन्दनाथविरचितं भैरवस्तोत्रं सम्पूर्णम् ।।
सं. १६२८

994/73

BHAIRAVĀṢṬAKAM
भैरवाष्टकम्

Foll. 4; 16 × 10 cms.; paper; lines per page 6; letters per line 20; Devanāgarī script; Sanskrit; 20th c.; scribe-Balabaksa.

1239/319(8)

BHAIRAVĀṢṬAKAM
भैरवाष्टकम्

From—Rudrayāmala

Foll. 243 to 246; 17 × 13 cms.; paper; lines per page 9; letters per line 17; Devanāgarī script; Sanskrit; 19th c.; bound.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1116/195 **BHAIRAVĀṢṬOTTARAŚATANĀMĀVALĪ**

भैरवाष्टोत्तरशतनामावली

Foll. 8; 11.5×7.5; paper; lines per page 5; letters per line 12; Devanāgarī script; Sanskrit; 19th c..

1200/279 **MAṄGALĀṢṬAKADVAYA STOTRAM**

मङ्गलाष्टकद्वय-स्तोत्रम्

Author— Kālidāsaḥ

Foll. 1 (scroll); 225×17 cms.; paper; lines 129 in all; letters per line 15; Devanāgarī script; Sanskrit; 19th c.; incorrectly written.

1320/400(5) **MANSĀ STOTRAM**

मनसा-स्तोत्रम्

From— Brahmavaivartta purāṇa (Prakṛti-khaṇḍa)

Foll. 33 to 50; 15×12.3 cms.; paper; lines per page 6; letters per line 9; Devanāgarī script; Sanskrit; 19th c.; old; bound; bold letters.

1074/153 **MAHĀKĀLABHAIRAVA-STOTRAM**

महाकाल-भैरव-स्तोत्रम्

Foll. 20; 18×8 cms.; paper; lines per page 5; letters per line 18; Devanāgarī script; Sanskrit; 19th c.

1357/437 **MAHĀGAṆAPATI STOTRAM**

महागणपतिस्तोत्रम्

Author—Śaṅkarāchāryaḥ

Foll. 6; 22×10.5 cms,; paper; lines per page 4; letters per line 22; Devanāgarī script; Sanskrit; 20th c.; scribe-Gopīnātha Śarmā; decorative; written within decorated borders. A beautiful manuscript.

1062/141 **MĀTANGI DAṆDAKAM**

मातङ्गिदण्डकम्

Foll. 11; 11.2×7.5 cms.; paper: lines per page 6; letters per line 12/13; Devanāgarī script; Sanskrit; 19th c.; presented by Gaṇeśa Brāhmaṇa Lekhaka.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Begins :— ।। श्रीगणेशाय नमः ।। श्री मातङ्गिभगवत्यै नमः ।।

ॐ माणिक्यवीणामुपलालयन्तीं
मदालसां मंजुलवाग्विलासाम् ।
माहेन्द्रनीलद्युतिकोमलाङ्गीं
मतङ्गकन्यां मनसा स्मरामि ।।१।।

जय मतङ्गतनये जय नीलोत्पलद्युते
जय संगीतरसिके जय लीलाशुकप्रिये ।।२।।

दण्डकम्—
जय जननि सुधासमुद्रान्तहृद्यन्मणिद्वीपसंरूढबिल्वा-
वलीबद्धकल्पद्रुमाकल्पकादम्बकान्तारवासप्रिये कृत्तिवास-
प्रिये सर्वलोकप्रिये सादरारब्धसंगीतसंभावसंभ्रमालोल-
नीपस्रगाबद्धचूलीसनाथत्रिके सानुमत्पुत्रिके शेखरीभूत-
शीतांशुरेखामयूखावलीबद्धसुस्निग्धनीलालकश्रेणिशृङ्गारिते
लोकसम्भाविते कामलीलाधनुस्सन्निभभ्रूलतापुष्पसंदोह-
सन्देहकृल्लोचने वाक्सुधासेचने चारुगोरोचनापङ्ककेली-
ललामाभिरामे सुरामे रमे प्रोल्लसद्धालिकामौक्तिकश्रेणिका-
चन्द्रिकामण्डलोद्भासिलावण्यगण्डस्थलन्यस्तकस्तूरिका-
पत्ररेखासमुद्भूतसौरभ्यसंभ्रान्तभृङ्गाङ्गनागीतवन्मन्द्रतन्त्रीश्वरे
सुस्वरे भास्वरे वल्लकीवादनप्रक्रियालोलतालीदला-
बद्धताटङ्कभूषाविशेषान्विते सिद्धसम्मानिते दिव्यहाला-
मदोद्दामहेलालसच्चक्षुरान्दोलनश्रीसमाक्षिप्तकर्णैकनीलोत्पले
पूरिताशेषलोकाभिवाञ्छाफले श्रीफले स्वेद-
बिन्दुलसद्भाललावण्यनिष्यंदसंदोहसन्देहकृन्नासिकामौक्तिके
कालिके सर्वविश्वात्मिके मुग्धमन्दस्मितोदारवक्त्रस्फुरत्पूग-
कर्पूरताम्बूलकण्ठोत्करे पद्मभास्वत्करे कुन्दपुष्पद्युतिस्निग्ध-
दन्तावलीनिर्मलालोलसम्मेलनस्मेरशोणाधरे चारुवीणाधरे
नियतललितनवयौवनारम्भचन्द्रोदयोद्वेललावण्यदुग्धार्णवा-
विर्भवत्कम्बुबिब्बोकभृत्कन्धरे सत्कलामन्दिरे मंथरे बन्धुरच्छन्न-
हारादिभूषासमुद्योतमानानवद्यांशुशोभाशुभे शिवे रत्नकेयूररश्मि-
च्छटापल्लवप्रोल्लसद्दोर्लताराजिते योगिभिः पूजिते विश्व-
दिङ्मण्डलव्यापिमाणिक्यतेजस्फुरत्कङ्कणालङ्कृते विभ्रमा-
लङ्कृते साधकैस्सत्कृते वासरारम्भवेलासमुज्जृम्भमाणार-
विन्दप्रतिद्वन्द्विपाणिद्वये सन्ततोद्यद्द्वये अद्वये दिव्यरत्नोर्मिका-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दीधितिस्तोमसंध्यायमानाङ्गुलीपल्लवोद्यन्नखेन्दुप्रभामण्डले प्रोल्लसत्कुण्डले तारकाराजनीकाशहारावलीस्मेरचारुस्तना-भोगभारानमन्मध्यवल्लीवलच्छेदवीचीसमुल्लाससंदर्शिताकार-सौन्दर्यरत्नाकरे चारुताम्बूलकर्पूरखण्डोत्करे वल्लकीभृत्करे श्रीकरे हेमकुम्भोपमोत्तुङ्गवक्षोजभारावनम्रे त्रिलोकावनम्रे लसद्वृत्तगम्भीरनाभीसरस्तीरशैवालशङ्काकरश्यामरोमावली-भूषणे मञ्जुसम्भाषणे चारुशिञ्जत्कटीसूत्रनिर्भर्त्सिताङ्ग-लीलाधनु:शिञ्जिनीडम्बरे दिव्यरागाम्बरे पद्मरागोल्लसन्मेखला भास्वरश्रोणिजितस्वर्णभूभृत्तले चन्द्रिकाशीतले विकसित-नवकिंशुकाताम्रदिव्यांशुकच्छन्नचारुशोभापराभूतसिन्धूर-(सिन्दूर)-शोणायमानेन्द्रमातङ्गहस्तार्गले वैभवानर्गले श्यामले कोमलस्निग्धनीलोत्पलोत्पादितानङ्गतूणीरशङ्काकरोदारजङ्घालते चारुलीलागते नम्रदिक्पालसीमन्तिनीकुन्तलस्निग्धनीलप्रभा-पुञ्जसञ्जातदूर्वाङ्कुराशङ्किसारंगसंयोगशुभ्रनखेन्दूज्ज्वले प्रोज्ज्वले निर्मले ब्रह्मदेवेशलक्ष्मीशभूतेशयज्ञेशवाणीशकीनाश-वायवग्निकोटीरमाणिक्यसंघृष्टबालातपोद्दामलाक्षारसारण्य-तारुण्यलक्ष्मीगृहीताङ्घ्रिपद्मे सुपद्मे उमे सुरुचिनवरत्नपीठ-स्थिते सुस्थिते रत्नपद्मासने रत्नसिंहासने शङ्खपद्मद्वयोपाश्रिते तत्र ब्रह्मेशविघ्नेशदुर्गाबटुक्षेत्रपालैर्युते मत्तमातङ्गकन्यासमूहा-न्विते भैरवैरष्टभिर्वेष्टिते देवि वामादिभि: शक्तिभि: सेविते धातृलक्ष्म्यादिशक्त्यष्टकै: संयुते मातृकामण्डलैर्मण्डिते यक्षगन्धर्वसिद्धाङ्गनामण्डलैरर्च्यसे पञ्चबाणात्मिके पञ्चबाणेन रत्या च सम्भाविते प्रीतिभाजा वसन्तेन चानन्दिते भक्तिभाजां वरं श्रेयसे कल्पसे योगिनां मानसे ध्यायसे छन्दसामोजसा भ्राजसे गीतविद्याविनोदातितृष्टेन कृष्णेन चानन्दिते भक्तिमच्चेतसा वेधसा स्तूयसे विश्वहृद्येन वाद्येन विद्याधरैर्गीयसे श्रवणाभरणक्वद्दक्षिणक्वाणया वीणया किन्नरैर्गीयसे सर्वसौभाग्यवाञ्छावतीभिर्वधूभि: सुराणां समाराध्यसे सर्वविद्याविशेषान्वितं चाटुगाथासमुच्चारणं कर्णमूलोल्लसद् वर्णराजत्रयं कोमलं श्यामलोदारपक्षद्वयं तुण्डशोभातिदूरीभव-त्किंशुकं तं शुकं लालयन्ती परिक्रीडसे देवि पाणिद्वयेणाक्षमा-लामपि स्फाटिकीं ज्ञानसारात्मकं पुस्तकं पाशके बिभ्रती येन संचिन्त्यसे तस्य वक्त्रान्तराद गद्यपद्यात्मिका भारतीनिस्सरेद्येन वा पुरुष: शातकुम्भद्युतिर्भाव्यते यावकाभाकृतिर्भाव्यते सोऽपि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सोऽपि लक्ष्मीसहस्रैः परिक्रीडते तस्य वश्या भवन्ति स्त्रियः किं न सिद्धेद्वपुः श्यामलकोमलं चन्द्रचूडान्वितं तावकं ध्यायतः तस्य लीलासरोवारिधिस्तस्य केलीवनं नन्दनं तस्य भद्रासनं भूतलं तस्य गीर्देवता किङ्करी तस्य चाज्ञाकरी श्रीः स्वयं सर्वतीर्थात्मिके सर्वमन्त्रात्मिके सर्वतन्त्रात्मिके सर्वशक्त्यात्मिके सर्वपीठात्मिके सर्वनादात्मिके सर्वशब्दात्मिके सर्वविश्वात्मिके सर्वदीक्षात्मिके सर्वसर्वात्मिके सर्वगे पाहि मां पाहि मां पाहि मां मातङ्गेश्वरि, इति दण्डकम् ।।

1000/79

MĀTAṄGI STOTRAM
मातङ्गि स्तोत्रम्

Foll. 3; 16 × 10 cms.; paper; lines per page 6; letters per line 18; Devanāgarī script; Sanskrit; 20th c.; scribe—Gopāla Lekhaka.

1046/125

MĀNASĪ SEVĀ
मानसी सेवा (शालग्रामस्य)

Author :— Jana Gaṅgā

Foll. 2; 13.5 × 10 cms.; paper; lines per page 9; letters per line 17/18; Devanāgarī script; Hindi; 19th c ; presented by Gaṇeśa Lekhaka

Begins :— ।। श्रीगणेशाय नमः ।। मानसी सेवा लिष्यते ।।

सालिगराम सब दरि सेऊं, तन करि तुलसी लीजे ।
आतम चंदन घसि घसि चरचूं, इहि बिधि सेवा कीजे ।।

ज्ञान जनेऊ ध्यान धोवती, सुचि का अंचला कोजे ।
काया कुंभ प्रेम का पाणी, हरि दरियाव भरि लीजे ।।

दया आचार विमेक चौका, उरसां आसण कीजे ।
इच्छ्या पुहुप चढ़ाऊं पाती, मनसा सेवा कीजे ।।

नृगुण त्रिकुटी मन करि अरघा, संपट ध्यान धरीजे ।
पाँचौं बाती जोय करि, इच्छ्या सेवा कीजे ।।

कलै कलपना धूम अगयारी, ब्रह्म अग्नि करि षेऊं ।
उलटी वास गगन कौं लागी, इहि विधि देवा सेऊं ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुरु गम मन्त्र जाप अजपा, ह्रिदा पुस्तक कीजै ।
अनभै कथा कहौ रे साधू, इहि विधि पाठ पढीजै ।।

अनहद घंटा झालरि बाजै, अलष पुरस की सेवा ।
पुरस निरंतर बैठ्या साधौ, रोम रोम में देवा ।।

गंगा जमना वहै सुरसती, जहां जाइ ध्यान धरीजै ।
त्रिकुटी मइँ बैठ्या साधौ, वहाँ जाइ दरसन कीजै ।।

सेज संघासन न्रिभै सेऊं, चित की चौंरी कीजै ।
चसमां मांही चवि लटकाऊं, धीरज वैठा रहीजै ।।

कोइक साधौ मिलिया आई, सब संतन का मेला ।
सतगुरु मेरे सरि परि ठाढा, मूंढा आगे चेला ।।

या मेरी सेवा या मेरी पूजा, अैसी आरती कीजै ।
आतमतंत्र विचारि लीजे, जब ध्यान निरंतर कीजै ।।

जल पाषांण भ्रम की सेवा, भूलि भटकि किन मरणा ।
सतगुर मेरे जुगति बताई, तब भो-सागर तरणा ।।

बाहरि भ्रम कदे नहिं जाऊं, अंतरि सेवा जागी ।
जन गंगा न्रिभै करि आणीं, पारब्रह्म लौ लागी ।।

।। इति मानसी सेवा सम्पूर्ण ।।

1149/228

MĀHEŚVARAKAVACHAM
माहेश्वरकवचम्

Foll. 5; 15×10.5 cms.; paper; lines per page 6; letters per line 20; Devanāgarī script; Sanskrit; 19th c.; presented by Bālabakhśa Lekhaka.

Begins :— ।। श्रीगणेशाय नमः ।।

भृगुरुवाच ।।

कवचं माहेश्वरं राजन् देवैरपि सुदुर्लभम् ।
यः करोति स्वगात्रेषु पूतात्मा स भवेन्नरः ।।१।।

कृत्वा न्यासमिमं यस्तु संग्रामं प्रविशेन्नरः ।
न शस्त्रास्तोमरास्तस्य खड्गशक्तिपरश्वधाः ।।२।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रविशन्ति रिपोः क्वापि भवेच्छिवपराक्रमः ।
भूताश्चैव पिशाचाश्च कूष्माण्डाश्च विनायकाः ।।३।।

शिवस्मरणमात्रेण न विशन्ति कलेवरम् ।।

नमः पञ्चवक्त्राय शशिसूर्याग्निनेत्रत्रयाय भयार्तानां भयापहाय गात्ररक्षणार्थे जपे विनियोगः ।। ॐ ह्रौं ह्रां ह्रः इति मन्त्रेण शुद्धगोमयभस्मामन्त्र्य ललाटे तिलकमाधाय पठेत् :—

त्राहि मां देव दुष्प्रेक्ष्य शत्रूणां भयवर्द्धन ।
रक्षेच्च भैरवः प्राच्यां आग्नेय्यां शशिलोचनः ।।१।।

भूतेशो दक्षिणे भागे नैऋत्यां भीमदर्शनः ।
वारुणे वृषकेतुश्च वायौ रक्षतु शंकरः ।।२।।

दिग्वासः सौम्यतो नित्यमैशान्यां मदनान्तकः ।
विश्वेशो दक्षिणे भागे वामे कालिपतिस्तथा ।।३।।

महेश्वरः शिखाभागे भवो भाले सदाऽवतु ।
भ्रुवोर्मध्ये महातेजास्त्रिनेत्रो नेत्रयोर्द्वयोः ।।४।।

पिनाकी नासिकादेशे कर्णयोर्गिरिजापतिः ।
उग्रः कपोलयो रक्षेत् मुखदेशे महाभुजः ।।५।।

जिह्वायामन्धकध्वंसी दन्तान् रक्षतु मृत्युजित् ।
नीलकण्ठः सदा कण्ठे पृष्ठे कामाङ्गनाशनः ।।६।।

हृदि पातु भवानीशो बाहूदरकटिं मृडः ।
गुदे कुक्षौ च मेढ्रे च नाभौ च प्रमथाधिपः ।।७।।

जङ्घे तु चरणौ भीमः सर्वाङ्गे केशवप्रियः ।
रोमकूपे विरूपाक्षः शब्दस्पर्शे च योगवित् ।।८।।

रक्तमज्जावसामांसे शुक्रे सुरगणार्चितः ।
प्राणापानसमानेषु व्यानोदाने च धूर्जटिः ।।९।।

रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु ।
तत् सर्वं रक्ष मे देव व्याधियुक्तं कलेवरम् ।।१०।।

कार्यं कर्म इदं प्राज्ञै र्दीपं प्रज्वाल्य सर्पिषा ।
निवेद्य शिखिनेत्राय धारयेच्चोत्तरामुखम् ।।११।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ज्वरदाहपरिक्रान्तं तथान्यव्याधिसंयुतम् ।
कुशैः सम्मार्ज्य सम्मार्ज्य क्षिपेद्दीपशिखोपरि ।।१२।।

एकाहिकं द्वितीयन्तु तृतीयकचतुर्थकम् ।
वातपित्तसमुद्भूतं सन्निपातोग्रतेजसम् ।।१३।।

अन्येद्युष्कं दुराधर्षं कर्मजं चाभिचारिकम् ।
धातुस्थं कफसंमिश्रं विषमं कामसम्भवम् ।।१४।।

भूताभिकामसंसर्गसंस्थितस्तु इतस्ततः ।
शिवाज्ञाघोरमन्त्रेण पूर्ववृत्तं स्मरन् ज्वर ! ।।१५।।

जहि देहं मनुष्यस्य दीपं गच्छ महाज्वर ! ।
धृत्वा तु कवचं दिव्यं सर्वव्याधिनिषूदनम् ।।१६।।

लूता विस्फोटकं चैव शिरोर्ति छर्दिविग्रहम् ।
कामलाक्षयकासं च गुल्माश्मरि भगंदरम् ।।१७।।

शूलोन्मादं च हृद्रोगं श्वयथुं पाण्डुविद्रधिम् ।
अतिसारादयो रोगा डाकिनीग्रहभयं च यत् ।।१८।।

पामा विर्चचिका दद्रुः कुष्टव्याघ्रवियादिकम् ।
स्मरणान्नाशयत्याशु कवचं शूलपाणिनः ।।१९।।

यस्तु स्मरति नित्यं वै यस्तु धारयते ततः ।
स मुक्तः सर्वपापेभ्यो वसेच्छिवपुरे ततः ।।२०।।

संख्या व्रतस्य यज्ञस्य दानस्यास्तीह शास्त्रतः ।
न संख्या विद्यते शम्भोः कवचं स्मरतो यतः ।।२१।।

तस्मात् सम्यगिदं श्रेष्ठं सर्वकामफलप्रदम् ।
श्रोतव्यं सततं भक्त्या कवचं सार्वकामिकम् ।।२२।।

लिखितं तिष्ठते यस्य गृहे सम्यगनुत्तमम् ।
न तत्र कलहो द्वेषो नाकालमरणं तथा ।।२३।।

नाल्पप्रजाः स्त्रियस्तत्र न दौर्भाग्यं प्रजायते ।
तस्मान्माहेश्वरं नाम कवचं सुरगणार्चितम् ।।२४।।

श्रोतव्यं पठितव्यं च मन्तव्यं भावुकप्रदम् ।।२५।।

इति श्रीसर्वव्याधिनिषूदनं माहेश्वरकवचं सम्पूर्णम् ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1207/286 MṚTASAÑJĪVANAKALPAḤ

मृतसञ्जीवनकल्प :

Author :— Vasiṣṭhaḥ

Foll. 7; 17×10.5 cms; paper; lines per page 5; letters; per line 20; Devanāgarī script; Sanskrit; 1955 V.S. (1898 A.D.), Māgha Kṛṣṇā 3; scribe–Jagannātha

Begins :— श्रीगणेशाय नमः ।। ॐ अस्य श्रीमृतसंजीवनमहामन्त्रस्य वसिष्ठऋषिः विराट्छन्दः मृतसंजीवनमहारुद्रो देवता ॐ भूर्भुवः स्वर्व्यञ्जनानि बीजानि स्वराः शक्तयः मृतसंजीवनमहारुद्र-प्रीत्यर्थे जपे विनियोगः ।।

ॐ ह्रौं जूं सः अङ्गुष्ठाभ्यां नमः, ॐ भूर्भुवः स्वः तर्ज्जनीभ्यां नमः, ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनं मध्यमाभ्यां नमः, ॐ उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् अनामिकाभ्यां नमः, ॐ भूर्भुवः स्वरोम् कनिष्ठिकाभ्यां नमः ।। ॐ जूं सः ह्रौं ॐ करतलकरपृष्ठाभ्यां नमः ।। एवं हृदयादि ।। मूलेन व्यापकं ।।

अथ ध्यानम् ।।

ऊर्ध्वाधोमुखपद्मान्तं स्थितं मृत्युञ्जयेश्वरम् ।
वन्दे मृत्युप्रहन्तारं चन्द्रकोटिसुशीतलम् ।।१।।

एवमाराध्य गौरीशं देवं मृत्युञ्जयेश्वरम् ।
मृतसञ्जीवनं नाम्ना कवचं पूजयेत् सदा ।।२।।

सारात्सारतरं पुण्यं गुह्याद् गुह्यतरं शुभम् ।
महादेवस्य कवचं मृतसञ्जीवनाह्वयम् ।।३।।

समाहितमना भूत्वा श्रृणुष्व कवचं शुभम् ।
श्रुत्वैतद्दिव्यकवचं रहस्यं कुरु सर्वदा ।।४।।

वराभयकरो यज्वा सर्वदेवनिषेवितः ।
मृत्युञ्जयो महादेवः प्राच्यां मां पातु सर्वदा ।।५।।

दधानः शक्तिमभयं त्रिमुखः षड्भुजः प्रभुः ।
सदाशिवो अग्निरूपी आग्नेय्यां पातु सर्वदा ।।६।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अष्टादशभुजोपेतो दंष्ट्राभयकरो विभुः ।
यमरूपी महादेवो दक्षिणस्यां सदावतु ॥७॥

खड्गाभयकरो धीरो रक्षोगणनिषेवितः ।
रक्षोरूपी महेशो मां नैर्ऋत्यां सदावतु ॥८॥

पाशाभयभुजः सर्वरत्नाकरनिषेवितः ।
वरुणो मे महादेवः पश्चिमे मां सदावतु ॥९॥

गदाभयकरः प्राणनायकः सर्वदागतिः ।
वायव्यां मरुतात्मा मां शङ्करः पातु सर्वदा ॥१०॥

शङ्खाभयकरस्थो मां नायकः परमेश्वरः ।
सर्वात्मोत्तरदिग्भागे पातु मां शङ्करः प्रभुः ॥११॥

शूलाभयकरः सर्वविद्यानामधिनायकः ।
ईशानात्मा तथैशान्यां पातु मां परमेश्वरः ॥१२॥

ऊर्ध्वभागे ब्रह्मरूपी विश्वात्माधः सदावतु ।
शिरो मे शङ्करः पातु ललाटं चन्द्रशेखरः ॥१३॥

भ्रूमध्यं सर्वलोकेशस्त्रिनेत्रो लोचनेऽवतु ।
भ्रूयुग्मं गिरिशः पातु कर्णौ पातु महेश्वरः ॥१४॥

नासिकां मे महादेव ओष्ठौ पातु वृषध्वजः ।
जिह्वां मे दक्षिणामूर्तिर्दन्तान्मे गिरिशोऽवतु ॥१५॥

मृत्युञ्जयो मुखं पातु कण्ठं मे नागभूषणः ।
पिनाकी मत्करौ पातु त्रिशूली हृदयं मम ॥१६॥

पञ्चवक्त्रः स्तनौ पातु उदरं जगदीश्वरः ।
नाभिं पातु विरूपाक्षः पार्श्वे मे पार्वतीपतिः ॥१७॥

कटिद्वयं गिरिशो मे मेढ्रं मे प्रमथाधिपः ।
गुह्यं महेश्वरः पातु ममोरू पातु भैरवः ॥१८॥

जानुनी मे जगद्धर्ता जङ्घे मे जगदन्तकः ।
पादौ मे सततं पातु लोकवन्द्यः सदाशिवः ॥१९॥

गिरीशः पातु मे भार्यां शिवः पातु सुतान्मम ।
मृत्युञ्जयो ममायुष्यं वित्तं मे गणनायकः ॥२०॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सर्वाङ्गं मे सदा पातु कालकालमतः शिवः ।
एतत्ते कवचं पुण्यं देवतानां च दुर्लभम् ।।२१।।

मृतसञ्जीवनं नाम्ना महादेवेन कीर्तितम् ।
सहस्रावर्तनं चास्य पुरश्चरणमीरितम् ।।२२।।

यः पठेच्छृणुयान्नित्यं श्रावयेत्सुसमाहितः ।
स कालमृत्युं निर्जित्य समायुष्यं समश्नुते ।।२३।।

हस्तेन वा पदा स्पृष्ट्वा मृतान् संजीवयत्यसौ ।
आधयो व्याधयस्तस्य न भवेच्च कदाचन ।।२४।।

कालमृत्युमपि प्राप्तमसौ जयति सर्वदा ।
अणिमादिगुणैश्वर्यं लभते मानवोत्तमः ।।२५।।

युद्धारम्भे पठित्वेदं अष्टाविंशतिवारकम् ।
युद्धमध्ये स्थितं शत्रुं सद्यः सर्वं न पश्यति ।।२६।।

न ब्रह्मादीनां चास्त्राणि क्षयं कुर्वन्ति तस्य वै ।
विजयं लभते देव युद्धमध्येऽपि सर्वदा ।।२७।।

प्रातरुत्थाय सततं यः पठेत्कवचं शुभम् ।
अक्षयं लभते सौख्यं इहलोके परत्र च ।।२८।।

सर्वव्याधिविनिर्मुक्तः सर्वरोगविवर्जितः ।
अजरामरणो भूत्वा सदा षोडशवार्षिकः ।।२९।।

विचरत्यखिलान् लोकान् प्राप्य भोगांश्च दुर्लभान् ।
तस्मादिदं महागोप्यं कवचं समुदाहृतम् ।।३०।।

मृतसञ्जीवनं नाम दैवतैरपि दुर्लभम् ।।३१।।

।। इति श्रीवसिष्ठविरचितं मृतसञ्जीवनीकल्पे षष्ठः कल्पः ।।
सं १९६५ मि. माघ कृ. ३ ।। दः जगन्नाथ

1326/406 **MṚTYUÑJAYAPĀṬHAḤ**

मृत्युञ्जयपाठः

Foll. 4; 21×10.5 cms.; paper; lines per page 6; letters per line 24; Devanagarī script; Sanskrit; 20th c.; very well written.

Ends : इति मृत्युञ्जयसहस्राक्षरमालामन्त्रः संपूर्णः ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1242/322 MṚTYUÑJAYASAHASRĀKṢARAMĀLĀMANTRA-STOTRAM

मृत्युञ्जयसहस्राक्षरमालामन्त्रस्तोत्रम्

Foll. 9; 13.5×9 cms.; paper; lines per page 4; letters per line 16; Devanāgarī script; Sanskrit; 19th c.

Begins : ।। श्रीसांबशिवाय नमः ।। ॐ नमो भगवते सदाशिवाय सकल-तत्वात्मकाय सर्वमन्त्रस्वरूपाय सर्वतन्त्राधिष्ठिताय सर्वतन्त्र-स्वरूपाय सर्वतन्त्रविदुराय* ब्रह्मरुद्रावतारिणे नीलकण्ठाय पार्वतीमनोहरप्रियाय सोमसूर्याग्निलोचनाय भस्मोद्धूलितविग्रहाय महामणिमुकुटधारणाय माणिक्यभूषणाय ११० सृष्टिस्थिति-प्रलयकालरौद्रावताराय दक्षाध्वरध्वंसकाय महाकालभेदनाय मूलाधारैकनिलयाय तत्वातीताय गंगाधराय सर्वदेवाधिदेवाय षडाश्रयाय वेदान्तसाराय त्रिवर्गसाधनायानेककोटिब्रह्माण्ड-जनकायानन्तवासुकीतक्षककर्कोटकशङ्खकुलिकपद्ममहापद्मेत्यष्ट महानागकुलभूषणाय २३२ प्रणवस्वरूपाय चिदाकाशायाकाश-दिक्स्वरूपाय ग्रहनक्षत्रमालिने सकलाय कलङ्करहिताय सकल-लोकैककर्त्रे सकललोकैकसंहर्त्रे सकललोकैकगुरवे सकललोकैक-साक्षिणे सकलनिगमगुह्याय सकलवेदान्तपारगाय सकललोकैक-वरप्रदाय सकललोकैकशंकराय शशांकशेखराय शाश्वतनिजावा-साय निराभासाय निरामयाय निर्मलाय निर्लोभाय निर्मदाय निश्चिताय निरहंकाराय निराकुलाय निष्कलंकाय निर्गुणाय निष्कामाय निरुपप्लवाय निरवद्याय ४२१ निष्कारणाय नरांत-काय निष्प्रपंचाय निस्संगाय निर्द्वंद्वाय निराधाराय नीरागाय निष्क्रोधाय निर्ममाय निष्पापाय निर्भयाय निर्विकल्पाय निर्भेदाय निष्क्रियाय निस्तुलाय निस्संशयाय निरंजनाय निरुपमविभवाय नित्यशुद्धबुद्धपरिपूर्णसच्चिदानंदाय परमशान्तस्वरूपाय तेजो-रूपाय तेजोमयाय जय जय रुद्र महारौद्र भद्रावतार महाभैरव कालभैरव कल्पान्तभैरव कपालमालाधर खट्वांगखङ्गचर्मपाशां-कुशडमरुशूलचापबाणगदाशक्तिभिदिपालमालातोमरमुसल-मुद्गरप्रासपरिघभुशुंडीशतघ्नीचक्रायुधभीषण करसहस्र मुख-दष्ट्राकरालवदन ६५६ विकटाट्टहास विस्फारितसकलब्रह्माण्ड-मण्डलनागेन्द्रकुण्डलनागेन्द्रहार नागेद्रवलय नागेन्द्रचर्मधर मृत्युंजय त्र्यंबक त्रिपुरान्तक विश्वरूप विरूपाक्ष विश्वेश्वर वृषभवाहन

* 'ज्ञाता तु विदुरो' इत्यमरः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विश्वतोमुख सर्वतो रक्ष रक्ष मां ज्वल ज्वल महामृत्युञ्जय मृत्युभयं नाशय नाशय चौरभयमुत्सादयोत्सादय विषसर्पभयं शमय शमय चौरान्मारय मारय मम शत्रून् उच्चाटयोच्चाटय ८०१ त्रिशूलेन विदारय कुठारेण भिंधि भिंधि खड्गेन छिंधि छिंधि खट्वाङ्गेन विपोथय विपोथय मुसलेन निष्पेषय निष्पेषय बाणैः सन्ताडय सन्ताडय रक्षांसि भीषय भीषयाशेषभूतानि विद्रावय विद्रावय कूष्मांडवेतालमारीब्रह्मराक्षसगणान् संत्रासय संत्रासय ९०७ ममाभयं कुरु कुरु वित्रस्तं माम् आश्वासय आश्वासय नरकभयान्मामुद्धरोद्धर संजीवय संजीवय क्षुत्तृड्भ्यां मां आप्यायय आप्यायय दुःखातुरं मामानंदयानंदय शिवकवचेन मामाच्छादयाच्छादय मृत्युञ्जय त्र्यम्बक नमस्ते नमस्ते ॐ ॥१०००॥

इति मृत्युञ्जयसहस्राक्षरमालामन्त्रः संपूर्णः श्री रामार्पणमस्तु ॥

976/55 MṚTYUÑJAYA STOTRAM
मृत्युञ्जयस्तोत्रम्

From—Skandapurāṇa

Foll. 3; 10×13.3 cms.; paper; lines per page 7; letters per line 13; Devanāgarī script; Sanskrit; 20th c ; scribe-Gaṇeśa s/o Māngīrāma.

1039/118 YAMUNĀSTUTIḤ
यमुनास्तुतिः

Foll. 6; 15.7×10 cms.; paper; lines per page 6; letters per line 16; Devanāgarī script; Sanskrit; 1932 V. S.; scribe-Udayalāla Purohit.

1320/400 (8) YOGANIDRĀKVACHAM & ŚRĪKṚṢṆA STOTRAM
योगनिद्राकवचं श्रीकृष्णस्तोत्रं च

From—Brahmavaivarttapurāṇa-(Śrī Kṛṣṇajanma khaṇḍa)

Foll. 1 to 21; 15×12.3 cms.; paper; lines per page 6; letters per line 9; Devanāgarī script; Sanskrit; 19th c.; bold letters; bound; old.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1186/265

YOGINĪSTOTRAM
योगिनीस्तोत्रम्

Foll. 2; 14.5×9.5 cms.; paper; lines per page 7; letters per line 20;Devanāgarī script; Sanskrit; 19th c.; presented by Gaṇeśa Brāhmaṇa, Lekhaka.

Incorrectly written. The correct reading is given below from 'Grahśāntipaddhati by Hanumāna Śarmā of Chomū (p p. 84-85) 1951 A. D.

Begins :—दिव्ययोगा महायोगा सिद्धियोगा गणेश्वरी[1] ।
प्रेताक्षी डाकिनी काली कालरात्रिर्निशाचरी ॥१॥

हुंकारी[2] सिद्धवैताली खर्परी भूतयामिनी[3] ।
ऊर्ध्वकेशी विरूपाक्षी शुष्काङ्गी[4] मांसभोजिनी[5] ॥२॥

फेत्कारी वीरभद्राक्षी धूम्राक्षी[6] कलहप्रिया ।
रक्ता च घोररक्ताक्षी[7] विरुपाक्षी भयंकरी ॥३॥

चौरिका मारिका चण्डी[8] वाराही मुण्डधारिणी ।
भैरवी चक्रिणी[9] क्रोधा दुर्मुखी प्रेतवाहिनी ॥४॥

कंटकी दीर्घलम्बोष्ठी मालिनी मंत्रयोगिनी ।
कालाग्निमोहिनी चक्री कंकाली भुवनेश्वरी ॥५॥

कुण्डलाक्षी लुही[10] लक्ष्मी यमदूती करालिनी ।
कौशिकी भक्षिणी यक्षी कौमारी यन्त्रवाहिनी ॥६॥

विशाला कामुकी व्याघ्री यक्षिणी प्रेतभूषणी[11] ।
धूर्जटा विकटा घोरा कपाला चैव लांगली[12] ॥७॥

चतुः षष्टिः समाख्याता योगिन्यो हि वरप्रदाः ।
त्रैलोक्ये पूजिता नित्यं देवमानवयोगिभिः ॥८॥

---

1. ms. युगीश्वरी 2. ms. ह्रीङ्कारा 3. ms. क्लीङ्कारी भूतडामरी 4. ms. शुकाङ्गी 5. ms. नरभोजिनी 6. ms. धर्माक्षी 7. ms. राक्षसी घोर रक्ताक्षी 8. ms. वैरी कौमारिकी चण्डी 9. ms. वज्राणी 10. ms. कुण्डला वालुकी लक्ष्मी 11. ms प्रेत-भुक्षिणी 12. ms. कपाली विपुलाङ्गली

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

The following extra verses also appear in the ms :—

चतुर्दश्यां तथाऽष्टम्यां सङ्क्रान्तौ नवमीषु च ।
यः पठेत् पुरुषौ (प्रयतो) भूत्वा तस्य विघ्नः प्रणश्यति ।।६।।

राजद्वारे तथा घोरे संग्रामे रिपुसंकटे ।
अग्निचौरनिपातेषु सर्वग्रहविनाशिनी ।।१०।।

य इमाम् जपते नित्यं शरीरे भयमागते ।
स्मृत्वा नारायणीं देवीं सर्वोपद्रवनाशिनीं ।।११।।

इति श्रीचतुष्षष्टियोगिनीस्तोत्रं सम्पूर्णम् ।।

1225/305 (3) RAKĀRĀDIRĀMASAHASRANĀMA

रकारादिरामसहस्रनाम

From—Brahmayāmala

Foll. 7 to 33; 17×8.7 cms.; paper; lines per page 6; letters per line 26; Devanāgarī script; Sanskrit; 19th c.; loose bound; scribe-Viṇṣumitra.

1238/318 (2) RAKĀRĀDIRĀMASAHASRANĀMA

रकारादिरामसहस्रनाम

From—Brahmayāmala.

Foll. 1 to 54; 13×7.5 cms.; paper; lines per page 7; letters per line 19; Devanāgarī script; Sanskrit; 19th c.; bound. scribe-Jayarāmadāsa Vaiṣṇava at Lakśmaṇapurī (Lucknow) on the bank of Gomati river in the place of Svāmi Manasārāma.

1363/443 RAJASVALĀ STOTRAM

रजस्वलास्तोत्रम्

From—Rudrayāmala

Foll. 6; 18.5×10 3 cms.; paper; lines per page 5; letters per line 19; Devanāgarī script; Sanskrit; 1958 V. S. (1902 A.D.) Chaitra kṛṣṇā 8, Tuesday.

Begins :— ।।श्रीगणेशाय नमः ।।
ॐ अस्य श्री रजस्वलास्तोत्रमन्त्रस्य ईश्वरऋषिः अनुष्टुप् छन्दः रजस्वलादेवता ह्रस्क्लीं बीजं, ह्रस्क्लौं शक्तिः, ह्रस्क्लेः कीलकं ममाभीष्टसिद्ध्यर्थे जपे विनियोगः । ईश्वरऋषये नमः शिरसि,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अनुष्टुप् छन्दसे नमः मुखे, रजस्वलादेवतायै नमः हृदये, ह्स्क्लीं बीजाय नमः गुह्ये, ह्स्क्लौं शक्तये नमः सर्वाङ्गे, ह्स्क्लेः कीलकाय नमः पादयोः ।। अंगुष्ठादिकहृदयादिन्यासः ।।

ध्यानम् ।।

बालार्ककोटिवर्णाभां बालचन्द्रनिभाननाम् ।
अनंगबाणसहितां ध्यायेद् देविरजस्वलाम् ।।

ॐ भगोद्भवं भगात्सर्वं त्रैलोक्यं सचराचरं
सप्तपाताललोकं च सप्ताकाशं भगोद्भवम् ।।१।।

कमलं च भगाकारं विरंचिकमलोद्भवम् ।
भगवान् भगरूपी च नौम्यहं भगदैवतम् ।।२।।

चतुरशीतिलक्षाणि जीवयोनिसमुद्भवां ।
तस्माद्भगं महायोनिं सृष्टिस्थितिलयात्मिकां ।।३।।

भगलिंगात्मकं रूपं दृश्यते सचराचरम् ।
निन्दया नरकं यान्ति कल्पकोटि न संशयः ।।४।।

यदा भाग्यवशाद् दृष्ट्वा पुष्पीभूतं भगं शिवे ।
दर्शनात्फलमाप्नोति शृणुष्वैकमना प्रिये ।।५।।

गजाश्वरथदानानि ग्रहणे दत्तजं फलम् ।
रुक्मस्वर्णतुलादानं कल्पकोटिगुणं फलम् ।।६।।

भगलिंगार्चनं कृत्वा एकान्ते निश्चलवृते ।
स्वर्गपातालभूमिं च पूजनात्फलमश्नुते ।।७।।

भगं दृष्टवा जपं कुर्यात् स्वल्पमात्रं च कोटिधा ।
पूजयित्वा वन्दयित्वा भावयित्वा नमन्ति च ।।८।।

ते धन्याः सर्वलोकेषु पुण्यपारं न लभ्यते ।
तरन्ति तारयन्ति च निर्भया यत्र कुत्रचित् ।।९।।

रूपयौवनलावण्यां षोडशाब्दातिसुन्दरीम् ।
रजोयुक्तं भगं दृष्ट्वा नमस्कृत्वा च दण्डवत् ।।१०।।

ते सद्यः पूजयित्वा च ध्यात्वा नत्वा पुनः पुनः ।
तरन्ति तारयन्तीह नौकेव नरकार्णवात् ।।११।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एककालं द्विकालं वा त्रिकालं मध्यरात्रिकम् ।
एकान्ते निश्चले स्थाने पूजयित्वा जपन्ति च ।।१२।।

अनेककोटिविघ्नानां नाशयेन्नात्र संशय: ।
अनन्तफलमाप्नोति मम वाक्यं च पार्वति ।।१३।।

गुरुदेवतात्मना नैकं भावयित्वा जपन्ति च ।
तदा समग्रफलदं अन्यथा न च सिद्धयति ।।१४।।

सप्तकोटिमहामन्त्राः सवर्णाः सगुणान्विताः ।
सर्वे प्रसन्नतां यान्ति क्रोधद्रोहादिकं त्यजेत् ।।१५।।

रजस्वलामहास्तोत्रं यः पठेत् प्रत्यहं सदा ।
जपहोमार्चनं कृत्वा विधियुक्तं वरानने ।।१६।।

रजस्वला विना स्तोत्रं नैव सिद्धयति भूतले ।
सर्वे शाक्ताः महामन्त्राः शापोत्कीलनका ध्रुवम् ।।१७।।

एतत्परतरं श्रेष्ठं शाक्तानां नास्ति सुन्दरी ।
महाबीजत्रयं देवि आद्यन्ते च रजस्वला ।।१८।।

प्रणवादिजपेन्मन्त्रं त्रिवारं सर्वसिद्धिदम् ।
एषा रजस्वलाविद्या पित्रा पुत्रोपकथ्यते ।।१९।।

दम्भकाय नरघ्नाय गुरुद्रोहरताय च ।
घातकाय च दुष्टाय रजस्वलां न दापयेत् ।।२०।।

दद्यात् शान्ताय शिष्याय तंत्रमंत्रयुताय च ।।२१।।

इति श्रीरुद्रयामले तन्त्रे देवी–ईश्वरसंवादे रजस्वलास्तोत्रं सम्पूर्णम् ।। मिति चैत्र कृष्णा ८ भौमे संमत १९५८ ।। शं ।।
श्रीगुरुपरदेवतायै नमः श्रीमत्त्रिपुरसुन्दर्यै ।।

1227/367 (6) **RĀGA PRABHĀTĪ**

राग प्रभाती

Foll. 37 to 46; 9 × 8.2 cms.; paper; lines per page 8; letters per line 19; Devanāgarī script; Hindi; 19th c.; bound.

1245/325 **RĀJARĀJEŚVARI MANTRA STOTRAM**

राजराजेश्वरिमन्त्रस्तोत्रम्

Foll. 1; 16 × 10.2 cms.; paper; lines per page 7; letters per line 22; Devanāgarī script; Sanskrit; 20th c.; brittle.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Begins :— ।।श्री गणेशाय नमः ।।
अस्य श्रीराजराजेश्वरीमहामन्त्रस्य ग्रानन्दभैरवऋषिः पंवित-
श्च्छन्दः श्रीराजराजेश्वरी देवता । श्रीं बीजं । ह्रीं शक्तिः ।
क्लीं कीलकं । श्रीं ह्रीं क्लीं ऐं सौः ग्रंगुष्ठाभ्यां नमः । ॐ ह्रीं
श्रीं तर्जनीभ्यां० । क ४ मध्यामाभ्यां० । ह ५ ग्रनामिकाभ्यां० ।
स ३ कनिष्ठिकाभ्यां० । सौः ऐं क्लीं ह्रीं श्रीं करतलकर० ।
श्रीं ५ हृदयाय० । ॐ ३ शिरसे० । क ४ शिखायै० । ह ५
कवचाय० । स ३ नेत्रत्रयाय० । सौः ५ ग्रस्त्राय० ।

ध्यानम्
सिद्धिसिद्धवृत्तरत्नभूमिकाकल्पवृक्षवनवाटिसंकुले
नीपवाटि मणिमण्डपेऽरुणे तरुणचण्डशतकोटिभासुरे ।
ग्रादिपञ्चशवमञ्चके परे शङ्कराङ्कमणिपीठिकामणौ
कादि हादि मनुरूपिणीमहं भावयामि परदेवतां शिवाम् ।।१।।
इति ध्यात्वा ।। इति षोड़षी ।।

1172/251 RĀJARĀJEŚVARISTOTRAM
राजराजेश्वरिस्तोत्रम्

Foll. 4; 17×10.5 cms.; paper; lines per page 7; letters per line 21; Devanāgarī script; Sanskrit; 19th c ; presented by Gopāla Brāhmaṇa; ff. 1 and 2 are missing.

1318/398 RĀTRISŪKTAM
रात्रिसूक्तम्

Foll. 7; 17×10.7 cms.; paper; lines per page 4; letters per line 14; Devanāgarī script; Sanskrit; 20th c.; folio no. 8 is blank; very well written; may be displayed.

991/70 RĀDHĀKṚPĀ-KATĀKṢA-STOTRAM
राधाकृपाकटाक्षस्तोत्रम्

From—Ūrdhvāmnāya-tantra (a dialogue between Śiva and Gaurī).

Foll. 6; 14×9.5 cms.; paper; lines per page 6; letters per line 14; Devanāgarī script; Sanskrit; 20th c.; scribe—Gaṇeśa Brāhmaṇa.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1260/340 (2) RĀMAKAVACHAM

रामकवचम्

Author—Viśvāmitraḥ

Foll. 9 to 17; 14×10.3 cms.; paper; lines per page 6; letters per line 16; Devanāgarī script; Sanskrit; 19th c.; bound.

1225/305 (2) RĀMAKAVACHAM

रामकवचम्

Otherwise known as Trailokyamohana—Kavacham त्रैलोक्यमोहनकवचम्

From—Brahmayāmala

Foll. 1 to 6; 17×8.7 cms.; paper; lines per page 6; letters per line 26; Devanāgarī script; Sanskrit; 19th c.; loose bound.

1217/297 RĀMACHANDRASTAVARĀJAḤ

रामचन्द्रस्तवराजः

From—Sanatkumāra-samihtā

Foll. 26;17×10 cms.; paper; lines per page 4/5; letters per line 18; Devanāgarī script; Sanskrit; 19th c.; bound; same as Rāmastavarāja.

A painting of Rāma with Sitā, three brothers and Hanumāna in the beginning (Jaipur school). First two pages decorated with borders; others with simple red and blue line borders.

1222/302 (2) RĀMACHANDRASTAVARĀJAḤ

रामचन्द्रस्तवराजः

From—Sanatkumāra-samhitā

Foll. 35 (b) to 56 (a); 13×9 cms.; paper; lines per page 7; letters per line 12; Devanāgarī script; Sanskrit; 19th c.; loose bound.

1225/305 (1) RĀMACHANDRASTAVARĀJAḤ

रामचन्द्रस्तवराजः

From—Sanatkumāra-samhitā

Foll. 1 to 7; 17×8.7 cms.; paper; lines per page 6; letters per line 26; Devanāgarī script; Sanskrit; 19th c.; loose bound.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1246/326 RĀMACHANDRASTAVARĀJAḤ

रामचन्द्रस्तवराजः

From. Sanatkumāra–samhitā

Foll. 24; 13.3 × 10.3 cms.; paper; lines per page 7; letters per line 14; Devanāgarī script; Sanskrit; 19th c.; loose bound.

1287/367 RĀMACHANDRASTAVARĀJAḤ and RĀMARAKṢĀ STOTRA BY RĀMĀNANDA

रामचन्द्रस्तवराजः रामानन्दकृतं रामरक्षास्तोत्रं च

Foll. 21; 16 × 10.5 cms.; paper; lines per page 6; letters per line 12/13; Devanāgarī script; Sanskrit; 19th c.

1118/197 RĀMANĀTHA-PRABHĀTĪ STOTRAM

रामनाथ प्रभाती स्तोत्रम्

Foll. 5; 10.5 × 7 cms.; paper; lines per page 5; letters per line 12; Devanāgarī script; Sanskrit; 19th c.; presented by Gaṇeśa Brāhmaṇa; mostly incorrect.

1124/203(1)-(2) RĀMANĀTHA-PRABHATĪ STOTRAM

रामनाथ प्रभाती स्तोत्रम्

Foll. 5 to 7; 10.5 × 8 cms.; paper; lines per page 7; letters per line 13; Devanāgarī script; Sanskrit; 19th c.; presented by Gaṇeśa Brāhmaṇa.

Begins :—

रामनाथमहं वंदे रुद्रनारायणात्मकौ ।
ज्ञानैकसाध्यं परमं वीनवृषभवाहनौ ॥१॥

सेतोर्मध्ये पर्वताग्रे पवित्रे गौर्या साकं भ्राजमानं महेशम् ।
ज्योतीरूपं चन्द्रसूर्याग्निनेत्रं वन्दे देवं रामनाथं त्रिवारम् ॥२॥

रामनाथेति शब्दो यस्त्रिः पठेत् प्रातरुत्थितः ।
तस्य पूर्वदिनोत्पन्नं पातकं नश्यति क्षणात् ॥३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

।। श्री रामनाथाय नमः ।।

प्रातः स्मरामि करुणाकररामनाथं
सर्वार्थसिद्धिफलदं भवरोगवैद्यम् ।।
श्रीसेतुवाससुखदं फणिराजरत्न–
श्रेणिप्रभारजतशोभितकालकण्ठम् ।।१।।

प्रातः स्मरामि गिरिराजसुतासमेतं
श्रीगन्धमादनगिरीन्द्रनिवासशीलम् ।।
सुग्रीवसख्यरघुनाथवरप्रदानं
श्रीसेतुमध्यनिलयं रघुवीरनाथम् ।।२।।

प्रातः स्मरामि रघुनाथपदारविन्दं
सद्यः सुवर्णकमलार्चितपादपद्मम् ।।
शार्दूलदिव्यवसनं सुरवृन्दसेव्यं
सर्वेश्वरं सकलपापविनाशदक्षम् ।।३।।

प्रातः स्मरामि जनसौख्यदरामलिङ्गं
गङ्गाजलार्द्रमुकुटं शशिचन्द्रचूडम् ।।
प्रद्युम्नदर्पहरणं रजताद्रिवासं
देवीनिरन्तरविराजितदक्षभागम् ।।४।।

प्रातर्भजामि गिरिजापतिराघवेशं
भक्तार्तिभञ्जनपरं रघुनाथवन्द्यम् ।।
योगीन्द्रहृत्कमलमध्यसदानिवासं
दिक्पालवन्दितपदं धवलाङ्गरागम् ।।५।।

यः स्तोत्रपञ्चकमिदं पठते प्रबुध्य
भक्त्या प्रभातसमये जगदीश्वरस्य ।।
श्रीरामनाथवरदासजनेषु मुख्यो
भुक्त्वा स याति शिवलोकमनन्यलभ्यम् ।।६।।

इति श्री रामनाथप्रभातिपञ्चकस्तोत्रं सम्पूर्णम् ।।

203 (1) It is preceded by Durgāśatanama stotram from Mārkaṇḍeyapurāṇa from f. 1 to 5. Other particulars are as above.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1238/318 (3) RĀMAPADDHATIḤ

रामपद्धतिः

Author—Rāmānujācharya according to the Vedas.

Foll. 1 to 54; 13×7.5 cms ; paper; lines per page 7; letters per line 19; Devanāgarī script; Sanskrit; 19th c.; bound.

1210/290 RĀMARAKṢĀSTOTRAM

रामरक्षास्तोत्रम्

Author—Budha-Kauśikaḥ (Viśvāmitraḥ)

Foll. 40 (pages); 11.5×6.8 cms.; paper; lines per page 4; letters per line 11; Devanāgarī script; Sanskrit; 19th c.; bound.

1227/307 (1) RĀMARAKṢĀSTOTRA

रामरक्षास्तोत्र

Author—Rāmānanda

Foll. 1 to 5; 9×8.2 cms ; paper; lines per page 8; letters per line 19; Devanāgarī script; Hindi; bound.

1237/317 (3) RĀMARAKṢĀSTOTRAM

रामरक्षास्तोत्रम्

Author—Viśvāmitraḥ

Foll. 43 to 51; 19×13 cms.; paper; lines per page 7; letters per line 12; Devanāgarī script; Sanskrit; 19th c.; bound.

1237/317 (4) RĀMARAKṢĀSTOTRAM

रामरक्षास्तोत्रम्

Author—Rāmānanda

Foll. 51 to 56; 19×13 cms.; paper; lines per page 7; letters per line 12; Devanāgarī script; Hindi; 19th c.; bound.

1238/318 (6) RĀMARAKṢĀSTOTRAM

रामरक्षास्तोत्रम्

Author—Rāmānanda

Foll. 1 to 8; 13×7.5 cms ; paper; lines per page 7; letters per line 19; Devanāgarī script; Sanskrit; 20th c.; bound; scribe Jairāma dāsa at Lakṣmaṇapurī (Lucknow) in the Āsana (place) of Manasārāma Svāmi.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

It is followed by 2 ff. containing dhyāna and aṅganyāsa of Viṣṇupañjara stotra at no 318 (5).

1218/328

RĀMARAKṢĀ STOTRAM
रामरक्षास्तोत्रम्

Author – Rāmānandasvami

Foll 5; 12.5 × 8 cms.; paper; lines per page 8; letters per line 15; Devanāgarī script; Sanskrit-Hindi; 19th c.; old.

1260/340 (1)

RĀMARAKŚĀSTOTRA
रामरक्षास्तोत्र

Author – Rāmānanda

Foll. 1 to 9; 14 × 10.3 cms ; paper; lines per page 6; letters per line 16; Devanāgarī script; Hindi; 19th c.; bound.

1103/182

RĀMASTOTRAM
रामस्तोत्रम् (रामचन्द्रस्तोत्रम्)

From. 4; 10 × 8 cms.; paper; lines per page 5; letters per line 9; Devaāgarī script; Sanskrit; 19th c.

Begins :— ।। श्रीगणेशाय नमः ।।

प्रातः स्मरामिरघुनाथमुखारविन्दं
मन्दस्मितं मृदुलभाषि विशालभालम् ।
कर्णावलम्बिचलकुण्डलशोभिगण्डं
कर्णान्तदीर्घनयनं नयनाभिरामम् ।।१।।

प्रातर्नमामि रघुनाथपदारविन्दं
पद्माङ्कुशादिशुभलेखि शुभावहं मे ।
योगीन्द्रमानसमधुव्रतसेव्यमानं
शापापहं सपदि गोतमधर्मपत्न्याः ।।२।।

प्रातर्भजामि रघुनाथकरारविन्दं
रक्षोगणाय भयदं वरदं जिनेभ्यः* ।
यद्राजसंसदि विभज्य महेशचापं
सीताकरग्रहणमङ्गलमाप सद्यः ।।३।।

---

*जिनेभ्यः जित्वरेभ्यः = देवेभ्यः–(वाचस्पत्यं) p. 3120

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रातः श्रये श्रुतिनुतां रघुनाथमूर्ति
नीलाम्बुजोत्पलसितेतररत्ननीलम् ।
आमुक्तमौक्तिकविशेषविभूषणाढ्यां
ध्येयां समस्तमुनिभिर्निजमृत्युहृत्यै ।।४।।

प्रातर्वदामि वचसा रघुनाथनाम
वाग्दोषहारि सकलं समलं निहन्ति ।
यत्पार्वती स्वपतिना सहभोक्तुकामा
प्रीत्या सहस्रहरिनाम समं जजाप ।।५।।

यः श्लोकपञ्चकमिदं मनुजः पठेत
नित्यं प्रभातसमये नियतः प्रबुद्धच ।
श्रीरामकिंकरजनेषु स एव मुख्यो
भूत्वा प्रयाति हरिलोकमनन्यलभ्यम् ।।६।।

।। इति श्रीरामचन्द्रस्तोत्रं सम्पूर्णम्

1206/285 (I) RĀMASTAVARĀJAḤ

रामस्तवराजः

From—Sanatkumārasamhitā

Foll. 1 to 16; 10×7.5 cms.; paper; lines per page 7; letters per line 15; Devanāgarī script; Sanskrit; 1906 V. S. (1849 A. D.); bound; scribe—Rāmānanda at Baḍīmahāra.

1216/296 (I) RĀMASTAVARĀJAḤ

रामस्तवराजः

Author – Nārada in Sanatkumāra samhitā

Foll. 1 to 36; 10.5×8 cms.; paper; lines pes page 6; letters per line 10/11; Devanāgarī script; Sanskrit; 1913 V.S. (1856 A.D.), Bhādrapada kṛṣṇā 12; bound; scribe-Rāmasahāya.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1042/121

RĀMASTUTIḤ

रामस्तुतिः

From—Adhyātma-Rāmāyaṇa

(Araṇya kāṇḍa, VIII Sarga)

Foll. 3; 20.5×9 cms.; paper; lines per page 6; letters per line 32; Devanāgarī script; Sanskrit; 20th c.

It is a prayer offered by Jaṭāyu to Śrī Rāma.

1136/215

RĀMASTOTRAM

रामस्तोत्रम्

Author—Maheśvarāchāryaḥ

Foll. 4; 13.8×7.5 cms.; paper; lines per page 4; letters per line 16; Devanāgarī script; Sanskrit; 19th c.; presented by Gaṇeśa Brāhmaṇa.

Begins :— ।। श्रीगणेशाय नम. ।।

[सीतापते] दशरथात्मज देव देव
राजीवलोचन विभो जगदेकनाथ ।।
सत्यस्वरूप रघुनन्दन दिव्यमूर्ते
मा देहि राम जननीजठरे निवासः ।।१।।

इन्दीवरामितरुचे रविवंशदीप्त
ब्रह्माण्डकोटिरचिताखिलरोमकूप ।।
भक्तावनाय धृतमानुषदिव्यदेह
मा देहि राम जननीजठरे निवासः ।।२।।

श्रीलक्ष्मणाग्रज सुरासुरवन्दिताङ्घ्रे
भक्ताभिलाषपरिपूरणसावधान ।।
श्रीगाधिनन्दनशरावणनाड़कारिन्
मा देहि राम जननीजठरे निवासः ।।३।।

शाखामृगेशपरिपालक वीररत्न
सुग्रीवराज्यद विभीषणदत्तराज्य ।।
स्थाणुस्थिरेतरशरीर समस्तजीव
मा देहि रामजननीजठरे निवासः ।।४।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कोदण्डभङ्गदलिताखिलभूपसार
कोदण्डभङ्गपरिमर्दितजामदग्न्य ।।
पाथोधिबद्धगिरिवृन्दमनन्यसेतो
मा देहि राम जननीजठरे निवासः ।।५।।

धृष्टस्य नाम तरुणोस्थितचारुकेश
ब्रह्मादिदेवपरिगीत यशोवितान ।।
भक्तावनामरमहीरुह हे दयालो
मा देहि राम जननीजठरे निवासः ।।६।।

हे जानकीहृदयजीवन सुन्दराङ्ग
वीराधिवीर रघुवंश रणाधिधीर ।।
उत्फुल्लपङ्कजसमानविकासिवक्त्र
मा देहि राम जननीजठरे निवासः ।।७।।

संसारदावशमनाम्बुद दीननाथ
विश्वेश विश्वमहनीयचरित्रचारो ।।
श्रीगोतमप्रियतमार्पितदिव्यमूर्ते
मा देहि राम जननीजठरे निवासः ।।८।।

लङ्काभिदाहक सुरारिमुदापहारिन्
शंवोदनादि सुरवृन्दविमोक्षकारिन् ।।
शान्तस्वाभावजनजीवनतोऽन्यदृष्टे
मा देहि राम जननीजठरे निवासः ।।९।।

रामस्य पृष्ट (पद्य)दशकं रचितं द्विजेन
संसारदुःखकदनं तु महेश्वरेण ।।
प्रातः पठेदनुदिनं मनुजः सदा यः
संसारसौख्यमनलं (मतुलं) लभतेऽथ मुक्तिम् ।।१०।।

इति महेश्वराचार्यविरचितं रामस्तोत्रं सम्पूर्णम् ।।

1238/318 (9) RĀMĀNUJAŚIṢYĀVALI

रामानुजशिष्यावली

Foll. 1 to 9; 13×7.5 cms.; paper; lines per page 7; letters per line 19; Devanāgarī script; Sanskrit; 19th c.; bound. From Brahman to Jayarāmadāsa, the scribe.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Begins :— ।। ॐ श्रीमते रामानुजाय नमः ।।

ॐ प्रथमं ब्रह्म–मूलप्रकृति–ॐकारबीज–महातल–आदिमूल–नारायण–महालक्ष्मी–इच्छास्वरूप–विष्वक्सेन–उज्जासमुनि–ज्योतिमुनि–लोकमुनि–प्रकटमुनि–गम्भीरमुनि–दीर्घमुनि–अचलमुनि–कटमुनि–कृपामुनि–गोपालमुनि–वैरागमुनि–त्यागमुनि–योगमुनि–रहस्यमुनि–धैर्य्यमुनि संतोषमुनि–दयामुनि–तुलसीमुनि–वृषभमुनि–चन्द्रमुनि–फेहुमुनि–श्रौतमुनि–महामुनि–यमुनामुनि–हरिनाथ–पुण्डरीकाक्ष–परंकुसा–परलोकमुनि–देवपुष्यमुनि–रामेश्वर–महापूर्ण–विद्याधर–अस्तुतमुनि–जिज्ञासमुनि–रामानुज–सुरतप्रकाश–श्रुतपिया–दयाश्रुत–श्रुतदेव–मंगलमुनि–पातालमुनि–शठगोपाल–पद्मलोचन–पद्माचार्य–देवाचार्य–शुकाचार्य–वंशीधराचार्य कृपाचार्य–विमिश्राचार्य–लालाचार्य–पुरुषोत्तमाचार्य–गंगाधराचार्य–दयाचार्य–रामेश्वराचार्य–द्वारानन्द–देवानन्द–आनन्दाचार्य–श्रुतानन्द–अच्युतानन्द–सच्चिदानन्द–पूरणानन्द–दयानन्द–श्रियानन्द–हरियानन्द–राघवानन्द–रामानन्द–अनन्तानन्द–किसुनदासजी फौहारी–अग्रदासजी–गोविन्ददासजी–जलियदासजो–रामदासजी–सावलदासजी–दयालदासजी–षेमदासजी–श्रवणदासजी–शिवरामदासजी–ध्यानदासजी–टीकमदासजी–श्रीमनसारामजी–श्रीवरजदासजी–जैरामदासजी–लायकरामदास–स्वामी

1364/444

RĀMĀRĀJASTOTRAM
रामाराजस्तोत्रम्

Foll. 5; 18.8×10.3 cms.;paper; lines per page 3; letters per line 14; Devanāgarī script; Sanskrit; 1958 V S. (1901 A.D.) Chaitra kṛṣṇa 10, Thursday; scribe—Kanhaiyā lāla Praśnvara.

Begins :— ।। श्रीपरांबायै नमः ।। ॐ आं ह्रीं क्रों एहि परमेश्वरि स्वाहा ।।

अश्वारूढे रक्तवर्णे स्मितसौम्यमुखांबुजे ।
राज्यस्त्री(श्रि) सर्वजन्तूनां वशीकरणकामदे ।।

वशीकरणकार्यार्थं पुरा देवेन निर्मितम् ।
तस्मादवश्यं वाराहि सर्वान्मेवशमानय ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यथा राजा महाग्रामान् वस्त्रधान्यमहावसून् ।
अन्तर्बहिश्च मनसि व्यापारेषु सभासु च ।।

तथा सर्वेषु मामेव स्मरंति च वशं कुरु ।
चामरां दोलिकां छत्रं राज्यचिह्नानि इच्छया ।।

अभीष्टसंपदो राज्यं तथा देवि वशं कुरु ।
मन्मथस्मरणाद्दारा यांतु रंतुं मया सह ।।

स्त्रीरत्नेषु महत्प्रेम तथा जनय काम्यया ।।
मृगपश्वादयः सर्वे मां दृष्ट्वा प्रेमवर्द्धिताः ।।

अनुगच्छन्ति मामेव त्वत्प्रसादात्तथा कुरु ।
वशीकरणबाणास्त्रं यत्र यत्र प्रपूज्यते ।।

संमोहनास्त्रं वर्द्धतां त्वत्कार्यं तत्प्रदर्शय ।
तमस्थितिं च वात्येव वश्यं कार्यं प्रदृश्यते ।।

वश्यं स्तोत्रमिदं देव्यास्त्रिसंध्यं यः पठेन्नरः ।
सोऽभीष्टं वशयेत्सर्वं रामाराज्यमथापि वा ।।

हास्वा रिश्वमेरप हिं ऐं क्रों ह्रीं आं ॐ ।। इति
मिति चैत्रकृष्णा दशमी गुरौ संवत् १६५८ ।।

लिखितमिदं कन्हैयालालप्रश्नवरेण ।।

1067/146

RĀMĀṢṬAKAM

रामाष्टकम्

Author—Śaṅkarāchāryaḥ

Foll. 3; 15×10.5 cms.; paper; lines per page 7; letters per line 14; Devanāgarī script; Sanskrit; 19th c.; presented by Jhūnthā Lekhaka.

1283/363

RĀMĀṢṬAKAM

रामाष्टकम्

Author—Śaṅkarāchāryaḥ

Foll. 2; 14.5×10.5 cms.; paper; lines per page 8;. letters per line 11; Devanāgarī script; Sanskrit; 19th c.; old.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1085/164 **RUDRĀKṢOPANIṢAT**

रुद्राक्षोपनिषत्

Foll. 4; 14.5×10.5 cms; paper; lines per page 7; letters per line 13/14; Devanāgarī script; Sanskrit; 19th c.; presented by Māṅgirāma Lekhaka.

Begins :— ।। श्रीवरदमूर्तिर्जयति ।। ॐ ।।

अथ कालाग्निरुद्रं भगवन्तं सनत्कुमारः पप्रच्छ । आधीहि भगवँस्त्रिपुण्ड्रविधिं सतत्वं, किं द्रव्यं, किं स्थानं, कतिप्रमाणका रेखाः, किं दैवतं, के मन्त्राः, काः शक्तयः, किं फलमिति ।। तदु होवाच भगवान् । यद् द्रव्यं तदाग्नेयं भस्म, सद्योजातादि-पञ्चब्रह्ममन्त्रैः परिगृह्य अग्नीरिति भस्मेत्यनेन चाभिमन्त्र्य मानस्तोकेति समुद्धृत्य, मा नो महान्तमित्यालेप्य, त्र्यम्बकं यजामह इति शिरोललाटवक्षः स्कन्धेष्विति त्रिभिस्त्र्यायुषैः त्र्यम्बकैस्त्रि-शक्तिभिस्तिर्यक् तिस्रो रेखा प्रकुर्वीत, व्रतमेतच्छाम्भवं सर्ववेदेषु वेदवादिभिरुक्तं, तत्सनत्कुमार प्रमाणमस्य त्रिधा चाललाटादा-चक्षुश्च भ्रुवोर्मध्यमः याऽस्य प्रथमा रेखाऽसौ गार्हपत्यश्चा-कारो रजो भूलोकश्चात्मा, क्रियाशक्तिरृग्वेदः । प्रातः सवनं महेश्वरः । या अस्य द्वितीया रेखा सा दक्षिणाग्निरुकारः ।। सत्वमन्तरिक्षमन्तरात्मा चेच्छाशक्तिर्यजुर्वेदो मध्यंदिनं सदा-शिवः । याऽस्य तृतीया रेखा साऽवनीयो मकारस्तमो द्यौः परमात्मा ज्ञानशक्तिः सामवेदस्तृतीयसवनं शिवो देवतेति त्रिपुण्ड्रं (भ)स्मना करोतीति यो विद्वान् ब्रह्मचारी गृहस्थो वानप्रस्थो यतिर्वा समस्तमहापातकोपपातकेभ्यः पूतो भवति, स सर्वान् देवान् मध्यतो भवति स सर्वैर्वेदैर्ज्ञातो भवति, स सततं रुद्रजापी भवति, देहं त्यक्त्वा शिवसायुज्यतामेति न च पुनरावर्तते न इति ।। अहं भगवान् कालाग्निरुद्र । इति कालाग्निरुद्रोपनिषत् समाप्ता । अथैनं भगवन्तं रुद्रं कुमारः पप्रच्छाऽधीहि भगवन् रुद्राक्षोत्पत्ति-स्तद्धारणं किमिति । स होवाच भगवान् रुद्रः । पुरा त्रिपुरव-धायोन्मीलिताक्षोऽहं तेभ्यो जलबिन्दवो भूमौ पतितास्ते रुद्राक्षाः । तेषां नामोच्चारणेन दशशतसहस्रगोदानफलं भवति । दर्शन-स्पर्शनाभ्यां द्विगुणं फलं भवति ।। तद्धारणेन ब्रह्मगोघ्नः सुरापो गुरुतल्पगश्च पूतो भवति । तेषां दानमाहात्म्यं वक्तुं न शक्यते, इत्याह भगवन् रुद्रः । नमो नु मदन्तु शान्तिः शान्तिः शान्तिः । ॐ ह्रौं क्षौं ॐ जुं ॐ सः ।। इति रुद्राक्षोपनिषत् समाप्ता ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1227/307 (5) **REKHATĀ**

रेखता

Author—Harirāma

Foll. 24-36; 9x8·2 cms.; paper; lines per page 8; letters per line 19; Devanāgarī script; Hindi; 19th c.; bound.

1270/350 **LAKṢMĪPŪJANAM**

लक्ष्मीपूजनम्

Foll. 1; 29·5x20 cms.; paper; 18 lines in all; letters per line 20; Devanāgarī script; Sanskrit; 20th c.; brittle.

1123/202 **LAKṢMĪMANTRA VIDHĀNAM**

लक्ष्मीमन्त्रविधानम्

Foll. 8; 10.5x8.5 cms ; paper; lines per page 5; letters per line 11; Devanāgarī script; Sanskrit; 19th c.

Begins :— ।। श्रीगणेशाय नमः ।।

ॐ अस्य श्रीलक्ष्मीनृसिंहमहामन्त्रस्य निटलाक्ष ऋषिः अनुष्टुप् ज्वालागायत्री छन्दांसि श्रीलक्ष्मीनृसिंहनिटलाक्षो देवता, श्रीं लक्ष्मीधराय बीजं, ह्रीं आपद्बान्धवाय शक्तिः, क्लीं सर्वलोक-वशीकराय कीलकं, मम चतुर्वर्गसाधनार्थे श्रीलक्ष्मीनृसिंहमन्त्रजपे विनियोगः । श्रां शरणागतवज्रपञ्जराय अङ्गुष्ठाभ्यां नमः, श्रीं श्रीधराय तर्जनीभ्यां नमः, श्रूं आश्रितपारिजाताय मध्यमाभ्यां नमः, श्रैं शेषतल्पकाय अनामिकाभ्यां नमः, श्रौं शिववन्दित-चरणारविन्दाय कनिष्ठिकाभ्यां नमः, श्रः श्री श्रीभूसहिताय करतलकरपृष्टाभ्यां नमः । एवं हृदयादिन्यासः । महाबलवज्र-नखचक्रहस्ताय भूर्भुवः स्वरों दशदिग्बन्धः ।।

अथ ध्यानम् ।।

बालर्कद्युतिमिन्दुखण्डविलसत्कोटीरचण्डोज्वलां
रत्नाकल्पविभूषितां कुचनतां शालैः करैर्विभ्रतीम् ।

पद्मे कौस्तुभरत्नमध्यरचितं संविभ्रतीं सुस्मितां
कान्ताम्भोजविलोचनत्रययुतां ध्यायेत् परां देवताम् ।।

मन्त्रः—ऐं ह्रीं श्रीं क्लीं सौं जगत्प्रसूत्यै नमः ।।
अस्य द्वादशलक्षपुरश्चरणं घृतैः सपद्मैबिल्वैश्च प्रत्येकं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ग्रयुतं हूयात् ।

कण्ठमात्रोदके स्थित्वा ध्यात्वा देवीं दिवाकरे ।
ऊर्ध्वबाहुर्दृशन्नर्कं शतमष्टोत्तरं जपेत् ।।

ग्रारोग्यं लभते सद्यो धनमाप्नोति वाञ्छितम् ।
शालिभिर्जुहुयान्नित्यं ग्रष्टोत्तरसहस्रकम् ।।
ग्रचिरादेव महतीं लक्ष्मीं संजायते ध्रुवम् ।।
इति लक्ष्मीमन्त्रविधानं सम्पूर्णम् ।।

1129/208

LAKṢMĪMANTRA VIDHĀNAM
लक्ष्मीमन्त्रविधानम्

Foll. 7; 11·5x8 cms.; paper; lines per page 5; letters per line 11; Devanāgarī script; Sanskrit; 19th c.; presented by Chanda Lalā Lekhaka.

928/7

LAKṢMĪ SŪKTAM
लक्ष्मीसूक्तम्

Foll. 6; 15·5x10 cms.; paper; lines per page 6; letters per line 14; Devanāgarī script; Sanskrit; 1933 V.S. (1876 A.D.); scribe-Rāmapratāpa Purohit.

1140/219

LAKṢMĪ SŪKTAM
लक्ष्मीसूक्तम्

Foll. 10; 14·5x7·5 cms.; paper; lines per page 4; letters per line 13; Devanāgarī script; Sanskrit; 19th c.

1251/331

LAKṢMĪ SŪKTAM OR ŚRĪSŪKTAM
लक्ष्मीसूक्तं श्रीसूक्तं वा

Foll. 6; 15×10·3 cms.; paper; lines per page 6; letters per line 16; Devanāgarī script; Sanskrit; 19th c.; old.

1194/273

LAKṢMĪ STOTRAM
लक्ष्मीस्तोत्रम्

Foll. 6; 21×16·5 cms ; paper; lines per page 7; letters per line 8; Devanāgarī script; Sanskrit; 1933 V.S. (1876 A.D.), presented by Prabhulāla Lekhaka, resident of Alwar.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Begins :—

॥ श्रीमहालक्ष्म्यै नमः ॥

ब्राह्मीं च वैष्णवीं रौद्रीं षड्भुजां च चतुर्भुजाम् ।
त्रिनेत्रीं खड्गिनीं शूलां शङ्खचक्रगदाधराम् ॥१॥

पीताम्बरधरां देवीं नानालङ्कारभूषिताम् ।
तेजःपुञ्जधरां श्रेष्ठां ध्यायेद्बालकुमारिकाम् ॥२॥

ॐ कारं लक्ष्मिरूपेण विष्णोर्हृदयमव्ययम् ।
विष्णुमानन्दमव्यक्तं ह्रींकारं वीजरूपिणम् ॥३॥

क्लीं ऋता च करे भद्रे परमानन्ददायिनि ।
श्रीं दैत्यस्तम्भिनि पंक्तिमालिनि शत्रुमर्दिनि ॥४॥

तेजः प्रकाशिनी लक्ष्मी वरदा शुभकारिणी ।
ब्राह्मी च वैष्णवी रौद्री कालिका रत्नसंभवा ॥५॥

ॐ कारं ब्रह्मरूपेण उकारं विष्णुमव्ययम् ।
मकारं पुरुषं नाम देवीं त्वां प्रणमाम्यहम् ॥६॥

सूर्यकोटिप्रतीकाशं चन्द्रकोटिसमप्रभम् ।
तन्मध्ये निष्कलं ब्रह्म सूक्ष्मरूपव्यवस्थितम् ॥७॥

उकारं परमानन्दं त्रीणि पञ्च चतुर्मुखम् ।
सर्वमङ्गलमाङ्गल्यं शिवे सर्वार्थसाधिके ॥८॥

प्रथमे त्र्यम्बके गौरी द्वितीये वैष्णवी तथा ।
तृतीये कमला प्रोक्ता चतुर्थे सुन्दरी जया ॥९॥

पञ्चमे विष्णुपत्नी च षष्ठे कात्यायनी तथा ।
सप्तमे तु वरारोहा अष्टमे हरवल्लभा ॥१०॥

नवमे खड्गिनी शूला दशमे देवि देविका ।
एकादशे सिद्धलक्ष्मी द्वादशे हंसवाहना ॥११॥

इदं स्तोत्रं महत्पुण्यं पठते यो नरस्सदा ।
सर्वपापविनिर्मुक्तो नात्र कार्या विचारणा ॥१२॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एकमासं द्विमासं वा त्रिमासं च चतुस्तथा ।
पञ्चमासं च षण्मासं त्रिकालं यो नरः पठेत् ।।१३।।

ब्राह्मणः कुपितो दुःखी दारिद्र्येण च पीडितः
जन्मान्तरसहस्रेषु मुच्यते सर्वकिल्विषात् ।।१४।।

अलक्ष्मीर्लभते लक्ष्मीं अपुत्रो पुत्रवर्धनम् ।
धन्यो यशस्वी शत्रुघ्नो वह्निचौरभयं न्यसेत् ।।१५।।

शाकिनी-भूतवेताल सर्पव्याघ्रभयं न्यसेत् ।
राजद्वारे सभास्थाने कारागृहनिबन्धने ।।१६।।

ईश्वरेण कृतं स्तोत्रं प्राणिनां हितकारिणा ।
स्तुवन्ति ब्राह्मणा नित्यं दारिद्र्यं न च बाधते ।।१७।।

।।इति श्रीलक्ष्मीस्तोत्रं सम्पूर्णम् ।। सं० १९३३

1269/349

LAKṢMĪSTOTRAM AND PŪJĀVIDHIḤ
लक्ष्मीस्तोत्रं पूजाविधिश्च

From—Bhaviṣyottara purāṇa and
Brahmavaivartta purāṇa

Foll. 21+1; 21x17 cms; paper; lines per page 13/14; letters per line 18; Devanāgarī script; Sanskrit; 20th c.; brittle.

1320/400 (1)

LAKṢMĪSTOTRAM
लक्ष्मीस्तोत्रम्

From—Brahmavaivartta purāṇa-(Prakṛti khaṇḍa)

Foll. 1-10; 15x12·3 cms; paper; lines per page 6; letters per line 9; Devanāgarī script; Sanskrit; 19th c.; old, bound; bold letters.

1302/382

LALITĀTRIŚATI STOTRAM
ललितात्रिशतिस्तोत्रम्

From—Brahmāṇḍa purāṇa

Foll. 15; 26x13 cms ; paper; lines per page 6; letters per line 30; Devanāgarī script; Sanskrit; 1944 V.S. (1887 A D.) Chaitra śuklā 15, Friday; scribe—Gaṇapati Praśnavara of Sawai Jaipur.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Begins :—॥श्रीगणेशाय नमः । अगस्त्य उवाच ॥

हयग्रीव दयासिन्धो भगवन् भक्तवत्सल ।
त्वत्तः श्रुतमशेषेण श्रोतव्यं यद्यदस्ति तत् ॥१॥

रहस्यनामसाहस्रमपि त्वत्तः श्रुतं मया ।
अतः परं मे नास्त्येव श्रोतव्यमिति निश्चयः ॥२॥

तथापि मम चित्तस्य पर्याप्तिस्तु न जायते ।
कात्स्न्यार्थमप्राप्त इव शोचाम्यात्मन्यहं प्रभो ॥३॥

किमिदं कारणं ब्रूहि ज्ञातव्यांशोऽस्ति वा पुनः ।
अस्ति चेदपि तद् ब्रूहि ब्रूहीत्युक्त्वा प्रणम्य तम् ॥४॥

समाललम्बे तत्पादयुगलं कलशोद्भवः ।
हयाननो भीतभीतः किमिदं किमिदं त्विति ॥५॥

मुञ्च मुञ्चेति तं चोक्त्वा चिन्ताक्रान्तो बभूव सः ।
चिरं विचार्य निश्चिन्वन्वक्तव्यो न ममेत्यसौ ॥६॥

तूष्णीं स्थितः स्मरन्नाज्ञां ललिताम्बाकृतां पुरा ।
प्रणमन्नेव स मुनिस्तत्पादावत्यजन् स्थितः ॥७॥

वर्षत्रयावधि तदा गुरुशिष्यौ तथा स्थितौ ।
तच्छृण्वन्तश्च पश्यन्तः सर्वलोकाः सुविस्मिताः ॥८॥

ततः श्रीललितादेवी कामेश्वरसमन्विता ।
प्रादुर्भूय हयग्रीवं रहस्येवमवोचत ॥९॥

Ends :—

एतत्कीर्तनसन्तुष्टा श्रीदेवी ललिताम्बिका ।
भक्तस्य यद्यदिष्टं स्यात्तत्तत्पूरयति स्वयम् ॥५२॥

तस्मात्कुम्भोद्भव मुने कीर्तितव्यमिदं सदा ।
अपरं किञ्चिदपि ते बोद्धव्यं नावशिष्यते ॥५३॥

एवमुक्त्वा हयग्रीवः कुम्भजं तापसोत्तमम् ।
स्तोत्रेणानेन ललितां स्तुत्वा त्रिपुरसुन्दरीम् ॥५४॥

आनन्दलहरी मग्नमानसः समपद्यत ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति ब्रह्माण्डपुराणे उत्तरखण्डे ललितोपाख्याने देवीशतत्रयोपदेशे हयग्रीवागस्त्यसंवादे पंचाशत्तमोऽध्याय: ।।
संवत् १६४४ चैत्र शुक्ल १५ भृगुवारे समाप्तोऽयम् ।।
लिखितमिदङ्गणपतिना प्रश्नवरेण श्री सवाईजयनगरे ब्रह्मपुर्यां श्रीसीतारामयो: समीपे स्वस्थाने श्रीजगदम्बार्पणमस्तु श्रीगुरु: प्रसन्नोऽस्तु शुभम् ।।

1303/383

LALITĀTRIŚATI STOTRAM
ललितात्रिशतिस्तोत्रम्

From—Brahmāṇḍa purāṇa

Foll. 7; 19·7x11 cms.; paper; lines per page 7; letters per line 29; Devanāgarī script; Sanskrit; 1939 V.S. (1882 A D.) Nabha (Śrāvaṇa) śuklā 12, Thursday.
मन्त्रभाग only of no. 1302/382.

1352/432

TRIŚATISTOTRAM
(Lalitā-Triśati stotram)
ललितात्रिशतिस्तोत्रम्

From—Brahmāṇḍa purāṇa (Uttara khaṇḍa)

Foll. 9; 17·5x9·4 cms.; paper; lines per page 6; letters per line 24; Devanāgarī script; Sanskrit; 20th c.

1307/387

LALITĀ SAHASRANĀMA
ललितासहस्रनाम

From—Brahmāṇḍa purāṇa; in the form of a dialogue between Agastya and Hayagrīva

Foll. 37; 21·5x10 5 cms; paper; lines per page 6; letters per line 26; Devanāgarī script; Sanskrit; 1967 V. S (1910 A.D.), Āśvına kṛṣṇā 14, Saturday; scribe-Kanhaiyā lāla, Praśnavara at Brahmapurī (Jaipur).

1361/441

LALITĀ SAHSRANĀMA
ललितासहस्रनाम

From —Brahmāṇḍa purāṇa

Foll. 39; 21·2x10·6 cms.; paper; lines per page 6; letters per line 25; Devanāgarī script; Sanskrit; 20th c.; written within red, black and golden borders.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1377/457

LALITĀSAHASRANĀMA
ललितासहस्रनाम (न्यासध्यानादि)

Foll. 2; 21·4x10·2 cms.; paper; lines 10 in all; letters per line 23; Devanāgarī script; Sanskrit; 20th c.

1368/448

LALITOPĀKHYĀNAM
ललितोपाख्यानम्

Based on Bhahmāṇḍa purāṇa

Foll. 30; 20x12·3 cms.; paper; names are enumerated and serially numbered; Devanāgarī script; Sanskrit; 20th c ; loose bound in pārchā.

One multi-coloured; painting (Jaipur School) of Lalitā Devī in the beginning and the other in the middle between ff. 20 and 21. Only names are enumerated; written within black, red and golden borders on bluish bank-paper.

1112/191

LIṄGĀṢṬAKAM
लिङ्गाष्टकम्

Author – Śaṅkarāchāryaḥ

Foll. 1; 33·5x13·5 cms.; paper; lines 28 in all; letters per line 14; Devanāgarī script; Sanskrit; 19th c.; presented by Gaṇeśa Brāhmaṇa Lekhaka.

Begins :—।। श्रीगणेशाय नमः ।। अथ लिङ्गाष्टकं लिख्यते ।।

ब्रह्ममुरारिसुरार्चितलिङ्गं, निर्मलभासितशोभितलिङ्गम् ।
जन्मविदुःखविनाशनलिङ्गं, तं प्रणमामि सदाशिवलिङ्गम् ।।१।।

कुङ्कुमचन्दनचर्चितलिङ्गं, पङ्कजनाभिसदाशिवलिङ्गम् ।
संचितपापविनाशनलिङ्गं, तं प्रणमामि सदाशिवलिङ्गम् ।।२।।

कनकप्रभामणिभूषितलिङ्गं, दिनकरकोटिप्रभाकरलिङ्गम् ।
गणपतिवेष्टितपूजितलिङ्गं, तं प्रणमामि सदाशिवलिङ्गम् ।।३।।

देवगणार्चितदिव्यसुलिङ्गं, कामदहनकरुणाकरलिङ्गम् ।
रावणदर्पविनाशनलिङ्गं, तं प्रणमामि सदाशिवलिङ्गम् ।।४।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सिद्धसुरासुरवन्दितलिङ्गं, बुध्यसदा(?)परजार्थित[1]लिङ्गम् ।
सिद्धसुगन्धितपूजितलिङ्गं, तं प्रणमामि सदाशिवलिङ्गम् ।।५।।

सुरगुरुसूर्यप्रपूजितलिङ्गं, सुरसन्तपन[2]सुरार्चितलिङ्गम् ।
दैत्यविनाशनकारणलिङ्गं, तं प्रणमामि सदा शिवलिङ्गम् ।।६।।

अष्टदलैः परिवेष्टितलिङ्गं, भूतिसमुद्यतकारणलिङ्गम् ।
कष्टदरिद्रविनाशनलिङ्गं, तं प्रणमामि सदाशिवलिङ्गम् ।।७।।

लिङ्गाष्टकमिदं स्तोत्रं यः पठेत् शिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ।।८।।

इति शंकराचार्यविरचितं लिङ्गाष्टकं समाप्तम् ।।

1209/288-289

(1) LIṄGĀṢṬAKAM
लिङ्गाष्टकम्

(2) ṢAḌAKṢARASTOTRAM by Śaṅkarāchārya
षडक्षरस्तोत्रं श्रीमच्छङ्कराचार्यविरचितम्

(3) ŚIVAJĪ KĀ PADA (in Rajasthani)
शिवजीका पद (राजस्थानी-ढूँढाडी में)

(4) ŚRĪ MAHĀDEVAJĪ RĪ ĀRATĪ (in Hindi)
श्रीमहादेवजी री आरती (हिन्दी में)

(5) ŚIVAPAÑCHĀKṢARA STOTRAM by Śaṅkarāchārya
शिवपञ्चाक्षरस्तोत्रं शंकराचार्यविरचितम्

Foll. 13; 12x9·2 cms.; paper; lines per page 6; letters per line 10; Devanāgarī script; Sanskrit; 1921 V.S. (1864 A.D.) Mārgaśīrṣa sudi 15, Tuesday; scribe-Devakṛṣṇa Chaṇḍavāṇī Jośī, resident of Nagaur (Jodhpur), written at Jaipur in the Upāśraya of Joharis.

---

1. परजा=daughter of the Chief of Mountains.
2. सुरसन्तपन=राक्षस

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

997/76 **VĀRĀHĪNIGRAHĀṢṬAKAM**

वाराहीनिग्रहाष्टकम्

Foll. 4; 16x9 5 cms ; paper; lines per page 5; letters per line 17; Devanāgarī script; Sanskrit; 20th c.; scribe–Gopāla Brāhmaṇa; text same as in no. 1053/132 below.

1053/132 **VARĀHĪNIGRAHĀṢṬAKAM**

वाराहीनिग्रहाष्टकम्

Foll. 4; 15·5x10 cms.; paper; lines per page 6; letters per line 16; Devanāgarī script; Sanskrit; 19th c.; presented by Gopāla Brāhmaṇa Lekhaka

Begins :— ।। श्रीवरदमूर्तिर्जयति ।। महादेव उवाच—

देवि क्रोडमुखि त्वदङ्घ्रिकमलद्वन्द्वानुरक्तात्मने
मह्यं द्रुह्यति यो महेशि मनसा कायेन वाचा नरः ।
तस्याशु त्वदयोग्रनिष्ठुर[1]हलाघातप्रभूतव्यथा
पर्यस्यन्मनसो भवन्तु सततं प्राणाः प्रयाणोन्मुखाः ।।१।।

देवि त्वत्पादपद्मभक्तिविभवप्रक्षीणदुष्कर्मणि
प्रादुर्भूतनृशंसभावमलिनीं वृत्तिं विधत्ते मयि ।
यो देही भुवने तदीयहृदयान्निर्गतवरैर्लोहितैः
सद्यः पूरयते कराब्जचषकं वाञ्छाफलैर्मामपि ।।२।।

चण्डोच्चण्डविदीर्णदुष्टहृदयप्रोद्भिन्नरक्तच्छटा-
हालापानमदाट्टहासनिनदाटोपप्रदीपोत्कटम् ।
मातर्मत्परिपन्थिनामपहृतैः प्राणैस्त्वदङ्घ्रिद्वयं
ध्यानाड्डामरवैभवोदयबलात्सन्तर्पयामि क्षणात् ।।३।।

श्यामां तामरसां त्रिनयनां खण्डेन्दुचूडां जगत्-
त्राणायाग्रहलामुदग्रमुशलां संत्रासमुद्रावतीम् ।
ये त्वां रक्तकपालिनीं हरवरारोहे वराहाननां
भावे संदधते कथं क्षणमपि प्राणन्ति तेषां द्विषः ।।४।।

विश्वाधीश्वरवल्लभे विजयसे या त्वं नियत्यात्मिका
भूतानां पुरुषायुषावधिकरी पाकप्रदा कर्मणाम् ।
त्वां याचे भवतीं कमप्यवितथं यो मद्विरोधीजन-
स्तस्यायुर्ममवाञ्छितावधि भवेन्मातस्तवैवाज्ञया ।।५।।

1. तु ग्रदयोग्रनिष्ठुर

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मातः सम्यगुपासिता द्धमतिस्त्वामेव शक्तोऽस्म्यहं
यद्यप्यञ्चितदेशिकाङ्घ्रिकमलानुक्रोशपात्रस्य मे ।
जन्तुः कश्चन चिन्तयत्यकुशलं यस्तस्य तद्वंशसं
भूयाद्देवि विरोधिनो मम च ते श्रेयः पदाः संगिनः ।।६।।

वाराहि व्यथमानसावस[1]कुलं संज्ञं तदाज्ञाबलात्
सीदद्धैर्यमथाकृताध्यवसितं प्राप्ताखिलात्याहितम् ।
क्रन्ददबन्धुजनं कलङ्कितकुलं कण्डूव्रणौघक्रि[कृ]मि
पश्यामि प्रतिपक्षमाशु पतितं भ्रान्तं लुठन्तं मुहुः ।।७।।

वाराहि त्वमशेषजन्तुषु पुनः प्राणात्मिका स्पन्दसे
शक्तिर्व्याप्य चराचरं खलु यतस्त्वामेतदभ्यर्थये ।
त्वत्पादाम्बुजसंगिनो मम सकृत्पापन्ति ये दुर्जनाः
तेषामाकुरु शंकरप्रियतमे देहान्तरावस्थितिम् ।।८।।

इतिवाराहीनिग्रहाष्टकं सम्पूर्णम् ।। शुभम् ।।

1113/192 VĀRĀHĪNIGRAHĀṢṬAKAM

वाराहीनिग्रहाष्टकम्

Foll. 7; 10×8 cms; paper; lines per page 5; letters per line 10; Devanāgarī script; Sanskrit; 19th c.; presented by Gopāla Lekhaka; text same as in 1053/132 above.

1159/238 VĀRĀHĪNIGRAHĀṢṬAKAM

वाराहीनिग्रहाष्टकम्

Foll. 3; 16x10 cms; paper; lines per page 7; letters per line 16/17; Devanāgarī script; Sanskrit; 1923 V. S. (1866 A.D.); presented by Rāmagopāla Lekhaka. Sunday, Bhadrapada Śuklā 14.

1293/373 VIVEKADHAIRYĀŚRAYAḤ

विवेकधैर्याश्रयः

Author :—Vallabhacharyaḥ

Foll. 2; 17x13·9 cms; paper; lines per page 9/12; letters per line 17/19; Devanāgarī script; Sanskrit; 19th c.; damaged; quite unserviceable.

---

1. सावसं=खाद्यद्रव्ययुक्तं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1100/179 **VIŚVANĀTHANAGARĪ STOTRAM**

विश्वनाथनगरीस्तोत्रम्

Author :—Śaṅkarachāryaḥ

Foll. 5; 9·5x7 cms; paper; lines per page 4; letters per line 10/11; Devanāgarī script; Sanskrit; 19th c.; presented by Bālābakasa Lekhaka.

Begins : ।। श्रीगणेशाय नमः ।।

स्वर्गतः सुखकरी दिवौकसां, शैलराजतनयातिवल्लभा ।
ढुण्ढिभैरवविदारितविघ्ना, विश्वनाथनगरी गरीयसी ।।१।।

यत्र देहपतनेन देहिनां, मुक्तिरेव भवतीति निश्चितम् ।
पूर्वपुण्यनिचयेन लभ्यते, विश्वनाथनगरी गरीयसी ।।२।।

यत्र तीर्थममलं मणिकर्णिका, सा सदाशिवसुखप्रदायिनी ।
या शिवेन रचिता निजायुधे, विश्वनाथनगरी गरीयसी ।।३।।

सर्वदाऽमरवरैश्च वन्दिता, या गजेन्द्रमुखवारितविघ्ना ।
कालभैरवकृतैकशासना, विश्वनाथनगरी गरीयसी ।।४।।

सर्वतीर्थकृतमज्जनपुण्यैर्जन्मजन्मनि कृतैः खलु लभ्या ।
प्राप्यते भवभयार्तिनाशिनी, विश्वनाथनगरी गरीयसी ।।५।।

यत्र मुक्तिरखिलैस्तु जन्तुभिर्लभ्यते मरणमात्रतः शुभा ।
साऽखिलामरगणैः स्पृहणीया, विश्वनाथनगरी गरीयसी ।।६।।

यत्र शक्रनगरी कनीयसी, यत्र धातृनगरी तनीयसी ।
यत्र केशवपुरी लघीयसी, विश्वनाथनगरी गरीयसी ।।७।।

यत्र देवतटिनी प्रथीयसी, यत्र विश्वजननी पटीयसी ।
यत्र भैरवकृतिर्बलीयसी, विश्वनाथनगरी गरीयसी ।।८।।

विश्वनाथनगरीस्तवनं वै, यः पठेत् प्रयतमानसःपुमान् ।
पुत्रदारधनलाभमक्षयं, मुक्तिमार्गमनुलभ्यते सुखम् ।।९।।

इति श्रीमत् शंकराचार्यविरचितं विश्वनाथनगरीस्तवनं समाप्तम् ।। श्रीः ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1084/163 VIŚVANĀTHĀṢṬAKAM

विश्वनाथाष्टकम्

Author :—Śaṅkarāchāryaḥ

Foll. 4; 16x10 cms.; paper; lines per page 5; letters per line 15; Devanāgarī script; Sanskrit; 19th c.

1267/347(2)-(4) VIŚVANĀTHĀṢṬAKAM

विश्वनाथाष्टकम्

Author :—Śaṅkarāchāryaḥ

Foll. 2-3; 21x16.4 cms.; paper; lines per page 13; letters per line 23; Devanāgarī script; Sanskrit; 20th c.; brittle. Another copy of it on ff. 8&9. no. (4)

948/27 VIṢṆUNĀMĀVALĪ

विष्णुनामावली

Foll 5; 12.5x8.5 cms.; paper; Devanāgarī script; Sanskrit; lines per page 4; letters per line 12; 20th c.

Contains twenty-eight names of Viṣṇu as a dialogue between Kṛṣṇa and Arjuna.

1216/296 (2) VIṢṆUPAÑJARASTOTRAM

विष्णुपञ्जरस्तोत्रम्

From :—Brahmāṇḍapurāṇa in the form of a dialogue between Indra and Nārada.

Foll. 36 (b) to 45; 10.5x8 cms.; paper; lines per page 6; letters per line 10/11; Devanāgarī script; Sanskrit; 1913 V.S. (1856 A.D.); Bhādrapada kṛṣṇa 13; scribe—Rāmasahāya.

—/467/40 MJM VIṢṆUPAÑJARASTOTRA etc.

विष्णुपञ्जरस्तोत्र आदि

Foll. 71; 5.5x5 cms.; paper; lines per page 6; letters per line 11; Devanāgarī script; Sanskrit; 18th. c.; incomplete; bound; written in very small letters; two leaves blank; contains :—

(1) विष्णुपञ्जरस्तोत्रम् ff. 10
(2) विष्णुसहस्रनाम ff. 48
(3) अपराजिता विद्या ff. 11

Included in the Catalogue of Manuscripts in the Maharaja of Jaipur Museum at no. 176, pp. 46–47.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1206/285 (2) VIṢṆUPAÑJARA STOTRAM

विष्णुपञ्जरस्तोत्रम्

From :—Brahmāṇḍapurāṇa

Foll. 17 to 23; 10.5x7.5 cms.; paper; lines per page 7; letters per line 15; Devanāgarī script; Sanskrit; 1906 V.S. (1849 A. D.), Śrāvaṇa Śuklā 2, Saturday; scribe-Rāmānanda at Baḍī Mahāra.

1223/303 VIṢṆUPAÑJARASTOTRAM

विष्णुपञ्जरस्तोत्रम्

From—Brahmāṇḍapurāṇa

Foll. 10; 11x7.5 cms.; paper; lines per page 5; letters per line 11; Devanāgarī script; Sanskrit; 19th c.; bound.

1238/318 (5) VIṢṆUPAÑJARASTOTRAM

विष्णुपञ्जरस्तोत्रम्

Foll. 1 to 8; 13x7.5 cms ; paper; lines per page 7; letters per line 19; Devanāgarī script; Sanskrit; 19th c.; bound.

1259/339 (3) VIṢṆUPAÑJARASTOTRAM

विष्णुपञ्जरस्तोत्रम्

From :—Brahmāṇḍapurāṇa

Foll. 1 to 10; 14x10.7 cms.; paper; lines per page 7; letters per line 12; Devanāgarī script; Sanskrit; 19th c.; bound.

1286/366 VIṢṆUPAÑJARASTOTRAM

विष्णुपञ्जरस्तोत्रम्

Foll. 7; 16x10.5 cms.; paper; lines per page 6; letters per line 18; Devanāgarī script; Sanskrit; 19th c.

1381/461 VIṢṆUPAÑJARASTOTRA etc.

विष्णुपञ्जरस्तोत्रादि

Foll. 15; 14·3x11·4 cms; paper; no tuniformly written; Devanāgarī script; Sanskrit–Hindi; 19th c ; contains stray verses and रक्षास्तोत्र etc.; all very crudely written; old; bound in flowered misru; preserved between two card boards.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

934/13 VṢṆUPŪJANA PRAYOGAḤ

विष्णुपूजनप्रयोग:

Foll. 6; 21x10·5 cms; paper; lines per page 7; letters per line 22; Devanāgarī script; Sanskrit; 1924 V.S. (1867 A.D); abridged. It is a manusrript of Dharmaśāstra.

1271/351 VIṢṆUPŪJANAM

विष्णुपूजनम् (विधि:)

Foll. 3; 29·5x20 cms.; paper; lines per page 18; letters per line 20; Devanāgarī script; Sanskrit; 1966 V.S. (1909 A.D.); Āṣāḍha Sudi 13, Thursday; brittle. It is a Dharmaśāstric work.

1272/352 VIṢṆUPŪJANAM

विष्णुपूजनम्

From—Agastyasaṁhitā.

Foll. 2; 29·5x20 cms ; paper; lines per page 18; letters per line 20; Devanāgarī script; Sanskrit; 20th c.; brittle. It is a Dharmaśāstric work.

Ends. इति श्रीअगस्त्यसंहितायां षोडशोपचारपूजाविधि: ।।सम्पूर्णम् ।

1007/86 VIṢṆUPŪJĀ (paddhatiḥ)

विष्णुपूजा (पद्धति:)

Foll. 5; 16·7x10 cms.; paper; lines per page 5; letters per line 19; Devanāgrī script; Sanskrit; 20th c ; scribe—Gaṇeśa Brāhmaṇa. It is a Dharmaśāstric manuscript.

1022/101 VIṢṆUŚATANĀMASTOTRAM

विष्णुशतनामस्तोत्रम्

From—Viṣṇupurāṇa.

Foll. 6; 16x10 cms.; paper; lines per page 4; letters per line 14; Devanāgarī script; Sanskrit; 1938 V.S. (1881 A.D.); scribe—Rāmaratna Śarmā.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

944/23 VIṢṆUSAHASRANĀMASTOTRAM

विष्णुसहस्रनामस्तोत्रम्

From—Mahābhārata.

Foll. 3; 17x9·5 cms; paper; lines per page 7; letters per line 19; Devanāgarī script; Sanskrit; 19th c.; incomplete.

962/41 VIṢṆUSAHASRANĀMA

विष्णुसहस्रनाम

From—Mahābhārata.

Foll. 12; 14·5x10 cms; paper; lines per page 8; letters per line 21; Devanāgarī script; Sanskrit; 20th c.; incomplete.

1205/284 VIṢṆUSAHASRANĀMA

विष्णुसहस्रनाम

From—Mahābhārata (Śāntiparva).

Foll. 22; 14.5×11.5 cms.; paper; lines per page 9; letters per line 16; Devanāgarī script; Sanskrit; 1923 V.S. (1866 A.D.); loose bound; Āsoja Vadi 7, Sunday; scribe—Rudramaṇi Jośī; last page blank.

1212/292 VIṢṆUSAHASRANĀMA

विष्णुसहस्रनाम

From—Mahābhārata.

Foll. 111; 15×11 cms.; paper; lines per page 4; letters per line 7; Devanāgarī script; Sanskrit; 19th c.; bound; written within red, yellow and black border lines in bold handwriting.

1218/298 VIṢṆUSAHASRANĀMA

विष्णुसहस्रनाम

From—Mahābhārata.

Foll. 25; 14·4×10·3 cms.; paper; lines per page 8; letters per line 16; Devanāgarī script; Sanskrit; 19th c.; loose bound and damaged.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1222/302(1) VIṢṆUSAHASRANĀMA

विष्णुसहस्रनाम

From—Mahābhārata

Foll. 1 to 85 (a); 13×9 cms.; paper; lines per page 7; letters per line 12; Devanāgarī script; Sanskrit; 19th c.; loose bound.

1229/309 VIṢṆUSAHASRANĀMA

विष्णुसहस्रनाम

From—Mahābhārata.

Foll. 119; 7·2×4·3 cms.; paper; lines per page 4; letters per line 6; Devanāgarī script; Sanskrit; 1934 V.S. (1877 A.D), Āṣāḍha Sudi 9, Monday; scribe—Kisanalāla Bohrā; a small guṭakā.

1234/314 VIṢṆUSAHASRANĀMA

विष्णुसहस्रनाम

From—Mahābhārata.

Foll. 70; 15·5×10·5 cms.; paper; lines per page 5; letters per line 8; Devanāgarī script; Sanskrit; 19th c.; bound.

1239/319(4) VIṢṆUSAHASRANĀMA

विष्णुसहस्रनाम

From—Mahābhārata.

Foll. 192 to 213; 17×13 cms.; paper; lines per page 9; letters per line 17; Devanāgarī script; Sanskrit; 19th c.; bound.

1253/333 VIṢṆUSAHASRANĀMA

विष्णुसहस्रनाम

From—Mahābhārata.

Foll. 97; 13×9·5 cms.; paper; lines per page 4; letters per line 7/8; Devanāgarī script; Sanskrit; 19th c.; loose bound; written in bold letters.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1254/334 VIṢṆUSAHASRANĀMA

विष्णुसहस्रनाम

From—Mahābhārata.

Foll. 48; 15×9.5 cms.; paper; lines per page 6; letters per line 10; Devanāgarī script; Sanskrit; 19th c.; loose bound.

1259/339(1) VIṢṆUSAHASRANĀMA

विष्णुसहस्रनाम

From—Mahābhārata.

Foll. 1 to 44; 14×10.7 cms.; paper; lines per page 7; letters per line 12; Devanāgarī script; Sanskrit; 19th c.; bound.

1264/344(2) VIṢṆUSAHASRANĀMA

विष्णुसहस्रनाम

From—Mahābhārata.

Foll. 234 to 287; 14.3×12 cms.; paper; lines per page 6; letters per line 10; Devanāgarī script; Sanskrit; 19th c.; bound.

1265/345(2) VIṢṆUSAHASRNĀMA

विष्णुसहस्रनाम

From—Mahābhārata.

Foll. 121 to 146; 15·5×12 cms.; paper; lines per page 8; letters per line 14; Devanāgarī script; Sanskrit: 1862 V.S. (1805 A.D.); loose bound.

1304/384(1) VIṢṆUSAHASRANĀMA

विष्णुसहस्रनाम

From—Mahābhārata.

Foll. 1 to 28; 18.5×15 cms.; paper; lines per page 7; letters per line 14; Devanāgarī script; Sanskrit; 1921 V.S. (1864 A.D.); Āṣāḍha Śuklā 4, Friday; scribe Ghamaṇḍī-rāma Śrīmālī.

.../475/A.G. 2170 VIṢṆUSAHASRANĀMA

विष्णुसहस्रनाम

From—Mahābhārata.

Foll. 42; 14·5×11 cms.; paper; lines per page 6; letters per line 13; Devanāgarī script; Sanskrit; 1807 V. S. (1750 A.D.).

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

20 rich illustrations; bound; embroidered cover boards; Om (ॐ) embroidered on both sides of the cover; borders decorated; written with white ink on golden background. Included in the Catalogue of Manuscripts in the Maharaja of Jaipur Museum at no. 177 pp. 46–47.

1294/374

VEṆUGĪTAM
वेणुगीतम्

From—Bhāgavatam (x–i).
Foll. 4; 17×14 cms.; paper; lines per page 11; letters per line 22; Devanāgarī script; Sanskrit; 19th c.; stray leaves separated from some complete copy.

1033/112

VEDAPĀṬHASTUTIḤ
वेदपाठस्तुतिः

From—Skanda Purāṇa (Himavatkhaṇḍa).
Foll. 4; 16×10 cms.; paper; lines per page 6; letters per line 16; Devanāgarī script; Sanskrit; 1926 V.S. (1869 A.D.); scribe-Kahnīrāma Paṇḍita. It is about Rudrapāṭha.

935/14

VAIDHṚTIKATHĀ
वैधृतिकथा

Foll. 2; 25×16·2 cms.; paper; lines per page 13; letters per line 28; Devanāgarī script; Sanskrit; 20th c. It is a Pauranic subject.

936/15

VAIDHṚTI KATHĀ (with Hindi translation)
वैधृतिकथा (भाषानुवाद सहित)

Foll. 7; 20·7×17 cms.; paper; lines per page 11; letters per line 21; Devanāgarī script; Sanskrit; 1948 V.S.(1891A.D.); Scribe-Lichhamīnārāyaṇa. It is a Pauranic work.

954/33

VAIDHṚTIKATHĀ
वैधृतिकथा

Foll. 3; 19·5×13·5 cms.; paper; lines per page 13; letters per line 15/16; Devanāgarī script; Sanskrit; 20th c.; It is a Pauranic work.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

941/20 **VYATĪPĀTA VRATA KATHĀ VIDHIḤ**

with ct. in Hindi

व्यतीपातव्रतकथा विधिः (भाषानुवाद सहित)

From—Varāh Purāṇa

Foll. 17; 26·5×17·5 cms.; paper; lines per page 7/8; letters per line 20; Devanāgarī script; Sanskrit; 20th c. It is a Pauranic work.

937/16 **VYATĪPĀTODYĀPANA VIDHIḤ**

व्यतीपातोद्यापनविधिः

Foll. 10; 19×14 cms.; paper; lines per page 9; letters per line 15; Devanāgarī script; Sanskrit; 20th c. It is a Dharmaśāstric work.

1178/257 **VYĀKHYĀPAÑCHAKAM**

व्याख्यापञ्चकम्

Author or scribe—Chaturbhujaḥ

Foll. 4; 26×11·7 cms.; paper; lines per page 7; letters per line 28/29; Devanāgarī script; Sanskrit; 19th c.; brittle.

Begins :— ।। श्रीगणेशाय नमः ।।

वासना वासुदेवस्य वासितं भुवनत्रयम् ।
सर्वभूतनिवासीनां वासुदेव नमोऽस्तु ते ।।१।।

रविर्विनायको विष्णुश्चण्डीशम्भुस्तथैव च ।
अनुक्रमेण पूज्यन्ते स्तूयन्ते वरदा यतः ।।२।।

सूर्यपक्षे पदच्छेदः ।। वासना वासुदेवस्य वा सितं भुवनत्रयं, सर्वभूतनिवासि इन अम्ब आसुत् एव नमः अस्तु ।। अम्ब इत्यहो हे इन सूर्य ! त्वं भुवनत्रयं सितमुज्ज्वलं आसुदेव जनयन्नेव असि असीति शेषः ऽ इव इति सम्बोधनेऽव्ययं इनः सूर्ये स्वामिनि चेति विश्वः षु प्रसवैश्वर्ययोः तेनासुदिति निष्पन्नं कीदृशं भुवनत्रयं सर्वभूतानां निवासोऽस्ति तथा अस्त्यर्थे इनिः पुनः वासुदेवस्य विष्णोर्वासना मायैव वा एवार्थे मायैवान्धतमसमिति श्रुतिः तदपहरसि ज्ञानात्मकत्वादिति ध्वनिः ते नमोऽस्त्विवति सर्वत्र ।।१।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गणेशपक्षे पदच्छेद: ।। वासना वासुदेवस्य वा असितं भुवनत्रयं सर्वभूतनिवासीन अम्बासुत एव नमः अस्तु ते ।। अम्बायाः सकाशात् सौति जायते इति अम्बासुत् हे पार्वतीपुत्र ! वासना-मभिलाषं वान्ति घ्नन्ति ये ते वासना वा विघ्नास्तेषामसुदेव प्राणनाथ ! हे सर्वविघ्नाधिपते सर्वभूतेति सर्वा सा चासौ भूः पृथ्वीस्तस्यास्तनि विस्तारं हन्तीति सर्वभूतनिवासो मूषक-स्तत्रासीन हे मूषकवाहन ! त्वं भुवनत्रयमसितं स्य अभीष्ट-दानैरुज्वलं कुर्वित्यर्थः ।।

अथ कृष्णपक्षे चत्वारोऽर्थाः ।। तत्र पदच्छेदः ।। वास नाः वासुदेव स्य वा असितं भुवनत्रयं सर्वभूतनिवासि इन अंब असुदेव नमः अस्तु ते ।। कश्चिद्योगी तमाह अंबेति संबोधने हे इन स्वामिन् ! असुदेव प्राणनाथ वासुदेव संबोधनानि त्वं वासनाः मायाः स्य वा पुनः असितं पापं स्य खण्डय त्वं भुवनत्रयं वासि हरसि भुवनं त्रायते इति भुवनत्र इन्द्रस्तं युद्धाय यातीति भुवनत्रयो दैत्यस्तं कीदृशमसितं सर्वभूतानि सर्वाणि भूतानि अधो नयतीति तथा क्रियाविशेषणम् ।।१।। यद्वा वासना वासुदेव-स्य वासितं भुवनत्रयं सर्वभूतनिवासि ईनां वाऽसुदेव नमः अस्तु ते ।।२।।

हे ईनां लक्ष्मीनां असुदेव प्राणेश सर्वभूतनिवासि प्राणिगणाधि-ष्ठितं भुवनत्रयं त्रैलोक्यं तव वासितं वसतिस्थानं कीदृशस्तव वासना वासुदेवस्य वासनां मायां वान्ति घ्नन्ति ये योगिनस्ते वासुदेवस्य प्रियस्य ।।३।। वासनाः वासुदेव स्य वासितं भुवनत्रयं सर्वभूतनिवासी ईनां वा असुदेव नमः अस्तु ते ।।३।। अथवा काचित् कामिनी तमाह—हे वासुदेव वा हे असुदेव त्वया भुवनत्रयं वासितं त्वं सर्वभूतनिवासी चासि अत इनां वामानां वासनाः स्य त्यज त्वया सार्द्धं रतं कर्तुमहं न क्षमेति ध्वनितं ।। अथवा वासना वासुदेवस्य वासितं भुवनत्रयं सर्दभूतनिवासी इनांब आसुत् एव नमः अस्तु ते ।।४।। हे इनाम्ब ! इनः सूर्यो अम्बं नेत्रं यस्य सः हे वासनाः वासुदेव ! वासनां मायां वान्ति त्यजन्ति ये बुधास्तेषामसुदेव प्रियतम त्वं भुवनत्रयमासुदेव जन-यन्नेवासि तमयशः स्य खण्डय त्वं सर्वभूतनिवासी सर्वभूतहृत्स्थ यद्वा सर्वं भूतं जातं यस्मात्तस्मात्सर्वभूतं जलं तत्र निवास जलशार्यी यद्वा सर्वभूतनिवासी मनोऽधिष्ठाता चन्द्र इन सूर्यस्तावेव नेत्रे यस्य सः सर्वभूतनिवासीनाम्बः ।।४।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चण्डीपक्षे पदच्छेदः ।। वासनावा असुदे अवसि अवासितं भुवनत्रयं सर्वभूतनिवासिना अम्ब असुदे अव नमोऽस्तु ते हे अम्ब मातः ! ते नमोऽस्तु ! हे असुदे भक्तेभ्यः प्राणदात्रि त्वं भुवनत्रयं अवसि कथं वासनावा आधारनौकास्वरूपतया कीदृशं तत् अवासितं त्वद्दत्तेनाधारं कीदृशी त्वं सर्वभूत-निवासी शिवः इनो भर्ता यस्याः सा यद्वा सर्वभूः ब्रह्मा तस्य तनिं प्रपञ्चं वाति हन्ति यो महिषस्तत्रासीना हे असुदे शत्रूणां प्राणखण्डने मां अव ।।४।।

शिवपक्षे पदच्छेदः ।। वासना वासुदेवस्य वासितं भुवनत्रयं सर्वभूतनिवासीन अं वासुदेव नमोऽस्तु ते सर्व सशयोरभेदात् हे शर्व भूतनिवासिनां भूम्यादीनामिन स्वामिन् हे अम्बासुदेव पार्वतीप्राणनाथ वासनावासु वासनाश्रयं भुवनत्रयं देवस्य तव वासितं भक्षितं कल्पान्ते ग्रासभूतं वर्तते ते नमोऽस्तु ।।५।।

वासनावेति पद्यस्य व्याख्यापञ्चकमुत्तमम् ।
पञ्चदेवाश्रयं श्रेयो विलिलेख चतुर्भुजः ।।

इति श्लोकव्याख्यासमाप्तिः ।।

1290/370

VYEṄKATEŚA STOTRAM
व्येङ्कटेशस्तोत्रम्

Author—Anaṅgāchāryaḥ

Foll. 1; 17·7 x 9·8 cms.; paper; 20 lines in all on both sides; letters per line 28; Devanāgarī script; Sanskrit; 19th c.

1354/434

ŚAKRĀDISTUTIḤ
शक्रादिस्तुतिः

From—Mārkaṇḍeyapurāṇa.

Foll. 6; 19·3 x 10·7 cms.; paper; lines per page 7; letters per line 24; Devanāgarī script; Sanskrit; 20th c.

982/61

ŚAṄKARA STAVAḤ
शङ्करस्तवः

From—Brahmavaivarttapurāṇa.

Foll. 4; 15 x 13 cms.; paper; lines per page 8; letters per line 11; Devanāgarī script; Sanskrit; 20th c.; scribe–Jhūntha Lekhaka.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1164/243

ŚATRUVIDHVANSINĪ STOTRAM
शत्रुविध्वंसिनी स्तोत्रम्

From—Ḍāmara-tantra

Foll. 5; 17×7·5 cms.; paper; lines per page 3; letters per line 13/14; Devanāgarī script; Sanskrit; 19th c., presented by Bālābakasa Lekhaka.

1151/230

ŚARABHA KAVACHAM
शरभकवचम्

From—Ākāśabhairavakalpa

Foll. 25; 15·5×10·5 cms.; paper; lines per page 6; letters per line 16; Devanāgarī script; Sanskrit; 19th c.

1049/128

ŚARBHEŚVARA KAVACH STOTRAM
शरभेश्वरकवचस्तोत्रम्

From—Akāśabhairavakalpa (Rudrayāmala)

Foll. 20; 15×10 5 cms.; paper; lines per page 7; letters per line 16; Devanāgarī script; Sanskrit; 19th c.

Begins :— श्री एँ ।। श्रीशरभेश्वराय नमः ।। ॐ अस्य श्रीशरभेश्वरकवचस्तोत्रमन्त्रस्य वामदेव ऋषिः जगती छन्द श्रीशरभशालवपक्षिराजः श्रीकालाग्निरुद्रो देवता खं बीजं खें शक्तिः स्वाहा कीलकं मम रक्षार्थे परप्रयोगशान्त्यर्थे सर्वशत्रुनिवारणार्थे सर्वभयहरणार्थे धर्मार्थकाममोक्षार्थे श्रीशरभेश्वरप्रीत्यर्थे जपे विनियोगः ।। ॐ खें खां खं फट् प्राणग्रहासि प्राणग्रहासि हुँ फट् सर्वशत्रुसंहारकाय शरभशालवाय पक्षिराजाय हुँ फट् स्वाहा ।।१।।

।। श्रीगणेशाय नमः ।। ईश्वर उवाच ।।
वक्ष्यामि शृणु देवेशि सर्वरक्षणमद्भुतम् ।
शारभं कवचं दिव्यं चतुर्वर्गफलप्रदम् ।।१।।

शालवपक्षिराजस्य कवचस्य सदाशिवः ।
ऋषिश्छन्दोऽस्य वृहती प्राच्यंते शरभेश्वरः ।।२।।

देवता प्रणवो बीजं प्रकृतिः शक्तिरुच्यते ।
कीलकं पक्षिराजेति सर्वरक्षाकरो विभुः ।।३।।

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

परप्रयोगशान्त्यर्थं सर्वशत्रुनिवारणे ।
चतुर्वर्गार्थसिद्धयर्थे विनियोगः प्रकीर्तितः ।।४।।

।। अथ ध्यानम् ।।
रक्ताभं सुप्रसन्नं त्रिनयनममृतोन्मत्तभासाभिरामं
कारुण्याम्भोधिमीशं वरदमभयदं चंद्ररेखावतंसम् ।
शङ्खध्वानाखिलाशाप्रतिहतविधिना भासमानात्मभात्वं
सर्वेशं शालवेशं प्रणतभयहरं पक्षिराजं नमामि ।।५।।

श्रीशिवः पुरतः पातु मायाधीशस्तु पृष्ठतः ।
पिनाकी दक्षिणे पातु वामपार्श्वे महेश्वरः ।।६।।

शिखाग्रं पातु मे शम्भुर्जटिलं पातु शङ्करः ।
ईश्वरो वदनं पातु भ्रुवोर्मध्ये पुरान्तकः ।।७।।

भ्रुवौ पातु मम स्थाणुः कपर्दी पातु लोचने ।
शिवो मे श्रोत्रयोः पातु वागीशः पातु जिह्विकाम् ।।८।।

नासयोर्मे वृषारूढो नासाग्रं वृषभध्वजः ।
स्मरारिः पातु मे ताल्वोरोष्ठयोर्भक्तवत्सलः ।।९।।

पातु मृत्युञ्जयोर्दन्तान् चिबुकं पातु भूतराट् ।
परमेशः कपोलौ मे त्रिकं[1] पातु कपालभृत् ।।१०।।

कण्ठं पशुपतिः पातु शूली पातु हनुर्मम ।
स्कन्धद्वयं हरः पातु धूर्जटी पातु मे भुजौ ।।११।।

बाहुद्वयं महादेव ईशानो मे प्रकूर्परौ ।
मुष्टिसन्धिं जगन्नाथः प्रकोष्ठे चन्द्रशेखरः ।।१२।।

मणिबन्धे त्रिनेत्रो मे भीमः पातु करद्वयम् ।
करपृष्ठं मृडः पातु रुद्रोऽङ्गुष्ठद्वयं मम ।।१३।।

उमासहायस्तर्जन्यौ भर्गो मे पातु मध्यमे ।
अनामिके करालास्यः कालकण्ठः कनिष्ठिके ।।१४।।

गंगाधरोऽङ्गुलीः सर्वाण्यप्रमेयो नखानि मे ।
ईशानः पातु दोर्मूलं मेदो मे स्वस्तिदोऽवतु ।।१५।।

वक्षस्तत्पुरुषः पातु कुक्षौ दक्षाध्वरान्तकः ।
अघोरो हृदयं पातु वामदेवस्स्तनद्वयम् ।।१६।।

---

१. त्रिकं-अधरम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भालेन्दुर्जठरं पातु नाभिं नारायणोऽव्ययः ।
गुह्यं प्रजाकरः पातु कुक्षिपार्श्वौ महाबलः ।।१७।।

सद्योजातः कटिं पातु पृष्ठभागं तु भैरवः ।
मोहनो जघनं पातु गुदं मम जितेन्द्रियः ।।१८।।

ऊर्ध्वरेता लिंगदेशं वृषाणां वृषभध्वजः ।
ऊरुयुग्मं भवः पातु जानुयुग्मं भवान्तकः ।।१९।।

हुंकारः पातु मे जंघे फट्कारो मम गुल्फके ।
षट्कारः पातु पृष्ठं मे वषट्कारोऽङ्घ्रिणस्तले ।।२०।।

स्वाहाकारोऽङ्गुलिपार्श्वे स्वधाकारोऽङ्गुलीर्मम ।
त्वरितः सर्वसंधीन्मे रोमकूपे नृसिंहजित् ।।२१।।

त्वचं पातु मनोवेगः कालजिद्रुधिरं मम ।
पुष्टिदः पातु मे मांसं मेदो मे स्वस्तिदोऽवतु ।।२२।।

सर्वात्मास्थिचयं पातु मज्जां मम जगत्प्रभुः ।
शुक्रं वृद्धिकरः पातु बुद्धिं वाचामधीश्वरः ।।२३।।

मूलाधाराम्बुजं पातु भगवान् शरभेश्वरः ।
स्वाधिष्ठानमजः पातु मणिपूरं हरिप्रियः ।।२४।।

अनाहतं शालवेशो विशुद्धं जीवनायकः ।
सर्वज्ञानप्रदो देवो ललाटं मे सदाशिवः ।।२५।।

ब्रह्मरन्ध्रं महादेवः पक्षिराजोऽखिलात्मवान् ।
सर्वलोकवशीकारः पातु मां परगर्वजित् ।।२६।।

वज्रमुष्टिवराभीतिहस्तः कालाग्निसन्निभः ।
विजयासहितः पातु चैन्द्रीककुभमग्निवित् ।।२७।।

शक्तिशूलकपालासिहस्तसौदामिनीप्रभः ।
जयायुक्तो महाभीमः पातु वैश्वानरीं दिशम् ।।२८।।

दण्डासिमौशलशूलपाशांकुशकरांबुजः ।
यमान्तकोऽजितायुक्तो निशि रक्षेद्दिशं यमाम् ।।२९।।

खड्गखेटाग्निपरशुहस्तः शत्रुनिमर्दनः ।
अपराजितया युक्तः सदाऽव्यान्नैर्ऋतं दिशम् ।।३०।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पाशांकुशधनुर्बाणपाणिः श्रेणियुतः शिवः ।
हरिद्राभोऽनिशं पायाद्वारुणीं दिशमात्मजित् ।।३१।।

ध्वजाग्रकवचोद्धारभुजो दुर्गायुतः खगः ।
चांडवेगशिवः पायात् सततं मारुतीं दिशम् ।।३२।।

गदास्रग्वरदाभीतिकराम्भोजः शिवायुतः ।
कनकाभो महातेजाः पातु कौबेरिकां दिशम् ।।३३।।

त्रिशूलाहिकपालाग्निर्दो:स्थले विस्मयायुतः ।
भस्मोद्धूलितसर्वांगो दिशं पात्वपराजितः ।।३४।।

जपाक्षपुस्तकाम्भोजकमण्डलुकराम्बुजः ।
ऊर्द्ध्व पातु गिरां युक्तः सर्वभूतहिते रतः ।।३५।।

शंखचक्रगदाभीतिहस्तः पद्मयुतोऽव्ययः ।
नीलाञ्जनसमो नीलः पातालं पात्वनारतम् ।।३६।।

अनुरक्ता विदिशः पातु शालवो नरसिंहजित् ।
शरभः पातु संग्रामे युद्धे वैरिकुलान्तकः ।।३७।।

सर्वसौभाग्यदः पातु जाग्रत्स्वप्नसुषुप्तिसु ।
सर्वसम्पत्प्रदः पातु धनधान्यादिकं मम ।।३८।।

शतानन्दः सुतान् पातु पुत्रानायु करोऽनिशम् ।
बन्धून् वृद्धिकरः पातु गृहं मम वशंकरः ।।३९।।

ग्रामं ग्रामेश्वरः पातु राज्यं मम दिगम्बरः ।
राष्ट्रं शान्तिकरः पातु राजानं धर्मदायकः ।।४०।।

मार्गं दक्षहरः पातु मम कर्माणि भैरवः ।
वटुकः पातु मे सर्वास्ववस्थात्रितयेषु च ।।४१।।

वटुकः पातु मे सर्वं त्र्यंबकः स्नायुकेषु च ।
स्पर्शवीक्षणसंस्पर्शप्राणरक्षामनोजवः ।।४२।।

प्रधानमूर्तिभावश्च प्रसादेष्वाशु सिद्धिकृत् ।
साधकः प्रणवं तारं नमो भगवतेऽपि च ।।४३।।

प्रतिनाम चतुर्थ्यन्तं स्पर्शमित्यभिधीयते ।
द्विर्ज्वलत्प्रज्वलासाध्यं साधनं द्विर्द्विरक्ष च ।।४४।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सर्वभूतेभ्यो हुं फट् स्वाहान्तं यत्तदीक्षणम् ।
स्पृशन् पश्यन् जपं कृत्वा प्रतिस्थानं समाहितः ।।४५।।

प्रार्थयेदखिलं श्रेष्ठं हृदिस्थं शालवेश्वरम् ।
ये ग्रामघातकाः क्रूराः कपटा दौष्टिका भटाः ।।४६।।

तस्कराः शत्रवः क्रुद्धा वधासक्ता वधोद्यताः ।
छद्मचारा विटो भ्रष्टा दिवाचरनिशाचराः ।।४७।।

ते सर्वे पक्षिराजस्य रक्षवातावधाहताः ।
भग्नचित्ता हतप्राणा यान्तु देशान्तरं स्वयम् ।।४८।।

भये च दुष्टा ग्रहा रक्षः पिशाचा देवयोनयः ।
चतुष्षष्टिगुणाश्चैव सप्तत्युन्मादका ग्रहाः ।।४९।।

अष्टाशीतिमहाभूताः सप्तकोटिमहाग्रहाः ।
नवतिज्वरभेदाश्च शतभेदाश्च कृत्तिकाः ।।५०।।

पंचाशद्दुर्गुणौघाश्च नियुता कृत्रिमग्रहाः ।
प्रेताः रुण्डास्त्रयस्त्रिंशत् पीडादानपरायणाः ।।५१।।

अयुता क्षुद्रभेदाश्च चत्वारिंशच्छिवाह्वयाः ।
द्वाविंशद्वह्निवक्त्राश्च विंशन्मार्जारवक्त्रगाः ।।५२।।

चतुर्विंशतिरूपाश्च ये चान्ये क्षुद्रयोनयः ।
ते सर्वे शालवेशस्य शंखनिस्वनमोहिताः ।।५३।।

विषण्णाश्चलिताः स्वान्ताः प्राणत्राणपरायणाः ।
गच्छन्तु संप्रयोक्तारो देशान्तरमनिच्छया ।।५४।।

ये चान्ये वनजाः ग्राम्याः शुनकोरगवृश्चिकाः ।
आशीविषा विशा ज्वालाव्याघ्रऋक्षेभशूकराः ।।५५।।

गृध्राः श्येनाः खगाः काका दंशका भृंशका मृगाः ।
एते शरभहस्ताग्रनखक्षतविमोहिताः ।।५६।।

स्रवद्रक्तसटासिक्ताः शिलातलविताडिताः ।
संभेदने नखाः शीघ्रं नश्यंत्वखिलदुश्चराः ।।५७।।

न दशन्तूरगा क्वापि नातिवातोऽपि वीक्षितुम् ।
न दहत्वसहो वह्निरायान्त्वापो न चाधिकम् ।।५८।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न वर्षत्वतिवृष्टिश्च न पतत्वशनिः क्वचित् ।
नाक्रमत्वपमृत्युश्च न रोगाः नाशुभं क्वचित् ।।५९।।

न म्रियेत भक्तजनो न भवत्वशुभं क्वचित् ।
न वदन्त्वसहं वाक्यं जन्तवो मम देशके ।।६०।।

न स्याद्वैरं च जन्तूनां ग्रन्योऽन्यं राजके मम ।
भवन्तु सुखिनः सर्वे सर्वाः सन्तु पतिव्रताः ।।६१।।

सर्वाः सुवन्तु सत्पुत्रान् पुत्रींश्च शुभलक्षणाः ।
सर्वे देवाश्च नन्दन्तु सन्तु कल्याणकारिणः ।।६२।।

राजन्वती मही चास्तु राजा भवतु धार्मिकः ।
संस्रवन्तु पयो गावः फलं त्वौषधयोऽधिकम् ।।६३।।

भवंन्तु फलदा वृक्षाः सम्यग्भवतु मेऽखिलम् ।
ममास्तु तरसा नूनमात्मज्ञानमचञ्चलम् ।।६४।।

कामक्रोधमहालोभसंमोहमदमत्सराः ।
मास्तु मे क्वापि सर्वेश भगवन् करुणानिधे ।।६५।।

शरभेश्वर सर्वेश पक्षिराज दयानिधे ।
देहि मे निश्चलां भक्ति प्रणतोऽस्मि पुनः पुनः ।।६६।।

गौरीवल्लभ कामारे कालकूटविषादक ।
मामुद्धर दयाम्भोधे त्रिपुरघ्नान्तकान्तक ।।६७।।

शालवेश जगन्नाथ सर्वभूतहिते रत !
पाहि मां तरसाद् घोरात् दुष्टान्नाशय नाशय ।।६८।।

कालभैरव विश्वेश विश्वरक्षापरायण ।
रक्ष मूषकचौरेभ्यो धान्यराशिमिमं प्रभो ।।६९।।

पक्षिराज महादेव प्रणतार्तिविनाशन ।
तस्करेण हृतं वस्तु धृतं दापय दापय ।।७०।।

ये च मे वादिनो दिक्षु क्षुद्रोपद्रवकारकाः ।
सर्वाचारपरित्यक्ता मानहीनाश्च रोधकाः ।।७१।।

ते सर्वे शालवेशस्य मुशलायुधचूर्णिताः ।
नश्यन्तु निमिपार्द्धेन यवकाक्तलूनवत् ।।७२।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ये जनद्रोहिणोऽल्पाश्च तत्कालोचितभाषिणः ।
सत्कर्मविघ्नकर्तारः शान्तभर्त्सपरायणाः ॥७३॥

ते शालवेशहस्ताग्रखड्गनिर्भिन्नदेहिनः ।
पतन्तु भूतले याम्यां प्राणास्तेषां प्रयान्त्वलम् ॥७४॥

त्वदङ्घ्रिध्याननिर्दग्धा न्यायकोशार्थमन्त्रिणः ।
मह्यं द्रुह्यन्ति ये तेषां विभवानि क्षयंत्वलम् ॥७५॥

त्वदाचारपरं भक्तं साधकं मां विवेकिनम् ।
ये चाक्रामन्ति संग्रामे ते गच्छन्तु परा हताः ॥७६॥

त्वदीयेनैव मार्गेण संचरन्तं जयातुरम् ।
ये वदन्ति परीवादं भ्रान्ताः शीघ्रं भवन्तु ते ॥७७॥

त्वद्दासममलं वीरं यो मां तर्जयते बलात् ।
मनसाप्यनुमायेत तत्स्वान्तं भ्रश्यतु क्षणात् ॥७८॥

मनसा कर्मणा वाचा य इच्छन्ति तु दुःसहम् ।
ते महारोगशोकाद्यैः पतन्त्वाशु शिवाज्ञया ॥७९॥

मदीयानि यदर्थानि गृहीतुं योऽवलोकते ।
तत्क्षणादेव नष्टार्थो भवत्वाश्वीश्वराज्ञया ॥८०॥

मदीयं द्रव्यमादाय ये गच्छन्तीह तस्कराः ।
सिंहारिपाशसम्बद्धास्ते गच्छन्तु प्रदक्षिणम् ॥८१॥

सीमातीताश्च ये चौराः गृहीतद्रव्यसंचयाः ।
अवशावयवास्तेन न गच्छन्तु शिवाज्ञया ॥८२॥

तस्कराश्च मृगाः स्वात्तधान्यवस्त्रधनादिकाः ।
पक्षिराजपराक्रष्टाः समागच्छन्तु ते द्रुतम् ॥८३॥

समाहृतपदार्था ये देशातीताश्च तस्कराः ।
शरभेशहलाक्रष्टाः तस्यागच्छन्तु सानुगाः ॥८४॥

चौराः गृहीतुमुद्युक्ताः समागच्छन्ति मां गृहे ।
ते शालवेशपक्षोत्थवातैर्गच्छन्तु सत्वरम् ॥८५॥

शान्तं विवेकिनं भक्तं त्वदङ्घ्रिध्यानतत्परम् ।
द्रुह्यन्ति ये सहप्राणास्ते संयान्तु यमां पुरीम् ॥८६॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

षट्त्रिंशत्कोष्ठके यंत्रे रेखाशूलाग्रमध्यमे ।
स्वेच्छायंत्रं लिखित्वा तु जपेदाराध्यसाधकः ।।८७।।

उदङ्मुखः सहस्रं तु रक्षणाय जपेन्निशि ।
नष्टाहरणके पंचरात्रं पश्चिमदिङ्मुखः ।।८८।।

मारणे सप्तरात्रं तु दक्षिणाभिमुखो जपेत् ।
रोगनिग्रहणे चाष्टरात्रमाग्नेयदिङ्मुखः ।।८९।।

इति गुह्यं महामन्त्रं परमं सर्वसिद्धिदं ।
शरभेशाख्यकवचं चतुर्वर्गफलप्रदम् ।।९०।।

प्रत्यहः प्रतिपक्षं वा प्रतिमासमथापि वा ।
यो जपेत् प्रतिवर्षं वा वरेण्यः सःशिवो भवेत् ।।९१।।

एवं हि जपतः पुंसः पातकं चोपपातकम् ।
सर्वं विलयमाप्नोति रविणा तिमिरं यथा ।।९२।।

दशार्धं यो जपेन्नित्यं प्रातरुत्थाय साधकः ।
सर्वसिद्धिं समाश्रित्य देहान्ते स शिवो भवेत् ।।९३।।

त्रिकालं ध्यानपूर्वं तु जपन्द्वादशवार्षिकम् ।
कायेनानेन वै देही जीवन्मुक्तो भवेत्तु सः ।।९४।।

शतवारं जपेन्नित्यं मंडलं यो वरानने ।
सोऽणिमादिगुणान्प्राप्य विचरेत्स्वेच्छया सदा ।।९५।।

अतलादि धरण्यादि भुवनानि चतुर्दश ।
विचरेत्कामवित्सर्वैः पूज्यमानो यथासुखम् ।।९६।।

त्रिमासं यो जपेन्नित्यमष्टोत्तरसहस्रकम् ।
सहसा शरभेशस्य स्वरूपं लभतेऽम्बिके ।।९७।।

षण्मासं यो जपेदेवं प्रयतस्तु दृढव्रतः ।
मद्रूपधारकैर्मर्त्यैः सह सिद्धिप्रदायकः ।।९८।।

मम लोके तु सम्पूज्ये विष्णुलोके तथैव च ।
ब्रह्मलोके च रमते सर्वत्र न निवार्यते ।।९९।।

इन्द्राग्नियमयक्षेशजलेशपवनैः सदा ।
सोमेशानकलक्ष्मीशैर्दिशां पालैश्च पूज्यते ।।१००।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ग्रादित्यसोमपृथ्व्यंशबुधश्रीगुरुभार्गवैः ।
पूज्यते सग्रहै सर्वैः शनिराहुसकेतुभिः ।।१०१।।

ऋत्वङ्गिरपुलस्त्यैश्च पुलहात्रिमरीचिभिः ।
दक्षकश्यपभृग्वादियोगिभिश्च प्रपूज्यते ।।१०२।।

भैरवैर्वसुभिरुद्रैरादित्यैर्गणपत्यकैः ।
दिग्गजैश्च महानागैर्दिव्यास्त्रैर्दिव्यवाहनैः ।।१०३।।

माहेश्वरैर्महारत्नैः कामधेनुसुरद्रुमैः ।।
सरिद्भिः सागरैः शैलैर्देवताभिस्तपोधनैः ।।१०४।।

दानवैर्राक्षसैः क्रूरैः सिद्धगन्धर्वकिन्नरैः ।
यक्षैर्विद्याधरैर्नागैरप्सरोभिः प्रपूज्यते ।।१०५।।

ग्रपस्मारग्रहैर्भीमैरुत्पन्नैर्ब्रह्मराक्षसैः ।
वेतालैः खेचरैर्मन्त्रैः कूष्माण्डैर्राक्षसग्रहैः ।।१०६।।

बालवक्रतमोहारैः स्त्रीग्रहैः पापविग्रहैः ।
भूतप्रेतपिशाचाद्यैर्ग्रहैः सर्वैः स पूज्यते ।।१०७।।

ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्च जातिकैः ।
पशुपक्षिमृगव्यालैः पूज्यते सर्वजन्तुभिः ।।१०८।।

किमत्रबहुना देवि तवात्रेक्ष्य यथातथम् ।
मया च विष्णुना चैव विश्वकर्ता च पाल्यते ।।१०९।।

भवान्या च गिरा लक्ष्म्या ब्रह्माण्याद्यष्टमातृभिः ।
प्राणेश्वरादियोगीन्द्रैः योगिनीभिः स पाल्यते ।।११०।।

य इदं प्रजपेत्तस्य नासाद्यं किंच विद्यते ।
कवचेदं महामन्त्रं जपेत्तस्मादनुत्तमम् ।।१११।।

उच्चाटने मरुद्वक्त्रो विद्वेषे राक्षसाननः ।
प्राणान्मनोऽभिवृद्धौ तु सर्वेष्वीशानदिङ्मुखः ।।११२।।

यो जपेत्कवचं नित्यं त्रिकालं ध्यानपूर्वकम् ।
सर्वसिद्धिमवाप्नोति सहसा साधकोत्तमः ।।११३।।

।। श्री देव्युवाच ।।
देवदेव महादेव शिव कारुण्यवारिधे ।
पाहि मां प्रणतां स्वामिन् प्रसीद परमेश्वर ।।११४।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यत् कृत्यं न कृतं वेद कृत्यवदाचरन्ति ते ।
उभयो: प्रायश्चित्तं चेच्छिवनामेत्युच्चारितम् ।।११५।।

इति श्रीमदाकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शरभकवचम् ।। शुभं भूयात् ।। श्री ।।०

1098/177

ŚĀPAVIMOCHANA STOTRAM
शापविमोचनस्तोत्रम्

From—Kulachūḍāmaṇi
Foll. 3; 14.5 × 10.5 cms.; paper; lines per page 6; letters per line 11; Devanāgarī script; Sanskrit; 19th c.; presented by Gaṇeśa Lekhaka.

1064/143

ŚĀPAVIMOCHANA STOTRAM
शापविमोचनस्तोत्रम्

From—Kulachūḍāmaṇi.
Foll. 3; 13.5 × 10 cms.; paper; lines per page 7; letters per line 14; Devanāgarī script; Sanskrit; 19th c.; presented by Gaṇeśa, son of Chūniyā.

1333/413

ŚĀNTISTAVAḤ
शान्तिस्तव:

Foll. 7; 15.5 × 8.3 cms.; paper; lines per page 5; letters per line 15/16; Devanāgarī script; Sanskrit; 20th c.; incomplete.

1306/386

ŚĀNTISTAVAḤ
शान्तिस्तव:

Foll. 17; 15 × 8.3 cms.; paper; lines per page 3; letters per line 11/12; Devanāgarī script; Sanskrit; 1950 V. S. (1893 A.D.); Vaiśākha kṛṣṇa 10; scribe—Govindarāma.

Begins :— ।।श्रीगणेशाय नम: ।। अथ शान्तिस्तव: यथा—
जयन्तु देव्यो हरपादपङ्कजं प्रसन्नधामामृतमोक्षदायकम् ।
अनन्तसिद्धान्तमतिप्रबोधनं नमामि चाष्टाष्टकयोगिनीगणम् ।।१।।

योगिनीचक्रमध्यस्थं मातृमण्डलवेष्टितम् ।
नमामि शिरसा नाथं भैरवं भैरवीप्रियम् ।।२।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आपदो दुरितं रोगा. समयाचारलङ्घनात् ।
ये ते सर्वे व्यपोहन्तु दिव्यचक्रस्य मेलनात् ।।३।।

आयुरारोग्यमैश्वर्यं कीर्तिर्लाभो जयः सुखम् ।
कान्तिर्मनोरथश्चास्तु पान्तु सर्वाश्च देवताः ।।४।।

सम्पूजकानां परिपालकानां यतीन्द्रयोगीन्द्रतपोधनानाम् ।
देशस्य राष्ट्रस्य कुलस्य राज्ञः करोतु शान्तिं भगवान्कुलेशः ।।५।।

नन्दन्तु षड्विधकुलान्वयदर्शना ये
सिंहासनाध्युषितशाक्तमहान्वया ये ।
नन्दन्तु सर्वकुलकौलरताः परा ये
चान्ये विशेषपदसाधकशाम्भवा ये ।।६।।

नन्दन्तु सिद्धगुरवस्तदनुक्रमौघा
ज्येष्ठानुगाः समयिनो बटुकाः कुमार्यः ।
षड्योगिनीप्रवरवीरकुले प्रसूता
नन्दन्तुभूमिपतयो द्विजसाधुलोकाः ।।७।।

नन्दन्तु नीतिनिपुणा निरवद्यनिष्ठा
निर्मत्सरा निरुपमा निरुपद्रवाश्च ।
नित्यं निरञ्जनरता गुरवो निरीहाः
शान्ताश्च शान्तमनसो हतशोकशङ्काः ।।८।।

नन्दन्तु योगनिरताः कुलयोगनिष्ठा
आचार्यसामयिकसाधकपुत्रकाश्च ।
गावो द्विजा युवतयो बटुकाः कुमार्यो
धर्मं चरन्तु सततं गुरुभक्तियुक्ताः ।।९।।

नन्दन्तु साधककुलान्यणिमादिसिद्धाः
शापाः पतन्तु समयद्रुहियोगिनीनाम् ।
सा शाम्भवी स्फुरतु काऽपि ममाप्यवस्था
यस्यां गुरोश्चरणपङ्कजमेव लभ्यम् ।।१०।।

याश्चक्रक्रमभूमिका वसतयो नाडीषु याः संस्थिताः
याः कायोद्गतरोमकूपनिलया याः संस्थिता धातुषु ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उच्छ्वासोर्मिमरुत्तरङ्गनिलया निःश्वासवाताश्रया–
स्ता देव्यो रिपुपक्षभक्षणपरास्तृप्यन्तु कौलार्चिताः ।।११।।

या देव्यः कुलसम्भवाः क्षितिगता या देवतास्तोयगा
या नित्यप्रथितप्रभाः शिखिगता या मातरिश्वाश्रयाः ।
या व्योमाहितमण्डलामृतगता याः सर्वगाः सर्वदा
ताः सर्वाः कुलमार्गपालनपराः शान्तिं प्रयच्छन्तु मे ।।१२।।

ब्रह्मश्रीशेषदुर्गागुहवटुकगणा भैरवः क्षेत्रदिक्पा
वेतालादित्यरुद्राग्रहमनुवसुसिद्धाप्सरोगुह्यकाद्याः ।
भूता गन्धर्वविद्याधरपितृमुनियक्षासुराः किन्नरा ये
योगीशाश्चारणाः किम्पुरुषनरवराश्चक्रगाः पान्तु सर्वे ।।१३।।

देहस्थाखिलदेवता गजमुखाः क्षेत्राधिपा भैरवा
योगिन्यो बटुकाश्च सिद्धपितरो भूताः पिशाचा ग्रहाः ।
अन्ये भूचरदिक्चराश्च खचरा वेतालकाश्चेटका-
स्तृप्ताः स्युः कुलपुत्रकस्य पिबतः पानं सदीपं चरुः ।।१४।।

968/47

ŚILĀMAYISTOTRAM
शिलामयिस्तोत्रम्

Foll. 3; 18.5 × 10 cms.; paper; lines per page 6; letters per line 22; Devanāgarī script; Sanskrit; 20th c.

1015/94

ŚILĀMAYISTOTRAM
शिलामयिस्तोत्रम्

Foll. 3; 16 × 10 cms.; paper; lines per page 7; letter per line 14; Devanāgarī script; Sanskrit; 19th c.; scribe— Māṅgīrāma.

Begins :— त्वमेव विश्वरक्षिणी समस्तदेवतामयी
अनेक-दैत्यभक्षिणी प्रचण्डचण्डिकामयी ।
जगत्परम्परामयी त्वमम्बिका शिलामयी ।।१।।

हरिप्रिया श्रिया सदा चिदात्मब्रह्मभामयी
अखण्डमण्डला पदा दिवाकरप्रभामयी ।
अनेकमंत्रतंत्रयंत्रमातृकाक्षरामयी
जगत्परम्परामयी त्वमम्बिका शिलामयी ।।२।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जगत्त्रयार्तिहारिणी अनन्तअस्त्रजामयी
प्रपञ्चतत्त्वकारिणी समस्तभूतजामयी ।
त्वमम्ब ! विष्णुतारिणी कुलाकुलं कुलामयी
जगत्परम्परामयी त्वमम्बिका शिलामयी ।।३।।

ज्वलत्कलापकालिका कपालिका कलामयी
समस्तलोकपालिका सुबालिका वलामयी ।
जगत्परम्परामयी त्वमम्बिका शिलामयी ।।४।।

सुरामुखैकचन्द्रभा शवासना रमामयी
पुरा निशुंभशुंभहा सुरेन्द्रसिद्धिदायिनी ।
वराभया विमुक्तिदा करामरासुरामयी
जगत्परम्परामयी त्वमम्बिका शिलामयी ।।५।।

कृपाणचक्रधारिणी त्रिशूलचर्मसामयी
सबाणदण्डपाणिनी दुकूलरक्तभामयी ।
सुरारिमाहिषोन्मूलमस्तका निरामयी
जगत्परम्परामयी त्वमम्बिका शिलामयी ।।६।।

सुश्यामगात्रपाणिपात्ररक्तपानयामयी
अनेकमुण्डखण्डगात्रमुक्तिदानवामयी ।
महासुभट्टचण्डरक्तबीजबीजहामयी
जगत्परम्परामयी त्वमम्बिका शिलामयी ।।७।।

कपालचक्रमण्डिता कपालकोटिकामयी
कपालसिद्धिखण्डिता कपालभोजनामयी ।
कपालदुर्गखण्डिता कपालकज्जलामयी
जगत्परम्परामयी त्वमम्बिका शिलामयी ।।८।।

त्रयात्मशक्तिकात्र या सुरत्रया सुधामयी
गुणत्रयात्मकप्रिया पुरारिब्रह्मसामयी ।
मुनीन्द्रदुःखहा सदा सुभक्तितानमामयी
जगत्परम्परामयी त्वमम्बिका शिलामयी ।।९।।

इति शिलामातास्तोत्रं समाप्तम् ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1143/222 **ŚILĀMAYĪDAŚAKAM**

शिलामयीदशकम्

Author :– Datta, son of Prayāga.

Foll. 4; 16×7.5 cms.; paper; lines per page 6; letters per line 22; Devanāgarī script; Sanskrit; 19th c.; presented by Bālabakas Lekhaka; date of composition 1723 V. S. (1666 A.D.)

Begins :— ।। श्रीगणेशाय नमः ।।

स्वर्णच्छत्रकिरीटकुण्डलधरा मुक्ताफलैः शोभिता
चन्द्रार्धाङ्कितशेखरेन्दुरविवह्न्युद्भासिनेत्रत्रया ।
पूर्णेन्दोः सदृशानना सुदशना जिह्वामृतास्वादिनी
रम्या वक्रशिरा शिलामयि सदा त्वं मे प्रसन्ना भव ।।१।।

चापोद्यद् भृकुटीधराऽमृवदना[1] भक्तिप्रिया भूमिपैः
सेव्या वा नवयौवना शशिमुखी दिव्याम्बरालङ्कृता ।
कण्ठे हारमनोहरा कटितटे रत्नोज्ज्वलन्मेखला
श्यामाङ्गी गिरिजा शिलामयि सदा त्वं मे प्रसन्ना भव ।।२।।

दक्षे खड्गधरा सुशक्तिसहिता बाणैर्युता चक्रधृत्–
सव्ये चर्मशरासने विदधती मुण्डं तथा तर्जनीम् ।
शार्दूलेन सितांशुनातिबहुशो दैत्येन्द्रपीताऽभवद्
रक्तेनातिभटे शिलामयि सदा त्वं मे प्रसन्ना भव ।।३।।

मातर्माहिषमर्द्दिनी त्वमसि त्वं धूम्राक्षनिर्णाशिनी
चण्डघ्नी खलु मुण्डमुण्डहरिणी त्वं रक्तबीजाशिनी ।
कोपात् सद्य निशुम्भ-शुम्भदलिनी त्वं कालिका चण्डिका
चामुण्डा वरदा शिलामयि सदा त्वं मे प्रसन्ना भव ।।४।।

दुर्गे दुष्कृतदुष्टदैत्यदलिनी दुःस्वप्नविध्वंसिनी
दुःखघ्नी रिपुमर्द्दिनी जननि सद्भक्तार्तिविद्राविणी ।
दारिद्र्यव्रजनाशिनी महिषहृच्छूलाग्रतश्च्छेदिनी
खड्गान् मुण्डधरा शिलामयि सदा त्वं मे प्रसन्ना भव ।।५।।

---

१. अमृवदना = प्रफुल्लवदना

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मातर्मां परिपाहि विश्वजननि दृष्ट्वातिदीनार्दितं
दारिद्र्यग्रसितं यशोमतिसुते त्वत्पार्श्वमासंश्रितम् ।
दानं देह्यपराजिते अभयकं मां बालकं पालय
दासोऽहं धनदे शिलामयि सदा त्वं मे प्रसन्ना भव ॥६॥

भीतौ पाहि भयात् सरस्वति शिवे प्रोद्दामजन्तूद्भवात्-
च्छत्राच्छत्रुगणात्तथा विषजलाग्निभ्यश्च चौरग्रहात् ।
नागात् सिंहसरीसृपादिकवृकाद्यक्षात् पिशाचादिकात्
शत्रुघ्नी जननी शिलामयि सदा त्वं मे प्रसन्नाभव ॥७॥

श्रीमत्पादपयोजयुग्मनिरतोऽहं सर्वदा तेन मे
जातात्सत्सुतसम्पदादिविभवाद् धन्योऽस्मि भूमण्डले ।
त्वत्सेवानिरता जया च विजया ब्रह्मा गणेशेश्वरा
विष्णुस्कन्दसुराः शिलामयि सदा त्वं मे प्रसन्ना भव ॥८॥

अम्बेशेन सह स्थितिस्तव भवे ढुंढारदेशे शुभे-
ऽम्बावत्यां गिरिमस्तकेषु भवने पट्टाम्बराच्छादिते ।
वीरश्रीजयसिंहभूपभवने रम्ये शुभे मन्दिरे
स्तम्भाष्टार्द्ध मिते शिलामयि सदा त्वं मे प्रसन्ना भव ॥९॥

भक्तानन्दकरी भवाद्भयहरी सानन्दपूर्णेश्वरी
क्षिप्रं भक्तभवार्तिभञ्जनकरी ब्रह्माण्डभाण्डोदरी ।
सद्भक्तैः परिपूर्णकल्पलहरीवागीश्वरी शाङ्करी
नित्यानन्दकरी शिलामयि सदा त्वं मे प्रसन्ना भव ॥१०॥

देव्याः पादरजोमिलिन्दमनसा दत्तेन सम्भाषितं
एतत्स्तोत्रमिदं शिलासुदशकं भक्त्या स्मरेत्सन्निधौ ।
तस्मै सत्सुतपुत्रदारधनवाक् कीर्तिश्चिरायुर्यशः
दद्यात्स्तोत्रमिदं शिवे जननि त्वं मां पालये सर्वदा ॥११॥

त्रिद्विद्वीपधरामिते (१७२३) गतवति श्रीविक्रमार्काब्दतो
द्वेऽर्के सौम्यगते सिते हि दिवसे ज्येष्ठेऽम्बपुर्यां मया ।
दत्तेनाल्पधिया प्रयागशिशुना पुष्यार्कयोगे कृता
मातर्मां परिपाहि विश्वजननि विश्वम्भरिसन्निधौ ॥१२॥

मार्तण्डाभमयी सुधानिधिमयी विद्यामयी श्रीमयी
धर्मस्तोभमयी जनार्द्दनमयी सन्मन्त्रदीक्षामयी ।
तत्वज्ञानमयी सदाशिवमयी श्रेयोमयी सन्मयी
देवीशे ह्रि शिलामयी शिवमयी युष्माकमास्तां सदा ॥१३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इन्द्रोपेन्द्रमहेन्द्रवन्दितपदद्वन्द्वे जगन्मङ्गलं
सेवां शक्तिमयी सुदत्तविभवे कान्ते महेशप्रिये ।
सर्वाशापरिपूरकप्रकटिते शेषानुकम्पे शिवे
मात र्देवि शिलामयी शिवमयी युष्माकमास्तां सदा ॥१४॥

इति श्रीशिलामयिदशकं समाप्तम् ॥

1125/204

ŚILĀMAYYAṢṬAKAM

शिलामय्यष्टकम्

Author—Rūparatneśvara Bhaṭṭāchāryaḥ
Foll. 5; 11.7×8.5 cms.; paper; lines per page 6; letters per line 10; Devanāgarī script; Sanskrit; 19th c.; presented by Narsī Vyāsa.

Begins :— ॥ श्रीगणेशाय नमः ॥ श्रीशिलामय्यै नमः ॥

सुरासुरशिरोमणिद्युतिविराजपादाम्बुजे
लसज्जलदसद्युते स्मितशोभिवक्त्राम्बुजे ।
प्रसीद मयि पामरे विकलमानसे कातरे
शिलामयि कृपामयि भव भवानि वाञ्छाप्रदे ॥१॥

दुरन्तदनुजस्रवद्रुधिरमौलिमाले शिवे
धराधरसुते जगत्त्रितयरक्षणे दक्षिणे ।
क्षपाकरकलाधरे मयि भुजिष्यदासे द्रुतं
शिलामयि कृपामयि भव भवानि वाञ्छाप्रदे ॥२॥

परापरतरेऽनघे दुरितसद्यविद्राविणि
गुणत्रयविवर्जिते गुणगणैकवासे ध्रुवे ।
शिवोरसि कृतास्पदे परमपाविनि त्राहि मां
शिलामयि कृपामयि भव भवानि वाञ्छाप्रदे ॥३॥

हिमांशुरजतप्रभे निजमृगेन्द्रपृष्ठे पदं
निधाय महिषे पदं परमकोपरक्तेक्षणे ।
निहत्य महिषासुरं सफलितेन्द्रवाञ्छाभरे
शिलामयि कृपामयि भव भवानि वाञ्छाप्रदे ॥४॥

त्रिशूलमुसलाङ्कुशान् फलकखड्गचापाशुगान्
गदां दनुजघातिनीं करतलैर्दधाने शिवे ।
मदारुणितलोचने प्रणतलोकशोकापहे
शिलामयि कृपामयि भव भवानि वाञ्छाप्रदे ॥५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निशुम्भभूरधिक्रमं समरसीम्नि शुम्भासुरं
निहत्य तदसृग्द्रवैः कलितकायशोभे शुभे ।
तडिद्वलिततोयदच्छविविडम्बिकायच्छदे
शिलामयि कृपामयि भव भवानि वाञ्छाप्रदे ॥६॥

प्रतप्तकनकप्रभे रविशुची[1]न्दुनेत्रत्रये
सुवर्णमणिमौक्तिकग्रथितभूषणोद्भासिते ।
शिलोच्चयसुते शिलासदृशि मादृशे सेवके
शिलामयि कृपामयि भव भवानि वाञ्छाप्रदे ॥७॥

नमामि शिरसा मुहुर्जननि तावकीने पदे
पदं निजजनस्य मे वितर तारिणि त्राहि मां ।
लयामि विकलेन्द्रियो भवविरञ्चिविष्णुस्तुते
शिलामयि कृपामयि भव भवानि वाञ्छाप्रदे ॥८॥

इति श्रीरूपरत्नेश्वरभट्टाचार्यविरचितं शिलामय्यष्टकं समाप्तम् ।

1132/211 ŚILĀMAYYAṢṬAKAM

शिलामय्यष्टकम्

Foll. 4; 13×9 cms.; paper; lines per page 6; letters per line 14; Devanāgarī script; Sanskrit; 19th c.; presented by Narasimha Lekhaka.
Text is the same as in no. 968/47

1161/240 ŚILĀMAYYAṢṬAKAM

शिलामय्यष्टकम्

Author :—Rūparatneśvara Bhaṭṭācharyaḥ

Foll. 3; 16×10 cms.; paper; lines per page 7; letters per line 18; Devanāgarī script; Sanskrit; 19th c.

Text is the same as in no. 1125/204.

1145/221 ŚIVA-ĀRATĪ

शिवआरती

Foll. 3; 13.5×10.5 cms.; paper; lines per page 9; letters per line 20; Devanāgarī script; Sanskrit—Hindi; 19th c.; presented by Māṅgīrāma Lekhaka.

---

१. 'शुचिरप्पित्तमौर्वस्तु वाडवो वडवानलः' इत्यमरः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Begins :— ॐ नमः शिवाय, अथ शिवजी की आरती प्रारम्भ ।।
त्रिशूल चमकत गंगा खलकत पावक भाल महारमणं
बाहुभुजंग विराजत शंकर पन्नगभूषण आभरणं ।
कलमषमोचन सुंदर लोचन त्रास भयंकर दुखहरणं
जै अलष निरंजन भवदुखभंजन विश्वनाथ शंकर शरणम् ।।१।।

श्रवणे कुंडल शोभित मंडल मुद्रा झलकत गवरीशं
शीश जटा कुच कृष्ण लटा शुभ सुंदर मुकट महावदनं ।
मुंडनि माल तपै विधु भाल गले मृगछाल महारमणं
जै अलख निरंजन भवदुखभंजन विश्वनाथ शंकर शरणम् ।।२।।

दसभुज सोभित डमरू मोहित डिम डिम बाजत ध्वनि मधुरं
अंग विभूति रमी शिव शंकर स्फाटिक माल महा धरणं ।
मुनिजन ध्यान धरै शंकर भवसागर भवभयहरणं
जै अलख निरंजन भवदुखभंजन विश्वनाथ शंकर शरणम् ।।३।।

ध्यान धरै शिव योग करै प्रभु काल हरै यम कं [किं] करणं
पाप की ताप विदार करै शिव सुंदर वदन महामदनं ।
पंचवदन पंचादश नयनं मुनिजन शंकर सुखकरणं
जै अलख निरंजन भवदुखभंजन विश्वनाथ शंकर शरणम् ।।४।।

आदि अनादि भवादि महेश्वर ईश्वर ब्रह्म सदा परमं
जन्मरहित तुम मृत्युरहित शिव निर्गुणरूप सदा गवरं ।
रजनीनायक पवन दिवाकर पावक तेज तू ही अरुणं
जै अलख निरंजन भवदुखभंजन विश्वनाथ शंकर शरणम् ।।५।।

बाघम्बरधर कपालकरधर शिव हर शंकर अघहरणं
गवरीनंद लंबोदरकरचामर छत्रमहाज्वलनं ।
षडै [डा] नन वीर वीरभद्रादिक नंदीश्वरवाहन शरणं
जै अलष निरंजन भवदुखभंजन विश्वनाथ शंकर शरणम् ।।६।।

कैलासाचल मंदिर शोभित शोभित सुंदर अति भवनं
हिमगिरिनंदिनि अंगविराजित राजित शैलमहासिखरं ।
जै अलख निरंजन भवदुखभंजन विश्वनाथ शंकर शरणम् ।।७।।

गिड गिड ताल बजावत इं(द)र थेई थेई नाचत अप्सरणं
विष्नु सांग मृदंग बजावत धुधुकुट धुधुकुट अतिकरणं ।
ब्रह्मा वीण बजावत सुंदर मुनिजन विद्याधर रमणं
जै अलष निरंजन भवदुखभंजन विश्वनाथ शंकर शरणम् ।।८।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नारद आदि मुनीश्वर सेवित सेवित सेवितविष्णु समं
सिद्ध सुरासुर यक्ष खगेश्वर ईश्वर पूजित अति परमं ।
पक्ष प्रदोष सुरासुर आवत गावत देवि महारमणं
जै अलख निरंजन भवदुखभंजन विश्वनाथ शंकर शरणम् ।।६।।

।। इति आरती ।।

1035/114

ŚIVAJĪ KĪ ĀRATĪ
शिवजी की आरती

Foll. 3; 14.5×9.7 cms.; paper; lines per page 6; letters per line 17; Devanāgarī script; Sanskrit—Hindi; 20th c.

1137/216

ŚIVAKAVACHAM
शिवकवचम्

Foll. 4; 14×8.5 cms.; paper; lines per page 5; letters per line 17; Devanāgarī script; Sanskrit; 19th c.; presented by Gaṇeśa Brāhmaṇa.

Begins :— ।। श्रीगणेशाय नमः ।। सूत उवाच ।।

शिवस्य कवचं स्तोत्रं श्रूयतामिति शौनक ।
वसिष्ठेन च यद्दत्तं गन्धर्वाय च यो मनुः ।।

ॐ नमो भगवते स्वाहेति च मनुः ।
दत्तो वसिष्ठेन पुरा पुष्करे कृपया विभो ।।

अयं मन्त्रो रावणाय प्रदत्तो ब्रह्मणा पुरा ।
शम्भुना पञ्चबाणाय तथा दुर्वाससे पुरा ।।

मूलेन सर्वं देयञ्च नैवेद्यादिकमुत्तमम् ।
ध्यायेन्नित्याह्निकं ध्यानं वेदोक्तं सर्वसम्मतम् ।।

बाणासुर उवाच ।।

महेश्वर महाभाग कवचं यत्प्रकाशितम् ।
संसारपावनं नाम कृपया कथय प्रभो ।।

महेश्वर उवाच ।।

शृणु वक्ष्याम्यहं वत्स कवचं परमाद्भुतम् ।
अहं तुभ्यं प्रदास्यामि गोपनीयं सुदुर्लभम् ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पुरा दुर्वाससे दत्तं त्रैलोक्यविजयाय च ।
ममेदं कवचं भक्तया जनो यो धारयेत्सुधीः ।
जेतुं शक्नोति त्रैलोक्यं भगवानिव लीलया ।।

संसारपावनस्यास्य कवचस्य प्रजापतिः ।
ऋषिश्छन्दश्च गायत्री देवोऽहं च महेश्वरः ।।
धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः ।।

पञ्चलक्षजपेनैव सिद्धिदं कवचं भवेत् ।
यो भवेत् सिद्धकवचो मम तुल्यो भवेद्भुवि ।।

तेजसा सिद्धियोगेन तपसा विक्रमेण च ।
शम्भुर्मे मस्तकं पातु मुखं पातु महेश्वरः ।
दन्तपंक्तिं नीलकण्ठोऽप्यधरोष्ठं हरः स्वयम् ।

कण्ठं पातु चन्द्रचूडः स्कन्धं वृषभवाहनः ।
वक्षस्थलं नीलकण्ठः पातु पृष्ठं दिगम्बरः ।।

सर्वाङ्गं पातु विश्वेशः सर्वदिक्षु च सर्वदा ।
स्वप्ने जागरणे चैव स्थाणुर्मेऽवतु संततम् ।।

इति ते कथितं बाण कवचं परमाद्भुतं ।
यस्मै कस्मै न दातव्यं गोपनीयं प्रयत्नतः ।।

यत्फलं सर्वतीर्थानां स्नानेन लभते नरः ।
तत्फलं स लभेन्नूनं कवचस्यैव धारणात् ।।

इति शिवकवचं सम्पूर्णम्

1170/249

ŚIVAKAVACHAM
शिवकवचम्

Foll. 3; 13.5×8 cms.; paper; lines per page 6; letters per line 14; Devanāgarī script; Sanskrit; 19th c.; presented by Gaṇeśa Brāhmaṇa Lekhaka.

981/60

ŚIVAKAVACHAM
शिवकवचम्

From—Siddhasārasvata tantra

Foll. 7; 15.5×11 cms; paper; lines per page 6; letters per line 18; Devanāgarī script; Sanskrit; 20th c.; scribe—Kānhā paṇḍita.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1055/134

ŚIVAKAVACHAM
शिवकवचम्

From—Mṛtasañjīvanī kalpa

Foll. 8; 16.5 × 10.5 cms.; paper; lines per page 6; letters per line 15/16; Devanāgarī script; Sanskrit; presented by Ghanaśyāma Lekhaka.

Begins :— ।। श्रीगणेशाय नमः ।। ॐ अस्य श्रीमृतसंजीवनीमहामन्त्रस्य वसिष्ठ ऋषिः विराट् छन्दः मृतसंजीवनो महारुद्रो देवता ॐ भूर्भुवः स्वः व्यञ्जनानि बीजानि स्वराः शक्तयः मृतसंजीवन-महारुद्रप्रीत्यर्थे जपे विनियोग ।। ॐ हौं ॐ जूँ ॐ सः अङ्गुष्ठाभ्यां नमः ॐ भूः ॐ भुवः ॐ स्वः तर्जनीभ्यां नमः ॐ ह्रीं ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनं मध्यमाभ्यां नमः ॐ उर्वारुकमिव-बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॐ ह्रीं अनामिकाभ्यां नमः स्वाहा कनिष्ठिकाभ्यां नमः ॐ हौं ॐ जूं ॐ सः स्वाहा करतल-करपृष्ठाभ्यां नमः ।। एवं हृदयादि । मूलेन व्यापकं ।। ध्यानं ।।

ऊर्ध्वाधोमुखपद्मान्तः स्थितं मृत्युञ्जयेश्वरम् ।
वन्दे मृत्युप्रहर्तारं चन्द्रकोटिसुशीतलम् ।।१।।

एवमाराध्य गौरीशं देवं मृत्युञ्जयेश्वरम् ।
मृतसंजीवनं नाम कवचं पूजयेत्सदा ।।२।।

सारात्सारतरं पुण्यं गुह्याद्गुह्यतरं शुभम् ।
महादेवस्य कवचं मृतसंजीवनाह्वयम् ।।३।।

समाहितमना भूत्वा श्रृणुष्व कवचं शुभम् ।
श्रुत्वैतद्दिव्यकवचं रहस्यं कुरु सर्वदा ।।४।।

वराभयकरो यज्वा सर्वदेवनिषेवितः ।
मृत्युञ्जयो महादेवः प्राच्यां मां पातु सर्वदा ।।५।।

दधानः शक्तिमभयं त्रिमुखः षड्भुजः प्रभुः ।
सदा शिवोऽग्निरूपो मामाग्नेयां पातु सर्वदा ।।६।।

अष्टादशभुजोपेतो दंष्ट्राऽभयकरो विभुः ।
यमरूपो महादेवो दक्षिणस्यां सदावतु ।।७।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

खड्गाऽभयकरो वीरो रक्षोगणनिषेवितः ।
रक्षो रूपो महेशो मां नैर्ऋत्यां सर्वदावतु ॥८॥

पाशाभयभुजो सर्वरत्नाकरनिषेवितः ।
वरुणो मे महादेवः पश्चिमे मां सदावतु ॥९॥

गदाभयकरः प्राणदायकः सर्वदागतिः ।
वायव्यां मरुतात्मा मां शङ्करः पातु सर्वदा ॥१०॥

शंखाभयकरस्थो मां नायकः परमेश्वरः ।
सर्वात्मोत्तरदिग्भागे पातु मां शंकरः प्रभुः ॥११॥

शूलाभयकरः सर्वः सर्वविद्याधिनायकः ।
ईशानात्मा तथैशान्यां पातु मां परमेश्वरः ॥१२॥

ऊर्ध्वभागे ब्रह्मरूपो विश्वात्माधः सदावतु ।
शिरो मे शंकरः पातु ललाटं चन्द्रशेखरः ॥१३॥

भ्रूमध्यं सर्वलोकेशस्त्रिनेत्रो लोचनेऽवतु ।
भ्रूयुग्मं गिरिशः पातु कर्णौ पातु महेश्वरः ॥१४॥

नासिकां मे महादेवः ओष्ठौ पातु वृषध्वजः ।
जिह्वां मे दक्षिणामूर्तिर्दन्तान्मे गिरिशोऽवतु ॥१५॥

मृत्युञ्जयो मुखं पातु कण्ठं मे नागभूषणः ।
पिनाकी मत्करौ पातु त्रिशूली हृदयं मम ॥१६॥

पञ्चवक्त्रः स्तनौ पातु उदरं जगदीश्वरः ।
नाभिं पातु विरूपाक्षः पार्श्वौ मे पार्वतीपतिः ॥१७॥

कटिद्वयं गिरीशो मे मेढ्रं मे प्रमथाधिपः ।
गुह्यं महेश्वरः पातु ममोरू पातु भैरवः ॥१८॥

जानुनी मे जगद्धर्ता जंघे मे जगदन्तकः ।
पादौ मे सततं पातु लोकवन्द्यः सदाशिवः ॥१९॥

गिरिशः पातु मे भार्यां भवः पातु सुतान् मम ।
मृत्युञ्जयो ममायुष्यं वित्तं मे गणनायकः ॥२०॥

सर्वांगं मे सदा पातु कालं कालमतः शिवः ।
एतत्ते कवचं पुण्यं देवतानां च दुर्लभम् ॥२१॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मृतसंजीवनं नाम्ना महादेवेन कीर्तितम् ।
सहस्रावर्तनं चास्य पुरश्चरणमीरितम् ।।२२।।

यः पठेत् शृणुयान्नित्यं श्रावयेत्सुसमाहितः ।
सोऽकालमृत्युं निर्जित्य सदायुष्यं समश्नुते ।।२३।।

हस्तेन वा पदा स्पृष्ट्वा मृतान्संजीवयत्यसौ ।
आधयो व्याधयस्तस्य न भवन्ति कदाचन ।।२४।।

कालमृत्युमपि प्राप्तमसौ जयति सर्वदा ।
अणिमादिगुणैश्वर्यं लभते मानवोत्तमः ।।२५।।

युद्धारम्भे पठित्वेदं अष्टाविंशतिवारकम् ।
युद्धमध्ये स्थितं शत्रुसंघः सर्वो न पश्यति ।।२६।।

ब्रह्मादीनां न चास्त्राणि क्षयं कुर्वंति तस्य वै ।
विजयं लभते देव युद्धमध्येऽपि सर्वदा ।।२७।।

प्रातरुत्थाय सततं यः पठेत् कवचं शुभम् ।
अक्षयं लभते सौख्यं इह लोके परत्र च ।।२८।।

सर्वव्याधिविनिर्मुक्तः सर्वरोगविवर्जितः ।
अजरामरणो भूत्वा सदा षोडशवार्षिकः ।।२९।।

विचरत्यखिलाँल्लोकान प्राप्य भोगाँश्च दुर्लभान् ।
तस्मादिदं महागोप्यं कवचं समुदाहृतम् ।।३०।।

मृतसंजीवनं नाम दैवतैरपि दुर्लभम् ।।

इति वसिष्ठविरचितं मृतसंजीवनोकल्पे षष्ठः कल्पः ।।श्रीदेवाय नमः । दशकत घनश्याम का ।

971/50

ŚIVATĀṆḌAVA CHANDRIKĀ
शिवताण्डवचन्द्रिका

Foll. 16; 28 × 13.5 cms.; paper; lines per page 11/12; letters per line 30/32; Devanāgarī script; Sanskrit; text complete; ct. slightly incomplete. A commentary on Śiva tāṇḍava—stotra.

974/53

ŚIVATĀṆḌAVASTOTRAM
शिवताण्डवस्तोत्रम्

Foll. 5; 15 × 11 cms.; paper; lines per page 7; letters per line 13; Devanāgarī script; Sanskrit; 19 9V.S. (1862A.D.); scribe—Māṅgirāma.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1008/87

ŚIVATĀṆḌAVA STOTRAM
शिवताण्डवस्तोत्रम्

Author :—Rāvaṇaḥ

Foll. 4; 16.5×10.5 cms.; paper; lines per page 6; letters per line 16; Devanāgarī script; Śanskrit; 20th c.; scribe—Māṅgīrāma Lekhaka.

1071/150

ŚIVATĀṆḌAVASTOTRAM
शिवताण्डवस्तोत्रम्

Author :—Rāvaṇaḥ

Foll. 2; 21×9.5 cms.; paper; lines per page 7; letters per line 31/32; Devanāgarī script; Sanskrit; 18tb c.; old; stray leaves.

Two extra verees are given on the back :—

वाणी ते मुखमुत्तराधरतटे पीयूषधारा कृता
बाहू द्वौ तव पाणिपल्लवलसत्कल्पद्रुमौ कल्पितौ ।
तच्छाया भवदाश्रिता: सुमनसस्तन्मोदमाना यत:
स्व: सम्पद्भिरलङ्कृतोऽसि विधिना भूपाल भूमावपि ।।१।।

इत्येवं सुकृतेन निश्चितमति: केनाविरासीद्यदा
श्रायास्यन्नभवंस्तदादिभवतः श्रीमत्सकाशं ततो ।
लब्धं चापि तदद्य नन्ववगतं पुण्यं तु पूर्वाज्जितं
दैन्यं मे तदपीश दृक्पथमथो चित्रं चरित्रं प्रभो ।।२।।

1177/256

ŚIVATĀṆḌAVA STOTRAM
शिवताण्डवस्तोत्रम्

Foll. 1; 35.5×21.2 cms.; paper; lines 33 in all on both sides of the leaf; letters per line 25; Devanāgarī script; Sanskrit; 19th c.; presented by Prabhulāla Lekhaka.

1114/193

ŚIVANĀMĀVALĪ
शिवनामावली

Foll. 10; 10×7.5 cms.; paper; lines per page 5; letters per line 10; Devanāgarī script; Sanskrit; 19th c.; presented by Gaṇeśa, s/o Chūnyā Lekhaka.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1141/220 **ŚIVANĀMĀVALĪ**

शिवनामावली

Author :—Śaṅkarāchāyaḥ

Foll. 4; 16×6.5 cms.; paper; lines per page 4; letters per line 21/22; Devanāgarī script; Sanskrit; 19th c.; presented by Rāmakumāra Lekhaka.

Begins :— ।। श्री वरदमूर्तिर्जयति ।।

हे चन्दचूड़ मदनान्तक शूलपाणे
स्थाणो गिरीश गिरिजेश महेश शम्भो !
भूतेश भीतभयसूदन वामनाथ
संसारदुःखदहनाज्जगदीश रक्ष ।।१।।

हे पार्वतीहृदयवल्लभ चन्द्रमौले
भूताधिप स्मरहर त्रिदशाधिनाथ !
हे वामदेव भव रुद्र पिनाकपाणे
संसारदुःखदहनाज्जगदीश रक्ष ।।२।।

हे नीलकण्ठ वृषभध्वज पञ्चवक्त्र
लोकेश शेषवलय प्रमथेश शर्व ।
हे धूर्जटे पशुपते गिरिजापते मां
संसारदुःखदहनाज्जगदीश रक्ष ।।३।।

हे विश्वनाथ शिव शङ्कर देवदेव
गंगाधर प्रमथनायक नन्दिकेश ।
बाणेश्वरान्धकरिपो हर लोकनाथ
संसारदुःखदहनाज्जगदीश रक्ष ।।४।।

वाराणसीपुरपते मणिकर्णिकेश
वीरेशदक्षमखकाल विभो गणेश ।
सर्वज्ञ सर्वहृदयैकनिवास नाथ
संसारदुःखदहनाज्जगदीश रक्ष ।।५।।

श्रीमन्महेश्वर कृपामय हे दयालो
हे व्योमकेश शितिकण्ठ गणाधिनाथ ।
भस्माङ्गराग नृकपालकपालमाल
संसारदुःखदहनाज्जगदीश रक्ष ।।६।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कैलासपर्वतनिवास वृषाकपीश
मृत्युञ्जय त्रिनयन त्रिजगन्निवास ।
नारायणाभय दयामय शक्तिनाथ
संसारदुःखदहनाज्जगदीश रक्ष ।।७।।

विश्वेश विश्वभुवन शिव विश्वरूप
विश्वात्मक त्रिभुवनैकगुरो भवेश ।
हे विश्वबन्धुकरुणामय दीनबन्धो
संसारदुःखदहनाज्जगदीश रक्ष ।।८।।

गौरीविलासभवनाय महेश्वराय
पञ्चाननाय शरणागतकामदाय ।
सर्वाय सर्वजगतामधिपाय तस्मै
दारिद्र्यदुःखदलनाय नमः शिवाय ।।९।।

इति श्रीमच्छङ्कराचार्यविरचितं शिवनामावलिस्तोत्रं सम्पूर्णं ।।
शुभं भूयात् ।। श्रीः ।। श्रीः ।। श्रीः ।।

1281/361 (ŚIVA) NĀMĀVALI STOTRAM

(शिव) नामावलिस्तोत्रम्

Author—Śaṅkarāchāryaḥ

Foll. 2; 20×16.5 cms.; paper; lines per page 11; letters per line 11; Devanāgarī script; Sanskrit; 1926 V.S. (1869 A.D.), Chaitra Sudi 2, Monday; old. Text is the same as in the above.

1296/376 ŚIVANĀMĀṢṬOTTARA ŚATAKAM

शिवनामाष्टोत्तरशतकम्

Author :—Śrīkṛṣṇa Praśnavaraḥ

Foll. 2–4; 18.5×10 cms.; paper; lines per page 7; letters per line 21; Devanāgarī script; Sanskrit; 1921 V.S. (1864 A.D.), Chaitra Śuklā 13; damaged; an unserviceable copy with brittle leaves. It is preceded by राधाकृष्णसंगमः on f. 2; ff. 3-4 damaged.

977/56 ŚIVAPAÑCHĀKṢARA-NYĀSAḤ

शिवपञ्चाक्षरन्यासाः

Foll. 3; 16×10.3 cms ; paper; lines per page 6; letters per line 17; Devanāgarī script; Sanskrit; 20th c.; scribe-Paramānanda Jujabandha (binder)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1182/261 **ŚIVAPAÑCHĀKṢARANYĀSĀḤ**

शिवपञ्चाक्षरन्यासा:

Foll. 4; 12.5×8 cms; paper; lines per page 6; letters per line 12; Devanāgarī script; Sanskrit; 19th c.; presented by Māṅgīrāma Lekhaka.

985/64 **ŚĪVPAÑCHĀKṢARASTORAM**

शिवपञ्चाक्षरस्तोत्रम्

Foll. 3; 20.2×16 cms.; paper; lines per page 8; letters per line 10/11; Devanāgarī script; Sanskrit; 20th c.; scribe–Prabhulāla

1373/453 **ŚIVAPAÑCHĀKṢARA STOTRAM**

शिवपञ्चाक्षरस्तोत्रम्

Foll. 6; 17.4×9.5 cms.; paper; lines per page 4; letters per line 16; Devanāgarī script; Sanskrit; 1943 V.S. (1886 A.D.), Bhādrapada Śuklā 2; scribe-Govindarāma.

1090/169 to 1093/172 **ŚIVA PAÑCHĀKṢARA STORTAM**

by Śaṅkarāchārya

शिवपञ्चाक्षरस्तोत्रं-शङ्कराचार्यकृतं

2. ŚIVAŚIVĀṢṬAKAM OR ARDHANĀRĪNATEŚVARA STOTRAM—

by Śaṅkarāchārya

शिवशिवाष्टकम् अर्द्धनारीनटेश्वरस्तोत्रम्-शङ्कराचार्यकृतम्

3. ŚIVAKṚTAM STOTRAM

from—Brahmottara khaṇḍa

शिवकृतं स्तोत्रम्-ब्रह्मोत्तरखण्डे

4. GAṄGĀṢṬAKAM

by Vālmiki

गङ्गाष्टकम्-वाल्मीकिकृतम्

5. MAṄGALĀṢṬAKAM

by Kālidāsa

मंगलाष्टकम्-कालिदासकृतम्

Foll. 8; 16.5×10.5 cms.; paper; lines per page 9; letters per line 22; Devanāgarī script; Sanskrit; 19th c.

In the end :—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पुत्र तत्र न वस्तव्यं यत्र नास्ति चतुष्टयम् ।
ऋणप्रदाता वैद्यश्च श्रोत्रियः सजला नदी ।।

1374/454 **ŚIVAPAÑCHĀKṢARĪ STOTRAM**
शिवपञ्चाक्षरी-स्तोत्रम्

Foll. 1; 34.5×10.8 cms.; paper; lines 46 in all on both sides; letters per line 10; Devanāgarī script; Sanskrit; 20th c.; 20 leaves pasted into one.

1273/353 **ŚIVAPŪJANA VIDHIḤ**
शिवपूजनविधिः

Foll. 3; 29.5×20 cms.; paper; lines per page 18; letters per line 20; Devanāgarī script; Sanskrit; 20thc. brittle. Compiled.

1025/104 **ŚIVAPRĀRTHANĀ**
शिवप्रार्थना

Foll. 4; 15.5×10 cms.; paper; lines per page 4; letters per line 14; Devanāgarī script; Sanskrit; 20th c.

Begins :— जय देव जगन्नाथ जय शङ्कर शाश्वत ।
जय सर्वसुराध्यक्ष जय सर्वसुरार्चित ।।१।।

Ends :— एवं हि प्रार्थयेद्देवं प्रदोषे गिरिजापतिम् ।
सर्वान् कामानवाप्नोति परत्रेह च मोदते ।।
इति शिवप्रार्थना ।।

1327/407 **(ŚIVA) MAHIMNAḤ STOTRAM**
(शिव) महिम्नः स्तोत्रम्

Foll. 10; 21×10.6; cms; paper; lines per page 6; letters per line 24; Devanāgarī script; Sanskrit.

Very well written within red, black and golden borders; a beautiful multicoloured painting (Jaipur school) of Śiva with five faces, Pārvatī, a devotee, the lion and the bull on the first cover page.

1259/339(2) **(ŚIVA) MAHIMNAḤ STOTRAM**
(शिव) महिम्नः स्तोत्रम्

Author :— Puṣpadanta
Foll. 1-20; 14×10.7 cms.; paper; lines per page 7; letters per line 12; Devanāgarī script; Sanskrit; 19th c.; bound.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1228/308(1) **(ŚIVA) MAHIMNAḤ STOTRAM**

(शिव) महिम्नः स्तोत्रम

Author :— Puṣpadanta

Foll. 1–35; 10.5×7.5 cms.; paper; lines per page 4; letters per line 8; Devanāgarī script; Sanskrit; 19th c.; bound.

1051/130 **(1) (ŚIVA) MAHIMNAḤ STOTRAM WITH CT.**

(शिव) महिम्नः स्तोत्रम् सटीकम्

by Puṣpadanta (पुष्पदन्त)

(2) NIRĀLAMBOPANIṢAT

निरालम्बोपनिषत्

Foll. (i) 1-19 (a), (ii) 19(b)–22; 19.5×12 cms.; paper; lines per page 8/9; letters per line 24/25; Devanāgarī script; Sanskrit; brittle; tripāṭha; presented by Kānhīrāma Paṇdita; Nirālambopaniṣat is एकपाठ

958/37 **ŚIVA MAHIMNAḤ STOTRAM WITH CT.**

शिवमहिम्नः स्तोत्रं सटीकम्

Author—Puṣpadanta

Foll. 19; 36×20.3 cms.; paper; lines per page 7; letters per line 26/27; Devanāgarī script; Sanskrit; 1951 V.S. (1894 A.D.) भूशरनवभू संवत्;

Scribe–Ladūrāma; total verses 40.

Colopon: – इति श्रीपुष्पदन्तविरचितं महिम्नाख्यं स्तोत्रं समाप्तं ।।
भूशरनवभू संवत् मार्गमासे सिते पक्षे पंचम्यां
रविवासरे लादूरामो लिलेख पुस्तकमिदम् ।। शुभम् ।।

1058/137 **ŚIVARĀMASTOTRAM**

शिवरामस्तोत्रम्

Author ;—Rāmānanda Sarasvatī

Foll. 2; 16·5×10 5 cms.; paper; lines per page 8; letters per line 20; Devanāgarī script; Sanskrit; 19th c.; presented by Chandalala Lekhaka.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Begins :— ।। श्रीगणेशाय नमः ।। शिवरामस्तोत्रं रामानन्दसरस्वति-
विरचितम् ।
शिव हरे शिव रामसखे प्रभो त्रिविधतापनिवारण हे प्रभो ।
अज जनेश्वर यादव पाहि मां शिव हरे विजयं कुरु मे वरम् ।।१।।

कमललोचन राम दयानिधे हरगुरो गजरक्षक गोपते ।
शिवतनो भव शङ्कर पाहि मां शिव हरे विजयं कुरु मे वरम् ।।२।।

स्वजनरञ्जन मङ्गलमन्दिरं भजति ते पुरुषः परमं पदम् ।
भवति तस्य सुखं परमद्भुतं शिव हरे विजयं कुरु मे वरम् ।।३।।

जय युधिष्ठिरवल्लभभूपते जय जयाजित पुण्यपयोनिधे ।
जय कृपामय कृष्ण नमोस्तु ते शिव हरे विजयं कुरु मे वरम् ।।४।।

भवविमोचन माधव मापते सुकविमानसहंस शिवारते ।
जनकजारत राघव रक्ष मां शिव हरे विजयं कुरु मे वरम् ।।५।।

अवनिमण्डलमङ्गल मापते निगमगीत गुणार्णव गोपते ।
जलदसुन्दर राम रमापते शिव हरे विजयं कुरु मे वरम् ।।६।।

द्रुपदजासुखदायकमव्ययं मकरकुण्डलशोभिमुखाम्बुजम् ।
मुहुरहं प्रणमामि रमापतिं शिव हरे विजयं कुरु मे वरम् ।।७।।

मृड महेश गिरीश पते विभो वृषभवाहन वेदमय प्रभो ।
गरुडवाहन पावन पाहि मां शिव हरे विजयं कुरु मे वरम् ।।८।।

पतितपावननाम दयालुता तव यशो विमलं परिगीयते ।
तदपि माधव मां किमुपेक्षसे शिव हरे विजयं कुरु मे वरम् ।।९।।

अमरदीपन देव रमापते विषमता त्वयि नास्ति घनोपमे ।
मयि कथं करुणा नहि जायते शिव हरे विजयं कुरु मे वरम् ।।१०।।

हनुमतःप्रिय तोषकर प्रभो सुरसरिद्घृतशेखर हे प्रभो ।।
मम विभो किमु विस्मरणं कृतं शिव हरे विजयं कुरु मे वरम् ।।११।।

नरहरे रतिरञ्जन सुन्दरं पठति यः शिव रामकृतं स्तवम् ।
वसति राम रमा च कराम्बुजे शिव हरे विजयं कुरु मे वरम् ।।१२।।

प्रातरुत्थाय यो भक्त्या पठेद् वै स्तोत्रमुत्तमम् ।
विजयो जायते तस्य विष्णुसालोक्यमाप्नुयात् ।।१३।।

इति श्रीरामानन्दसरस्वतिविरचितं शिवरामस्तोत्रं समाप्तम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1082/161

ŚIVAŚATANĀMA
शिवशतनाम

Foll. 6; 10×8 cms.; paper; lines per page 4; letters per line 11; Devanāgarī script; Sanskrit; 19th c., presented by Dāmodara Lekhaka.

Begins :— श्रीशिवाय नमः ।। गुरुरुवाच ।।

नाम्नां शतेन रुद्रोऽसौ स्तवनीयो यथाविधि ।
नमो रुद्राय भीमाय नीलकण्ठाय वेधसे ।।

कपर्दिने सुरेशाय व्योमकेशाय वै नमः ।
वृषध्वजाय सोमाय सोमनाथाय वै नमः ।।

दिगम्बराय भर्गाय उमाकान्त नमोऽस्तु ते ।
तपोमयाय व्याप्ताय शिपिविष्टाय वै नमः ।।

व्यालप्रियाय व्यालाय व्यालानां पतये नमः ।
महीधराय व्याघ्राय पशूनां पतये नमः ।।

त्रिपुरान्तकाय सिंहाय शार्दूलायर्षभाय च ।
मिताय मितनाथाय सिद्धाय परमेष्ठिने ।।

कामान्तकाय बुद्धाय बुद्धीनां पतये नमः ।
कल्याणाय विशिष्टाय शिष्टाय परमात्मने ।।

वेदाय वेदबीजाय वेदगुह्याय वै नमः ।
दीर्घाय दीर्घरूपाय दीर्घार्थाय महाय च ।।

नमो जगत्प्रतिष्ठाय व्योमरूपाय वै नमः ।
सर्वकृत् सुमहादैत्य-ग्रन्धकासुरभेदिने ।।

नीललोहितशुक्लाय चण्डमुण्डप्रियाय च ।
महेशाय नमस्तुभ्यं महादेव हराय च ।।

त्रिनेत्राय त्रिवेदाय वेदाङ्गाय नमो नमः ।
ग्रर्थाय ग्रर्थरूपाय परमार्थाय वै नमः ।।

विश्वरूपाय विश्वाय विश्वनाथाय वै नमः ।
शङ्कराय च कालाय कालावयवरूपिणे ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अरूपाय च सूक्ष्माय सूक्ष्मसूक्ष्माय वै नमः ।
श्मशानवासिने तुभ्यं नमस्ते कृत्तिवाससे ।।

शशाङ्कशेखरायैव रुद्रभूमिश्रयाय च ।
दुर्गाय दुर्गसाराय दुर्गावयवसाक्षिणे ।।

लिङ्गरूपाय लिङ्गाय लिङ्गानां पतये नमः ।
नमः प्रणवरूपाय प्रणवार्थाय वै नमः ।।

नमो नमः कारणकारणाय ते
मृत्युञ्जयायात्मभवस्वरूपिणे ।

त्रैयम्बकायासितकण्ठभर्ग
गौरीपते मङ्गलहेतवे नमः ।।

इति शिवशतनाम ।

1106/185 **ŚIVAŚATANĀMA**

शिवशतनाम

Foll. 6; 10×8 cms.; paper; lines per page 4; letters per line 11; Devanāgarī script; Sanskrit; 19th c.; presented by Dāmodara Lekhaka.

1089/168 **ŚIVAŚATANĀMA STOTRAM**

शिवशतनामस्तोत्रम्

Foll. 4; 20.5×7.5 cms.; paper; lines per page 4; letters per line 22/23; Devanāgarī script; Sanskrit; 19th c. presented by Rāmaratna Lekhaka.

1021/100 **(i) ŚIVAṢAṬPADĪ**

(ii) PAÑCHADEVASTHĀPANAKRAMAḤ

शिवषट्पदी तथा पञ्चदेवस्थापनक्रमः

Author :—(1) Viṭṭhala Praśnavara

Foll. 4; 16.5×11 cms.; paper; lines per page 6; letters per line 13; Devanāgarī script; Sanskrit; 1922 V.S. (1865 A.D.) scribe—Kāhnā Paṇḍita.

Begins :— दुर्नयमपनय शम्भो वितरतु सुनीतिं महेश गौरीश ।
हर हर जननं मरणं शरणं भवतु त्वदीयचरणं मे ।।१।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भूषितनिजजनसमले भूषितनन्दीश्वरे मदीयहृद्यचले ।
स्यातां सुरतरुयमले वन्द्ये रम्ये गिरीशपदकमले ।।२।।

यद्यपि भेदो नोक्तस्तथापि नाथस्त्वमेव दासोऽहम् ।
इन्दोः प्रभा प्रसिद्धा प्राभेयः क्वापि नास्तीन्दुः ।।३।।

अयि गिरिजाहृदयेश प्रणयिनमचिरात् समुद्धर त्वं माम् ।
देव त्वयि प्रसन्ने न भवति भव किं भवस्य परिभावः ।।४।।

विषयाहिसङ्घभीतः क्रीतः कामेन मोहवशं नीतः ।
साधुजनैरवगीतः पाल्योऽहं ते सदा गुणातीत ।।५।।

शशिधर फणिभूषाधर गङ्गाधर हर गिरीन्द्रसूनुधर ।
नरयोषिद्विग्रहधर हर मम पापं परं पिनाकधर ।।६।।

गजमुखजनक सदाशिव शरणाकर वै त्वदीयपदकमले ।
इति षट्पदी मदीये वदनसरोजे सदा वसतु ।।७।।

य इमां षट्पदीं शम्भोर्विट्ठलेन विनिर्मिताम् ।
पठति श्रद्धया तस्य गृहे लक्ष्मी स्थिरा भवेत् ।।८।।

इति श्रीमत्प्रश्नवरव्यासविठ्ठलनाथविरचिता शाङ्करी षट्पदी समाप्ताऽभवत् ।।

on the last folio

	मध्ये	ऐशान्यां	आग्नेयां	नैऋत्यां	वायव्यां
शैवानां	शम्भुः	हरिः	इनः	हरभूः	देवी
वैष्णवानां	हरिः	शङ्करः	इभास्यः	इनः	अगसुता
शाक्तानां	देवी	विष्णुः	हरः	एकदन्तः	रविः
सौराणां	रविः	हरः	गणेशः	अजः	अम्बिका
गाणेशानां	लम्बोदरः	अजः	ईश्वरः	इनः	आर्या

निदर्शनचित्रमिदम् ।। संवत् १९२२, भाद्रसुदि १३

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1180/259

ŚIVA SAHASRANĀMA
शिवसहस्रनाम

Author :—Śivaḥ; from Śivarahasya
Foll. 28; 21.5 × 10 cms.; paper; lines per page—one name in a line; Devanāgarī script; Sanskrit; 19th c.

Begins : — ।।श्रीगणेशाय नमः।। हिरण्यबाहुरित्यादि नाम्नां शम्भुरहं ऋषिः अस्यानुष्टुप् रूपेण छन्दो भवति षण्मुखदेवताऽप्यहमेवात्र शक्तिर्गौरी मम प्रिया अहमेव सदा सेव्यः सर्वैरित्यहं कीलकं धर्मार्थकाममोक्षाणां फलदाता सदाशिवः ।।

Then one thousand names of शिव are given according to रुद्रपाठ; one name in a line e.g.

१–ॐ हिरण्यबाहवे नमः
२–ॐ सेनान्यै नमः
३–ॐ दिक्पतये नमः etc.

Ends :— एवमेतानि नामानि मुख्यानि मम षण्मुख ।
शुभदानि विचित्राणि गौर्यै प्रोक्तानि सादरम् ।।१।।

एतन्नामजपे योग्या विप्रा एव मुनीश्वराः ।
शुचिर्भूतः शिवपरो नान्यरोगादिमोहितः ।।२।।

विभूतिभूषिततनुः शुद्धो रुद्राक्षधारणः ।
शिवलिङ्गसमीपस्थो निःसङ्गो निर्जितासनः ।।३।।

एकाग्रचित्तो नियतो वशी भूतहिते रतः ।
शिवलिङ्गार्चको नित्यं शिवैकशरणः सदा ।।४।।

मम नामानि दिव्यानि यो जपेद् भक्तिपूर्वकम् ।
एवमुक्तगुणोपेत. स देवैः पूजितो भवेत् ।।५।।

संसारपाशसम्बद्धजनमोक्षैकसाधनम् ।
मन्नामस्मरणं नूनं तदेव सकलार्थदम् ।।६।।

मन्नामैव परं जाप्यमहमेवाक्षपार्थिवः[1] ।
अहमेव सदा सेव्यो ध्येयो मुक्त्यर्थमादरात् ।।७।।

विभूतिवज्रकवचैर्मन्नामशरपाणिभिः ।
विजयः सर्वतो लभ्यो न तेषां दृश्यते भयम् ।।८।।

---

1. इन्द्रियाणां स्वामी ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति श्रीशिवरहस्ये सप्तमांशे स्कन्दसदाशिवसंवादे शिवसहस्र-नामस्तोत्रं सम्पूर्णं श्रीकाशिविश्वेश्वरार्पणमस्तु ।।

1040/119 ŚĪVASAHASRANĀMA

शिवसहस्रनाम

From :—Dānadharma

Foll. 16; 17.5 × 9 cms; paper; lines per page 8; letters per line 21; Devanāgarī script; Sanskrit; 1921 V.S. (1864 A.D.) scribe-Ghanaśyāma Brāhmaṇa Pārāśara.

1012/91 ŚIVASAHASRANĀMA STOTRAM

शिवसहस्रनाम स्तोत्रम्

Form—Dānadharma

Foll. 16; 17.5 × 8.7 cms.; paper; lines per page 8; letters per line 22; Devanāgarī script; Sanskrit; 1921 V.S. (1864 A.D.); scribe-Ganaśyāma Pārāśara Brāhmaṇa.

1017/96 ŚIVASAHASRĀKṢARA-MANTRAḤ

शिवसहस्राक्षरमन्त्रः

Foll. 6; 18.5 × 9.3 cms.; paper; lines per page 6; letters per line 20; Devanāgarī script; Sanskrit; 1920 V.S. (1863 A.D.); scribe-Kāhna Paṇḍita.

1045/124 ŚIVASTUTIḤ (ŚIVA KEŚAVA STUTIḤ)

शिवस्तुतिः (शिवकेशवस्तुतिः) alias हरिहरात्मकस्तोत्रम्

From—Mārkaṇḍeya purāṇa-Adhyāya 119.

Foll. 9; 13 × 9.5 cms.; paper; lines per page 7; letters per line 12; Devanāgarī script; Sanskrit; 19th c.; presented by Kahnīrāma Paṇḍita.

1165/244 ŚIVASTUTIḤ

शिवस्तुतिः

From—Bhāgavata purāṇa (viii)

Foll. 6; 14.5 × 11.5 cms.; paper; lines per page 8; letters per line 15; Devanāgarī script; Sanskrit; 19th c.; presented by Chūnī lāla Lekhaka.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Begins :— वन्दे सुराणां सारं च सुरेशं नीललोहितम् ।
योगीश्वरं योगबीजं योगिनाञ्च गुरोर्गुरुम् ।।

1284/364

SIVASTUTIḤ
शिवस्तुति:

Foll. 7; 10×8.5 cms.; paper; lines per page 4; letters per line 11; Devanāgarī script; Sanskrit; 19th c.; presented by Rāmachandra Lekhaka.

Begins : - ।।श्रीगणेशाय नम:।।
गले कलितकालिमप्रकटितेन्दुभालस्थले
विनाटितजटोत्करं प्रकटपाणिपाथोरुहे ।
उदञ्चितकपालकं जघनसीम्नि संदर्शित-
द्विपाजिनमनुक्षणं किमपि धाम वन्दामहे ।।१।।

वृषोपरि परिस्फुरद्धवलधाम धामश्रिया
कुवेरगिरिगौरिमप्रभवगर्वनिर्वासिनम् ।
क्वचित्पुनरुमाकुचोपचितकुङ्कुमैरञ्जितं
गजाजिनविराजितं वृजिनभङ्गवीजं भजे ।।२।।

उदित्वरविलोचनत्रयविसृत्वरज्योतिषां
कलाकरकलाकरव्यतिकरेण चाहर्निशम् ।
विकसितजटाटवीविहरणोत्सवप्रोल्लस-
त्तरामरतरङ्गिणीतरलचूडमीडे मृडम् ।।३।।

विभूषणसुरापगाशुचितरालवालावली-
वलद्वहलशीकरप्रकरसेकसंवर्द्धिता
महेश्वरसुरद्रुमस्फुरितसज्जटामञ्जरी-
नमज्जनफलप्रदा तदिह किं न भूयामहे ।।४।।

विहाय कमलालयाविलसितानि विद्युन्नटी-
विडम्बनपटूनि मे विहरणं विधत्तां मन: ।
कपर्दिनिकुमुद्वतीरमणखण्डचूडामणौ
कटीतटपटी भवत्करटिचर्मणि ब्रह्मणि ।।५।।

भवद्भवनदेहलीविकटतुण्डदण्डाहति-
त्रुटन्मुकुटकोटिभिर्मघवदादिभि: सेविता: ।
भजेम भवदंतिकं प्रकृतिमेत्य पैशाचिकीं
किमित्यमरसंपद: प्रमथनाथ नाथामहे ।।६।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वहिर्विषयसंगतिप्रतिनिवर्तिताक्षावली
समाधिकलितात्मनो जातु हरः पातु मे मनो
मनोभवकथास्तु मे न च मनोरथातिथ्यभूः
स्फुरत्सुरतरङ्गिणीतटकुटीरकोटौ वसन् ।।७।।*

961/40 ŚIVASTOTRAM

शिवस्तोत्रम्

Author :—Vasiṣṭhaḥ

Foll. 3; 20.5×11 cms.; paper; lines per page 6; letters per line 23; Devanāgarī script; Sanskrit; 1946 V.S. (1889 A.D.); scribe Gaṇapati Lekhaka.

Begins :— ।। श्रीगणेशाय नमः ।।

विश्वेश्वराय नरकार्णवतारणाय
ज्ञानप्रदाय करुणामृतसागराय ।
कर्पूरकुन्द-धवलेन्दु-जटाधराय
दारिद्र्यदुःखदहनाय नमः शिवाय ।।१।।

गङ्गाधराय गजदानवमर्द्दनाय
लोकान्तकाय भुजगाधिपकङ्कणाय ।
गौरिप्रियाय शशिराजकलाधराय
दारिद्र्यदुःखदहनाय नमः शिवाय ।।२।।

बाणप्रियाय भवसागरनाशनाय
कामान्तकाय कमलाप्रियपूजिताय ।
नेत्रत्रयाय शुभलक्षणसंस्थिताय
दारिद्र्यदुःखदहनाय नमः शिवाय ।।३।।

भक्तप्रियाय भवरोगभयापहाय
दिव्याय दिव्यवसनाय गुणान्विताय ।
तेजोमयाय निखिलागमसंस्थिताय
दारिद्र्यदुःखदहनाय नमः शिवाय ।।४।।

पञ्चाननाय फणिराजविभूषिताय
स्वर्गापवर्गवरदाय विभूतिदाय ।
हेमाङ्गदाय भुवनत्रयवन्दिताय
दारिद्र्यदुःखदहनाय नमः शिवाय ।।५।।

* The correct reading of this verse may be seen ahead at no. 1020/99 on p. 215.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चर्माम्बराय सितभस्मविलेपनाय
भालेक्षणाय मणिकुण्डलमण्डिताय ।
मञ्जीरपादयुगलाय वृषध्वजाय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥६॥

रामप्रियाय रघुनाथवरप्रदाय
नागप्रियाय नगराजसुताप्रियाय ।
पुण्याय पुण्यचरिताय सुरार्चिताय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥७॥

मुक्ताय मोक्षफलदाय गणेश्वराय
गीतप्रियाय वृषभेश्वरवाहनाय ।
मातंगचर्मवसनाय महेश्वराय
दारिद्र्यदुःखदहनाय नमः शिवाय ॥८॥

वसिष्ठेन कृतं स्तोत्रं सर्वरोगनिवर्तनम् ।
सर्वकामप्रदं नराणां दुःखदारिद्र्यनाशनम् ॥९॥

इति श्रीवसिष्ठकृतं दारिद्र्यदुःखदहनं शिवस्तोत्रं संपूर्णम् ॥
भाद्रवा वदि ९ सं० १९४६ शु० गणपति नजर करी ॥

993/72 ŚIVASTOTRAM
Also known as
VIŚVEŚVAR ŚIVASTORAM

शिवस्तोत्रम्-विश्वेश्वर-शिवस्तोत्रं वा

Author—Vaṣiṣṭha Ṛṣiḥ

Foll. 3; 16 × 10 cms.; paper; lines per page 7; letters per line 17; Devanāgarī script; Sanskrit; 20th c.; scribe—Gopāla Brāhmaṇa.

Text same as in ms. no. 961/40.

995/74 ŚIVASTOTRAM

शिवस्तोत्रम्

From— Nandikeśvara purāṇa

Foll. 4; 16x10·5 cms ; paper; lines per page 5; letters per line 16; Devanāgarī script; Sanskrit; 20th c.; see text at no. 1158/237 on p–216–17.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1020/99

ŚIVASTOTRAM

शिवस्तोत्रम्

Author—Laṅkeśvaraḥ

Foll. 4; 16.5 × 10.5 cms.; paper; lines per page 6; letters per line 17; Devanāgarī script; Sanskrit; 20th c.; scribe—Gopāla Brāhmaṇa. From verse 1 to 6 text is the same as in ms. 1281/364 at page 212 and further it is as below :—

बहिर्विषयसङ्गतिप्रतिनिवर्तिताक्षावली
समाधिकलितात्मनः पशुपतेरशेषात्मनः ।
शिरः सुरसरित्तटी कुटिलकल्पकल्पद्रुमं
निशाकरकलामहं शिवं विमृश्यमानं भजे ।।७।।

त्वदर्चनपरायणप्रमथकन्यकालुण्ठित-
प्रसूनफलद्रुमं कमपि शैलमाशास्महे ।
अलं तटवितर्दिकामथितसिद्धसीमन्तिनी-
प्रकीर्णसुमनोमनोरमनमेऽरुणा मेरुणा ।।८।।

न जातु हर यातु मे विषयदुर्बलतां सम्मनो
मनोभवकथास्तु मे न च मनोरथातिथ्यभूः ।
स्फुरत्सुरतरङ्गिणीतटकुटीरकोटौ वसन्
नये शिव दिवानिशं भवभवानिपूजापरः ।।९।।

त्वदीयसुरवाहिनीविमलवारिधारावल-
ज्जटागहनगाहिनी मतिरियं ममाक्रामतु ।
उपोत्तमसरित्तटीविटपिताटवीसंवसत्
तदस्थिपरिषत्तुलामलमल्लिकाभ प्रभो ।।१०।।

इति श्रीलङ्केश्वरविरचितं शिवस्तोत्रं सम्पूर्णम् ।।

1044/123

ŚIVASTOTRAM

शिवस्तोत्रम्

Foll. 2; 20 × 10·5 cms ; paper; lines per page 7; letters per line 20; Devanāgarī script; Sanskrit; 19th c.; presented by scribe Ghanaśyāma Vyāsa

Text is the same as in 1138/217 प्रदोषसप्तकम् on page 107

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1080/159

ŚIVASTOTRAM

शिवस्तोत्रम्

Author :—Rāmajī

Foll. 4; 17 × 11 cms.; paper; lines per page 9; letters per line 16; Devanāgarī script; Sanskrit; 19th c.; presented by Narasī Lekhaka.

Begins :— ।। श्रीगणेशाय नमः ।।

सदाशिवं जगत्पतिं भुजङ्गमालिकाधरं
ललाटचन्द्रशेखरं उमापतिं दिगम्बरम् ।
जटातरंगगंगभालपावकं मनोहर-
महं भजामि शङ्करं नमामि अम्बिकेश्वरम् ।।१।।

सुरासुरैर्नमस्कृतं अखण्डब्रह्मशङ्करं
मुनीन्द्रसेन्द्रनन्दखण्ड[1] पूजितं जगद्गुरुम् ।
प्रकाशमानज्ञानदं भवं जगच्चराचर-
महं भजामि शङ्करं नमामि अम्बिकेश्वरम् ।।२।।

Ends :— इति कविरामजितः कृतिरतिरसिकेषु तनोतु विनोदं ।
हरचरणस्मरणामृतमज्जनजनितमपि च हृदि मोदम् ।।

।। श्रीः ।।   ।। श्रीः ।।   ।। श्रीः ।।

1158/237

ŚIVASTOTRAM

शिवस्तोत्रम्

Form :—Nandikeśvara purāṇa

Foll. 3; 16.5 × 10 cms.; paper; lines per page 7; letters per line 20/21; Devanāgarī script; Sanskrit; 19th c.;

Begins :— ।। श्री : ।।

ॐ कारे आद्यरूपे सुकृतबहुविधे श्वेतपीते च कृष्णे
नीले रक्ते कपोते तदुपरि हरिते सर्ववर्णे स्ववर्णे ।
प्राणापाने समाने विपरितकरणे व्यानउद्यानपीठे
एको व्यापी शिवोऽयं इति वदति हरिर्नास्ति देवो द्वितीयः ।।१।।

---

१ नन्दखण्ड = नवखण्ड ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पाताले चान्तरिक्षे दशदिशि गगने सप्तशैले समुद्रे
भस्मे काष्ठे च लोष्ठे क्षितिजलपवने स्थावरे जंगमे वा ।
बीजं सर्वोषधीनामसुरसुरपते पुष्पपत्रे तृणाग्रे
एको व्यापी शिवोऽयं इति वदति हरिर्नास्ति देवो द्वितीयः ।।२।।

शब्दे स्वादे च नादे रविशशिभुवने तारके ज्योतिरूपे
कामे क्रोधे विरोधे विहितहितजने हासक्रीडाविनोदे ।
जाग्रत्स्वप्ने सुषुप्तौ सत्वरजतमसे सर्वधर्मे तुरीये
एको व्यापी शिवोऽयं इति वदति हरिर्नास्ति देवो द्वितीयः ।।३।।

देवे दैत्ये मुनीन्द्रे ग्रहगणविषये सिद्धगन्धर्वयक्षे
योगे भोगे वियोगे प्रगुणितगुणिते बालवृद्धे तरुण्ये ।
वेदे शास्त्रे पुराणे बुधजनपठने न्यायतर्के मिमांसे
एको व्यापी शिवोऽयं इति वदति हरिर्नास्ति देवो द्वितीयः ।।४।।

शीते उष्णे च सौम्ये भवभ्रमगहने पुण्यपापे विकारे
द्वेषे रागे विरागे विकृतबहुगुणे कालरूपे त्रिकाले ।
सौख्ये दुःखे त्वमेक. स्फटिकमणिमये सर्वशुद्धे विशुद्धे
एको देवः शिवोऽयं इति वदति हरिर्नास्ति देवो द्वितीयः ।।५।।

स्थूले सूक्ष्मे समाने चलितदृढमते योगयुक्ते प्रसिद्धे
मन्त्रे पूर्ते प्रकारे षट्स्वरचलने सिद्धिभेदोपचारे ।
धूर्ते शान्तेऽभिचारे प्रहसितविमले केवले वीतरागे
एको देवः शिवोऽयं इति वदति हरिर्नास्ति देवो द्वितीयः ।।६।।

वृत्ते तीर्थेषु यज्ञे जपतपनियमे स्नानदाने विधाने
कर्ताकर्मकृतान्ते बहुमतविगते ज्योतिरूपे कृपालौ ।
कृमौ कीटे पतङ्गे पशुजनमशके चान्तरात्मन्यनेकः
एको देवः शिवोऽयं इति वदति हरिर्नास्ति देवो द्वितीयः ।।७।।

ज्ञाने ध्याने प्रवीणे प्रभवति परमे नास्ति रूपेऽवकारे
ब्रह्मा विष्णुश्च (?) रुद्रे अकुलकुलमये विश्वरूपे अतीते ।
मंत्रे तंत्रे उडीशे सुहृदि हितजने सर्वविद्ये गरीये (?)
एको देवः शिवोऽयं इति वदति हरिर्नास्ति देवो द्वितीयः ।।८।।

रत्ने यत्ने सुरक्षे मृदुमयकठिने वज्रसारे असारे
धूम्रे दीप्ते च ज्वाले असितद्युतिमये कौस्तुभे पारिजाते ।
यौद्धे बौद्धे सुशास्त्रे अजितजितमये उग्रतेजोविशाले
एको देवः शिवोऽयं इति वदति हरिर्नास्ति देवो द्वितीयः ।।९।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ध्याते ध्याने विजाने जयविजयकरे भावभावे विभावे
नामे रामाभिरामेऽमृतमय विष में लब्धचन्द्रे अलब्धे ।
स्वर्गे नर्के अनर्के अखिलखिलमये चेतचेते प्रचेते
एको व्यापी शिवोऽयं इति वदति हरिर्नास्ति देवो द्वितीयः ।।१०।।

इति नन्दिकेश्वरपुराणे शिवस्तोत्रं सम्पूर्णम् ।।

1179/258

ŚIVA STOTRAM
शिवस्तोत्रम्

Author :—Bṛhaspatiḥ

Foll. 4; 16.5×10 cms.; paper; lines per page 4; letters per line 15; Devanāgarī script; Sanskrit; 19th c.; presented by Bālabakasa Lekhaka.

Begins :— ।। श्रीगणेशाय नमः ।। बृहस्पतिरुवाच ।।
जय शङ्कर शान्त शशाङ्करुचे रुचिरार्थद सर्वद सर्वशुचे ।
शुचिदत्त गृहीत महोपहृते हृतभक्तजनोद्धततापतते ।।१।।

ततसर्वहृदम्बर वरदनते नतवृजिनमहावनदाहकृते ।
कृतविविधचरित्रतनो सुतनोऽतनुविशिखविशोषण धैर्यनिधे ।।२।।

निधनादिविवर्जित कृतनतिकृत् कृतिविहितमनोरथ पन्नगभृत् ।
नगभर्तृसुतार्पितवामवपुः स्ववपुःपरिपूरितसर्वजगत् ।।३।।

त्रिजगन्मयरूप निरूप सुदृक् दृगुदञ्चनकुञ्चनकृद्हुतभक् ।
भव भूतपते प्रमथैकपते पतितेष्वपि दत्तकरप्रसृते ।।४।।

प्रसृताखिलभूतलसंचरण प्रणवध्वनिसौधसुधांशुधर ।
धरराजकुमारिकया परया परित परितुष्ट नतोऽस्मि शिव ।।५।।

शिव देव गिरीश महेश विभो विभवप्रद ईश शिवेश मृड ।
मृडयोडुपतिध्र जगत्त्रितयं कृतयंत्रणभक्तिविघातकृताम् ।।६।।

न कृतान्तत एष विभेमि हर प्रहराशु महाघममोघमते ।
न मतांतरमन्यदवैमि शिव शिवपादनतेः प्रणतोऽस्मि ततः ।।७।।

विततेऽत्र जगत्यखिलेऽघहरं हरतोषणमेव परं गुणवत् ।
गुणहीनमहोनमहावलयं प्रलयान्तकमीश नतोऽस्मि ततः ।।८।।

इति बृहस्पतिकृतं शिवस्तोत्र सम्पूर्णम् ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

932/11 ŚIVASTOTRAM DAŚASLOKĪYAM

शिवस्तोत्रं दशश्लोकीयम्

Author :—Śāṅkarāchāryaḥ

Foll. 6; 20×9.5 cms.: paper; lines per page 3; letters per line 15; Devanāgarī script; Sanskrit; 20th c.;

Begins :— ।। श्रीगणेशाय नमः ।।
न भूमिर्न तोयं न तेजो न वायु–
र्न खं नेन्द्रियं वा न तेषां समूहः ।
अनैकान्तिकत्वात् सुषुप्त्येकसिद्ध–
स्तदेकोऽवशिष्टः शिवः केवलोऽहम् ।।१।।

951/30 ŚIVASTOTRAM DAŚAŚLOKISTOTRAM

शिवस्तोत्रम् (दशश्लोकिवेदान्तस्तोत्रम्)

Author :—Śaṅkarāchāryaḥ

Foll. 2; 16.3×10.4 cms.; paper; lines per page 7; letters per line 17; Devanāgarī script; Sanskrit; 20th c.;

952/31 ŚIVASTOTRAM DAŚAŚLOKĪ STOTRAM

शिवस्तोत्रम्-दशश्लोकीस्तोत्रम्

Author :—Śaṅkarāchāryaḥ

Foll. 2; 16·3×10.4 cms.; paper; lines per page 7; letters per line 12; Devanāgarī script; Sanskrit; 20th c.

1314/394 ŚIVASTOTRAŚATANĀMA

शिवस्तोत्रशतनाम

Foll. 4; 11·3×8.8 cms.; paper; lines per page 6; letters per line 13; Devanāgarī script; Sanskrit; 20th c.; Text is the same as in ms no. 1082/161 at page 207.

1334/414 ŚIVĀNANDALAHARĪ WITH ct.

शिवानन्दलहरी सटीका

Author :—Śaṅkarācharyaḥ

Foll. 31; 26×12.3 cms.; paper; lines per page 3/9; letters per line 35/40; Devanāgarī script; Sanskrit; 19th c.; Tripāṭha; written with black and red inks.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Begins text :—।। श्रीगणेशं वन्दे ।।

कलाभ्यां चूडालंकृतशशिकलाभ्यां निजतपः-
फलाभ्यां भक्तेषु प्रकटितफलाभ्यां भवतु मे ।
शिवाभ्यामस्तोकत्रिभुवनशिवाभ्यां हृदि पुन-
र्भवाभ्यामानन्दस्फुरदनुभवाभ्यां नतिरियम् ।।१।।

Begins ct. ।। श्रीगणेशाय नमः ।।

ॐ गजाननं चारुविशालनेत्रं मौञ्जीधरं मूषकवाहनञ्च ।
चतुर्भुजं चञ्चलकर्णयुग्मं गणाधिपं शूलिसुतं भजेऽहम् ।।

कलाभ्यामिति ।। शिवाभ्यां शिवश्च शिवा च शिवौ ताभ्यां मे मम इयं नतिरयं नमस्कारः भवतु भूयात्, कथंभूताभ्यामित्यत आह कलाभ्यामित्यादि । कलाभ्यां सुंदरा विधा स्वरूपाभ्यां अथवा परिपूर्णस्य ब्रह्मणः पुंरूपा सर्वोत्कृष्टा एका कला शिवः, स्त्रीरूपा सर्वेष्टा अपरा कला शिवा ।। ताभ्यामिति ।। चूडालङ्कृतशशिकलाभ्यां चूडा अलङ्कृता यया शशिकलया सा चूडालङ्कृता तादृशी शशिचन्द्रकला ययोस्ताभ्यां निजतपः निजयोः तपसोः फलरूपाभ्यां भक्तेषु जनेषु प्रकटितफलाभ्यां प्रकटितं प्रत्यक्षीकृतं फलमिन्द्रत्वादिरूपं याभ्यां अस्तोकं त्रिभुवन-शिवाभ्यां भक्तेषु जनेषु प्रकटितं प्रत्यक्षीकृतं फलं अस्तोकमनल्पं त्रिभुवनस्य शिवं मंगलं याभ्यां हृदि पुनर्भवाभ्यां हृदि हृदये पुनः सदा भवाभ्यां ध्येयत्वेन वर्तमानाभ्यां आनन्दस्फुरदनुभवाभ्यां आनन्दात्मकः स्फुरन् स्वप्रकाशः योऽनुभवः तद्रूपाभ्यां शिवाभ्यां मे इयं नतिः भवतु ।।१।।

Ends(Text) प्रचरयभितः प्रगल्भवृत्या मदवानेष मनः कटंकरी यः ।
परिगृह्य नयेन भक्तिरज्वा परमस्थानपदं दृढं नयामि ।।१।।

इति श्रीमत्परहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यविरचितं शिवानन्दलहरीस्तोत्रं संपूर्णं श्रीसद्गुरुचरणारविंदार्पणमस्तु श्रीसाम्बसदाशिवार्पणमस्तु ।।

Ends (ct.) प्रचरतीति मदवान् मदयुक्तः एष मनःकटंकरी धैर्याङ्कुशेन निभृतं रभसा बलादाकृष्य भक्तिश्रृङ्खलया पुरहरचरणालाने हृदय-मदेभं बंधानविद्यंत्रैः यः मनोरूपः बलीवर्दः प्रगल्भवृत्या प्रचण्ड-व्यापारेण अभितः परितः प्रचरति धावति, नयेन उपायेन भक्ति-रज्वा भक्तिरूपया रज्वा परिगृह्य परमस्थानपदं परमं सर्वोत्कृष्ट-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्थानं शिवपदस्वरूपं तदेव पदं गवां स्थानं तद् दृढं यथा तथा न गमि प्रापयामि ।।१००।। सदाशिवार्पणमस्तु ।।

1324/404 **ŚIVĀNANDA LAHARĪ**

शिवानन्दलहरी

Author :—Śaṅkarāchāryaḥ

Foll. 23; 21 × 10.5 cms.; paper; lines per page 6; letters per line 24; Devanāgarī script; Sanskrit; 20th c.; very well written; woith display. A beautiful full—page multicoloured painting of कामेश्वर-कामेश्वरी with सरस्वती and लक्ष्मी in attendance (Jaipur School) is on the upper cover page.

999/78 **ŚIVĀṢṬAKAM**

शिवाष्टकम्

Foll. 9; 16 × 10.5 cms.; paper; lines per page 3; letters per line 12; Devanāgarī script; Sanskrit; 20th c ; incorrectly written.

1011/90 **ŚIVĀṢṬAKAM**

शिवाष्टकम्

Author :—Śaṅkarāchāryah.

Foll. 7; 16 × 10 cms.; paper; lines per page 6; letters per line 9; Devanāgarī script; Sanskrit; 1932 V.S. (1875 A.D.); scribe-Rāmapratāpa.

1052/131 **ŚIVĀṢṬAKAM**

शिवाष्टकम्

Foll. 3; 15.5 × 10.5 cms.; paper; lines per page 7; letters per line 14/15; Devanāgarī script; Sanskrit; 1917 V.S. (1860 A.D.)

Begins :— ।। श्रीगणेशाय नमः ।।
कैलासाचलमन्दिरसंस्थितदुर्गानित्यत्रिभुवनसरणं
लम्बोदरप्रमुखाष्टगणांकितवृषभध्वजसंकटहरणम् ।
जटाजूटगंगावरपन्नगकरत्रिशूलडमरूधरणं
नमामि त्र्यम्बक सुखकर शङ्कर गङ्गाधर मङ्गलकरणम् ।।१।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Ends :— नवनिधिकथित शिवाक्षवहुविधि सुखदायक पटनासरणं
भ्रान्तिभयानकसंकटपीडारोग-अग्निजलभयहरणम् ।।
पुत्रकलत्रआयुबलवाञ्छितप्राप्तं विद्याविस्तरणं
नमामि त्र्यम्बक सुखकर शङ्कर गङ्गाधर मङ्गलकरणम् ।।२।।
आरती शिवजी की खते (खतम्) ।। लिषतं भूवादत्तं ।।
इति श्री शिवअष्टग समाप्त ।। शुभं भूयात् ।।
मिति मांगसर सुदी १३ सं. १९१७ का

1059/138

ŚIVĀṢṬAKAM

शिवाष्टकम्

Author—Rāmachandraḥ

Foll. 3; 16 × 10 cms.; paper; lines per page 7; letters per line 16/17; Devanāgarī script; Sanskrit; 19th c.

Begins :— ।। श्रीगणेशाय नमः ।।
आदिशम्भुस्वरूप मुनिवर चन्द्रशीशजटाधरं
रुण्डमाल विशाललोचन वाहनं वृषभध्वजम् ।।
नागचर्मत्रिशूलडमरू भस्मअंगविभूषणं
श्रीनीलकण्ठाहिमाल जलधर विश्वनाथ विश्वेश्वरम् ।।१।।

Ends :— रामचन्द्र सचन्द्र रघुपति सेतुबन्धनिवासिनं
मथितदधिजलशेषविकलित भ्रमत मेरू सुमेरकम् ।
स्रवति विषजल दीप प्रणवति घुमत नेत्र सुघोरितं
श्रीनीलकण्ठाहिमाल जलधर विश्वनाथ विश्वेश्वरम् ।।८।।

रिति बसंत चैत्र चौदसि प्रापते फलदायकं
पूर्वं कासी भवे वासी प्रात मंगलगायकम् ।
त्रिअंबिके तटि बैजनाथ सैलसिषर महेश्वरं
श्रीनीलकण्ठाहिमाल जलधर विश्वनाथ विश्वेश्वरम् ।।९।।

इति श्री रामचन्द्रविरचितं श्री शिवाष्टकम् ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1096/175

ŚIVĀṢṬAKAM

शिवाष्टकम्

Author—Śaṅkarāchāryaḥ

Foll. 4; 16.5 × 9 cms.; paper; lines per page 6; letters per line 17; Devanāgarī script; Sanskrit; 19th c.; presented by Jhūṅthā Lekhaka.

1115/194

ŚIVĀṢṬKAM

शिवाष्टकम् (अर्द्धनारीश्वरस्तोत्रम्)

Foll. 5; 11.5 × 7 cms.; paper; lines per page 4; letters per line 13; Devanāgarī script; Sanskrit; 19th c.; presented by Gaṇeśa Brāhmaṇa.

1133/212

ŚIVĀṢṬAKAM

शिवाष्टकम्

Author—Śaṅkarāchāryaḥ

Foll. 8; 13.5 × 8.5 cms.; paper; lines per page 4; letters per line 9; Devanāgarī script; Sanskrit; 19th c.; presented by Udayalāla Purohita.

1144/223

ŚIVĀṢṬAKAM

शिवाष्टकम्

Foll. 5; 13.5 × 10.5 cms.; paper; lines per page 9; letters per line 8; Devanāgarī script; Sanskrit; 1934 V. S. (1877 A.D.); presented by Udayalāla Purohita.
Āśvina Śuklā 10, Tuesday.

1150/229

ŚIVĀṢṬAKAM

शिवाष्टकम्

Author—Śrīkṛṣṇa Bhaṭṭaḥ

Foll. 4; 16 × 9 7 cms.; paper; lines per page 4; letters per line 17; Devanāgarī script; Sanskrit; 18th c.; written within a rectangular column enclosed by double red lines.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Begins :— ।। श्रीगणेशाय नमः ।।

शुभवती भवती भवतीद्धरुक् प्रशमना शमना शमनायताम् ।
सनिरये निरये निरयेत्त ु ते शमननाम न नाम ननामनम् ।।१।।

परिभवोऽरिभवोऽरिभवोधितः स्मरभवारऽभवाऽरभवाऽपि रुक् ।
भजनभाजनभाजनभावतां गतवतस्तवतँस्तवतःस्थले ।।२।।

अनव दानवदानवदारणोज्जवरदे वरदे वरदेवते ।
अवतमां वत मां व्रतमांतरं वितर सा तरसा तरसा जयम् ।।३।।

अनवमा नवमानवमानदा तव दया वद यावदयावहा ।
सकमनं कमनं कमनंतमं न तनुते तनुतेऽतनु ते शिवे ।।४।।

वितनुतां तनुतां तनुतांतिकृद्वसनजाऽसनजाऽऽसनजाऽऽपदाम् ।
हरवधूरवधूरवधूनिताऽऽयतनया तनया तनया गिरः ।।५।।

भविकला विकला विकलागणव्यधनदा धनदाऽधनदाद्विषाम्
वृजिनराजिनराजिनरार्तिनुन् मम हिता महिता महिता स्तुता ।।६।।

नवसुधा वसुधा वसुधामदा मम हितं महितं महितं च यत् ।
वसुकलं सुकलं सुकलं च मे तव पदं वपदंव पदं रुजौ ।।७।।

क्वचिदयाचिदयाचिदयार्चिता क्वचन याचनयाच नयार्थदा ।
.............................त्वमव मामव मामव मादृशाम् ।।८।।

वलवदालवदा लवदाऽसुराभिभवना भवना भवनायिका ।
सुनयना नयना नयनाऽऽधितस्वजनभाजनभाजनभा भव ।।९।।

इतिशिवातिशिवातिशिवाश्रयं सनवकं नवकं नवकं पदाम् ।
विनिगदन्निगदन्निगदं यथा कृतनुतं तनुतेऽतनु ते जनम् ।।१०।।

शिवाष्टकमिदं श्रीकृष्णभट्टकृतं रम्यम् ।।श्रीरस्तु।।श्रीः।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1152/231 ŚIVĀṢṬAKAM

शिवाष्टकम्

Foll. 3; 15.5×10 cms.; paper; lines per page 7; letters per line 17; Devanāgarī script; Sanskrit; 19th c.

1163/242 ŚIVĀṢṬAKAM

शिवाष्टकम्

Author :—Śrīkṛṣṇa Bhaṭṭah

Foll. 3; 16×10.5 cms.; paper; lines per page 6; letters per line 19/20; Devanāgarī script; Sanskrit; 19th c.; presented by Narsīlāla Lekhaka.

Text same as in no. 1150/229 at page 223.

1183/262 ŚIVĀṢṬAKAM

शिवाष्टकम्

Author :—Śaṅkarāchāryaḥ

Foll. 6; 13.5×8.5 cms.; paper; lines per page 4; letters per line 14; Devanāgarī script; Sanskrit; 19th c.
Text is the same as in no. 1141/22 p. 201.

1197/276 ŚIVĀṢṬAKAM

शिवाष्टकम्

Foll. 2; 14×11.5 cms.; paper; lines per page 7; letters per line 15; Devanāgarī script; Sanskrit; 19th c.

Yellow border with red lines; written with white ink on black back-ground.

1226/306(i) ŚIVĀṢṬAKAM

शिवाष्टकम्

Foll. 1-4; 15.3×10.3 cms.; paper; lines per page 6; letters per line 16; Devanāgrī script; Sanskrit; 19th c ; bound.

1308/388(i) ŚIVĀṢṬAKAM

शिवाष्टकम्

Foll. 1-4; 16×10 cms.; paper; lines per page 6; letters per line 16; Devanāgarī script; Sanskrit; 20th c.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1350/430 **ŚIVĀṢṬAKAM**

शिवाष्टकम्

Foll. 5; 11 × 6.2 cms.; paper; lines per page 5; letters per line 12; Devanāgarī script; Sanskrit; 1918 V.S. (1861 A.D.); Phālguna kṛṣṇā 6, Thursday.

On bluish bank paper.

1312/392 **ŚIVĀṢṬOTTARAŚATANĀMA**

शिवाष्टोत्तरशतनाम

Author :—Nārāyaṇaḥ

Foll. 5; 20.5 × 7 cms.; paper; lines per page 4; letters per line 24; Devanāgarī script; Sanskrit; 20th c.

Begins :— श्रीवरदमूर्तिर्जयति ।। पार्वत्युवाच ।।
शरीरार्द्धं कथं शम्भोरहं प्रक्ष्यामि केशव ।
तदिदानीं समाचक्ष्व स्तोत्रं शीघ्रफलप्रदम् ।।१।।

श्री नारायण उवाच ।।
अस्ति गुह्यतमं गौरि नाम्नामष्टोत्तरं शतम् ।
शम्भोरहं प्रवक्ष्यामि पठनाच्छीघ्रकामदम् ।।२।।

ॐ अस्य श्री शिवाष्टोत्तरशतनाममालामन्त्रस्य नारायणऋषिः सदाशिवो देवताऽनुष्टुप् छन्दः ह्रीं बीजं क्लीं शक्तिः सदाशिव-प्रीत्यर्थे जपे विनियोगः ।

ॐ कोटिसूर्यप्रतीकाशं त्रिनेत्रं चन्द्रभूषणम् ।
शूलटंक[1]गदापाणिं कुन्तपाशधरं विभुम् ।।१।।

शिवो महेश्वरः शम्भुः पिनाकी शशिशेखरः ।
वामदेवो विरूपाक्षः कपर्दी नीललोहितः ।।२।।

शंकरः शूलपाणिश्च खट्वाङ्गो विष्णुवल्लभः ।
शिपिविष्टोऽम्बिकानाथः श्रीकण्ठो भक्तवत्सलः ।।३।।

भवः सर्वस्त्रिलोकेशः शितिकण्ठः शिवाप्रियः ।
उग्रः कपाली कामारिरन्धकासुरसूदनः ।।४।।

गंगाधरो ललाटाक्षः कालकालः कृपानिधिः ।
भीमः परशुहस्तश्च मृगपाणिर्जटाधरः ।।५।।

---

1. टंकोऽश्मदारणः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कैलासवासी कवची कठोरस्त्रिपुरान्तकः ।
वृषाङ्को वृषभारूढो भस्मोद्धूलितविग्रहः ।।६।।

सामप्रियः स्वरमयस्त्रिमूर्तिरखिलेश्वरः ।
सर्वज्ञः परमात्मा च सोमसूर्याग्निलोचनः ।।७।।

हविर्यज्ञमयः सोमः पञ्चवक्त्रः सदाशिवः ।
वीरेश्वरो वीरभद्रो गणनाथः प्रजापतिः ।।८।।

हिरण्यरेता दुर्धर्षो गिरीशो गिरिशोऽनघः ।
भुजङ्गभूषणो भर्गो गिरिधन्वा गिरिप्रियः ।।९।।

कृत्तिवासा पुरारातिर्भगवान् प्रमथाधिपः
मृत्युञ्जयः सूक्ष्मतनुर्जगद्व्यापी जगद्गुरुः ।।१०।।

व्योमकेशो महासेनो जनकश्चारुविक्रमः ।
रुद्रो भूतपतिस्थाणुरहिर्बुध्न्यो दिगम्बरः ।।११।।

अष्टमूर्तिरनेकात्मा सात्विकः शुद्धविग्रहः ।
शाश्वतः खण्डपरशुरजः पाशविमोचकः ।।१२।।

मृडः पशुपतिर्देवो महादेवोऽव्ययो हरिः ।
पूषदन्तभिदव्यग्रो दक्षाध्वरहरो हरः ।।१३।।

भगनेत्रभिदव्यक्तः सहस्राक्षः सहस्रपात् ।
अपवर्गप्रदोऽनन्तस्तारकः परमेश्वरः ।।१४।।

अष्टोत्तरशतं नाम्नां शिवस्यानुदिनं पठेत् ।
धर्मार्थकाममोक्षाणां नरः सिद्धिमवाप्नुयात् ।।१५।।

एवमष्टोत्तरशतं नाम्नामाम्नायसम्मतम् ।
शङ्करस्य प्रिया गौरी जप्त्वा कालत्रयेऽन्वहम् ।।१६।।

अवाप सा शरीरार्द्धं प्रसादाच्छूलपाणिनः ।
यस्त्रिसन्ध्यं पठेच्छम्भोर्नाम्नामष्टोत्तरं शतम् ।।१७।।

शतरुद्रीत्रयं कृत्वा यत्फलं प्राप्यते नरैः ।
तत्फलं प्राप्नुयादेवमेकावृत्या प्रयत्नतः ।।१८।।

सकृद्वा पूजयेच्छम्भुं कुलकोटिं समुद्धरेत् ।
विल्वपत्रैः प्रशस्तैर्वा पुष्पैश्च तुलसीदलैः ।।१९।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तिलाक्षतैर्यजेद्देवं जीवन्मुक्तो न संशयः ।
नाम्नामेषां पशुपतेरेकमेवापवर्गदम् ।।
अन्येषां त्ववशिष्टानां फलं वक्तुं क ईशते ।।२०।।

इति श्रीनारायणकृतं शिवाष्टोत्तरशतं नाम सम्पूर्णम् ।।

1372/452 ŚIVĀṢṬOTTARAŚATANĀAMA

शिवाष्टोत्तरशतनाम

Foll. 4; 20.2 x 11 cms; paper; Devanāgarī script; Sanskrit; 20th c. The 108 names are enumerated and numbered; written on bluish blank paper.

1079/158 ŚIVĀṢṬOTTARAŚATANĀMA STOTRAM

शिवाष्टोत्तरशतनामस्तोत्रम्

Foll. 5; 16 x 10.5 cms.; paper; lines per page 6; letters per line 17; Devanāgarī script; Sanskrit; 20th c.

960/39 ŚĪTALĀSTAVAḤ

शीतलास्तवः

From—Skandapurāṇa

Foll.7; 19 5x10.5 cms.; paper; lines per page 6; letters per line 21; Devanāgarī script; Sanskrit; 1947 V.S. (1890 A.D.); scribe–Rāmaratna.

989/68 ŚUKĀṢṬAKAM

शुकाष्टकम्

Author—Śukadeva s/o Vyāsa

Foll. 5; 16x9 cms.; paper; lines per page 5; letters per line 17; Devanāgarī script; Sanskrit; 20th c.; scribe—Prabhulāla

1076/155 ŚUKĀṢṬAKAM

शुकाष्टकम्

Foll. 4; 20x16 cms; paper; lines per page 6; letters per line 15; Devanāgarī script; Sanskrit; 1922 V S (1865 A.D.); presented by Māṅgīrāma Brāhmaṇa on Bhādrapada Śuklā 14.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Begins :— ।। श्रीवरदमूर्तिर्जयति ।।

भेदाभेदौ सपदि गलितौ पुण्यपापे विशीर्णे
मायामोहौ क्षयमधिगतौ नष्टसन्देहवृत्तिः ।
शब्दातोतं त्रिगुणरहितं प्राप्य तत्वावबोधं
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः ।।१।।

ज्ञात्वाऽऽत्मानं सकलवपुषामेकमन्तर्बहिस्थं
दृष्ट्वा पूर्णं खमिव सततं सर्वभाण्डस्थमेकम् ।
नान्यत्कार्यं किमपि सततं कर्मणो भिन्नरूपं
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः ।।२।।

हेम्नः कार्यं हुतवहगतं हेममेवेति यद्वत्
क्षीरे क्षीरं समरसगतं तोयमेवाम्बुमध्ये ।
एवं सर्वं समरसगतं त्वं पदं तत्पदार्थे
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः ।।३।।

यस्मिन् विश्वं सकलवपुषा सामरस्यैकभूतं
भूमिर्ह्यापोऽनलमनिलखं जीवमेतत्क्रमेण ।
यत् क्षाराब्धौ समरसगतं सैन्धवैकत्वभूतं
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः ।।४।।

यद्वन्नाद्योदधिसमरसं सागरत्वं प्रपन्नं
तद्वज्जीवो लयमुपगतः सामरस्यैकभूतः ।
भेदातीतं परिलयगतं सच्चिदानन्दरूपं
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः ।।५।।

दृष्ट्वा वेद्यं परमथ पदं स्वात्मबोधस्वरूपं
बुद्ध्वाऽऽत्मानं सकलवपुषामेकमन्तर्बहिस्थम् ।
भूत्वा नित्यं सदुदिततया स्वप्रकाशस्वरूपं
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः ।।६।।

कार्याकार्यं किमपि सततं नैव कर्तृत्वमस्ति
जीवन्मुक्तः स्थितिमिहगतो दग्धवस्त्रावभासः ।
एवं देहे प्रविशति गतो तिष्ठमानो विमुक्तो
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः ।।७।।

कस्मात् कोऽहं किमपि च भवान् कोऽयमेतत् प्रपञ्चः
स्वं संवेद्यं गगनसदृशं पूर्णतत्त्वप्रकाशम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आनन्दाख्यं समरसगतं बाह्यमन्तर्विहीनं
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेध : ।।८।।

सत्यं सत्यं परमममृतं सर्वकल्याणरूपं
मायारण्ये दहनमतुलं शान्तिनिर्वाणदीपम् ।
तेजोरूपं निगमसदृशं व्यासपुत्राष्टकं यः
प्रातःकाले पठति मनसा याति निर्वाणमार्गे ।।९।।

सञ्जीवनी परमममौषधमूलमेक–
मन्यैस्तु किं श्रमकरैर्बहुमूलभारैः ।
श्लोकं वरं परमतत्वगुणानुभेदि
किं ग्रन्थकोटिपठनैर्जनरञ्जनाय ।।१०।।

इति शुकाष्टकं सम्पूर्णम् ।।छ।।०।।छ।।०।।

1167/246

ŚUKĀṢṬAKAM
शुकाष्टकम्

Foll.3; 13.5x10.5 cms.; paper; lines per page 7; letters per line 15/16; Devanāgarī script; Sanskrit; 19th c.; presented by Gaṇeśa, son of Māṅgīrāma.
Same text as in 1076/155 p. 228.

979/58

ŚUKĀṢṬAKASTOTRAM
शुकाष्टकस्तोत्रम्

Author :—Śukadeva

Foll. 4; 14.5x10 cms ; paper; lines per page 6; letters per line 12; Devanāgarī script; Sanskrit; 1927 V.S. (1870 A.D.)

1338/418

ŚŪLINĪPĀṬHAḤ
शूलिनीपाठः

Foll. 4; 20.5x10 cms; paper; lines per page 4; letters per line 19; Devanāgarī script; Sanskrit; 1948 V.S.(1791 A.D.)

1349/429

ŚŪLINĪMANTRAḤ
शूलिनीमन्त्रः

Foll. 2; 23.5x12.2 cms; paper; lines per page 6; letters per line 26; Devanāgarī script; Sanskrit; 20th c.; scribe—Nārāyaṇa.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1214/294 **ŚŪLINĪMANTRASTOTRAM**

शूलिनीमन्त्रस्तोत्रम्

Foll. 5; 10.5x8.5 cms.; paper; lines per page 6; letters per line 8; Devanāgarī script; Sanskrit; 19th c.

Begins :— ।। श्रीगणेशाय नमः ।।

ॐ ह्रीं ह्लां नमो भगवति ज्वल ज्वल शूलिनि सर्वशत्रुसंहारिणि सर्वराक्षससंहारिणि सर्वभूतविनाशिनि गजाट्टहासध्वंसिनि ज्वल ज्वल शूलिनि ह्ये हि ह्ये हि ग्रावेशय ग्रावेशय भूतग्रह प्रेतग्रह पिशाचग्रह शाकिनीग्रह डाकिनीग्रह वेतालग्रह कूष्माण्डग्रह जृम्भकग्रह स्वप्नग्रह ग्रावेशग्रह सर्वदेवदोषग्रह ग्रनावेशग्रह यक्षग्रह पक्षग्रह मासग्रह मण्डलग्रह नित्यग्रह कृत्यग्रह उच्चाटयोच्चाटय परं नाशय नाशय मारय मारय पूरय पूरय शोषय शोषय दाहय दाहय खण्डय खण्डय खड्गेन प्रहारय प्रहारय शूलेन विदारय विदारय ग्रनलेन दाहय दाहय पाशेन बन्वय बन्धय ह्रीं दुर्गे बटुकभैरवि सर्वरोगसंहारिणि ग्रहज्वर भूतज्वर प्रेतज्वर पिशाचज्वर देवदोषज्वर वातज्वर पित्तज्वर श्लेष्मज्वर सन्निपातज्वर त्रिदोषज्वर ग्राधिज्वर व्याधिज्वर एकाहिज्वर द्वयाहिकज्वर त्र्याहिकज्वर चातुर्थिकज्वर सप्तरात्रज्वर पक्षज्वर मासज्वर त्रिमासज्वर षण्मासज्वर सांवत्सरिकज्वर पुराणज्वर ग्रादि ज्वरान् भञ्जय भञ्जय कटिशूल पार्श्वशूल शिरः शूलादि सर्वशूलरोगान् संहारय संहारय परमन्त्र परतन्त्रान् उच्चाटयोच्चाटय ग्रात्ममन्त्र ग्रात्मतन्त्रान् स्थापय स्थापय दैवतं रक्ष रक्ष ह्रीं दुर्गे बं बटुक भैरवि मम शरीरे वर्तमानान् समस्तशत्रुरोगान् नाशय नाशय ह्रीं स्वाहा ।। इति शूलिनीमन्त्रः समाप्तः ।।

1385/465 **ŚRĪ KṚṢṆASTOTRAM**

श्रीकृष्णस्तोत्रम्

From : —Nārada pañcharātra
(Jñānamṛtasāra)

Foll. 3; 21x16.6 cms.; paper; lines per page 14; letters per line 16; Devanāgarī script; Sanskrit; 1979 V.S. (1922 A.D.), Āśvina Śukla 10; scribe—Mādhoprasāda Śarmā of Pothīkhānā.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1309/389 ŚRĪVIDYĀPAÑCHAMĪSTAVARĀJAḤ

श्रीविद्यापञ्चमीस्तवराजः

From—Rudrayāmala

Foll. 21; 16.5x11 cms.; paper; lines per page 7; letters per line 21; Devanāgarī script; Sanskrit; old; 1793 V.S. (1736 A.D.), Āśvina Budi 8, Saturday.

Includes त्रिपुरसुन्दीरीकवचम् also; folio no. 19 is yellowish and different. The ms. belonged to Kāśīdāsa Raṇachhoḍadāsa Parekh, resident of a place situated on the banks of Yamunā.

।। श्रीविद्यापञ्चमीस्तवराजः ।।

।। श्रीगणेशाय नमः ।। श्रीत्रिपुरसुन्दर्यै नमः ।।

नमामि सद्गुरुं शान्तं प्रत्यक्षं शिवरूपिणम् ।
शिरसा योगपीठस्थं सर्वकामार्थसिद्धये ।।१।।

या नित्या परमा शक्तिर्जगच्चैतन्यरूपिणी ।
तां नमामि महादेवीं पञ्चमीं मातृरूपिणीम् ।।२।।

यस्याः सर्वं समुत्पन्नं यस्यामद्यापि तिष्ठति ।
लयमेत्यति तामेव पञ्चमीं प्रणमाम्यहम् ।।३।।

भूग्रहं गुणरेखाद्यं वेदद्वारोपशोभितम् ।
त्रिवृत्तं षोडशदलं तथाष्टदलकर्णिकम् ।।४।।

शक्रकोणं दिग्युगञ्च वसुकोणं त्रिबैन्दवम्
एवमेतन्महाचक्रं महाश्रीत्रिपुरामयम् ।।५।।

अधः कल्पतरोर्मूले भवान्या रत्नमन्दिरे ।
रत्नसिंहासनं देव्याः श्रीचक्रं प्रणमाम्यहम् ।।६।।

इन्द्रो मां रक्षयेत्पूर्वे आग्नेय्यामग्निदेवता ।
याम्ये यमः सदा पातु नैर्ऋत्यां निर्ऋतिश्च माम् ।।७।।

पश्चिमे वरुणः पातु वायव्यां वायुदेवता ।
धनदश्चोत्तरे पातु ईशान्यामीश्वरो विभुः ।।८।।

ऊर्ध्वं प्रजापतिः पातु अधश्चानन्तदेवता ।
एवं दशदिशो रक्षां कुर्वन्तां देवतागणाः ।।९।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गणेशः सर्वदा पातु क्षेत्रेशो रक्षयेत्सदा ।
द्वारश्रीः सर्वदा पातु देहली रक्षयेत्सदा ॥१०॥

गणनाथः सदा पातु दुर्गा मां परिरक्षतु ।
बटुको भैरवः पातु क्षेत्रपालोऽपि रक्षतु ॥११॥

सह रत्या स्वशक्त्या च कामदेवश्च सर्वदा ।
प्रीत्या सह वसन्तोऽपि पातु मां नन्दने वने ॥१२॥

चक्रस्य पश्चिमे द्वारे भवान्या रत्नमन्दिरे ।
शङ्खपद्मनिधी रक्षां कुर्वतां मम सिद्धये ॥१३॥

पातु मां रत्नसोपानं पारमैश्वर्यशोभितम् ।
रक्षयेत् पश्चिमे द्वारे भवान्या रत्नमण्डपे ॥१४॥

सरस्वती महालक्ष्मीर्मायाविद्याविभूतयः ।
भद्रकाली च चामुण्डा स्वाहा चैव शुभङ्करी ॥१५॥

गौरी वा लोकधात्री च वागीश्वर्यादयो मम ।
एता मञ्चस्थिताः सर्वा रक्षां कुर्वन्तु सर्वदा ॥१६॥

पाखण्डकारिणो भूता भूमौ ये चान्तरिक्षगाः ।
दिवि लोके स्थिता ये च ते नश्यन्तु शिवाज्ञया ॥१७॥

शिवं कुर्वन्तु ताः सर्वा आसने पञ्च देवताः ।
वास्तूनामधिपो ब्रह्मा स्रष्टा रक्षतु सर्वदा ॥१८॥

चक्रस्य दक्षिणे भागे श्रीमत्पात्रस्य मण्डले ।
पञ्चरत्नं सदा पातु पूजकानां च सिद्धये ॥१९॥

तत्र पात्रासने पुण्ये सर्वदा वह्निमण्डले ।
वह्नेश्च मण्डलं पातु कुलदेव्याश्च पूजने ॥२०॥

धूम्रार्चिरूष्मा ज्वलिनी ज्वालिनी विस्फुलिंगिनी ।
सुश्रीः सुरूपा कपिला हव्यकव्यवहा तथा ॥२१॥

वह्नेर्दश कला ज्ञेया धर्मकर्मफलप्रदाः ।
एताभिः सहितो रक्षां कुर्याद् वैश्वानरो मम ॥२२॥

पत्रे पात्रवरे दिव्ये श्रीमदादित्यमण्डले ।
सूर्यस्य मण्डलं पातु मम सर्वार्थसिद्धये ॥२३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पात्राधारे त्रिकोणे तु वैश्वानरकला दश ।
यकारादिसकारान्ता रक्षां कुर्वन्तु मे सदा ।।२४।।

तपिनी तापिनी धूम्रा मरीचिर्ज्वालिनी रुचिः ।
सुषुम्ना भोगदा विश्वा बोधिनी धारिणी क्षमा ।।२५।।

एताः कलास्तु सूर्यस्य सूर्यमण्डलसंस्थिताः ।
एताभिः सहितो रक्षामादित्यः कुरुतान्मम ।।२६।।

सवितुर्मण्डले तत्र सोमस्यामृतमण्डले ।
प्रथमं सर्वदा पातु भैरवानन्दहेतुकम् ।।२७।।

अमृता मानदा पूषा तुष्टिः पुष्टिर्रतिर्धृतिः ।
शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा ।।२८।।

पूर्णा पूर्णामृता कामदायिन्यः स्वरजाः कलाः ।
सोममण्डलमध्यस्था रक्षां कुर्वन्तु सर्वदा ।।२९।।

रविवेदकलापूर्णे सुधासम्पूर्णमण्डले ।
नक्षत्राधिपती रक्षां करोतु मम सर्वदा ।।३०।।

सूर्याग्निमण्डले दिव्ये सम्पूर्णे शशिमण्डले ।
आनन्दभैरवो रक्षां करोतु मम सर्वदा ।।३१।।

तत्रैव चामृते पूर्णे शक्तिर्या वारुणी कला ।
आनन्दभैरवी रक्षां करोतु मम सर्वदा ।।३२।।

सर्वाधो मण्डुकाधारे रुद्रः कालानलो विभुः
रक्षां करोतु मे नित्यं या मूलप्रकृतिः स्थिता ।।३३।।

ततश्चाधारशक्तिर्या मम रक्षां करोतु सा ।
कूर्मस्तु सततं पातु अनन्तः पातु मां सदा ।।३४।।

तस्य मूर्ध्नि स्थिते चक्रे वाराहः परिरक्षतु ।
दन्ते तस्य स्थिता पृथ्वी पातु नित्यं वसुन्धरा ।।३५।।

समुद्रः सर्वदा पातु सुरत्नैरमृतैर्नलैः ।
रत्नद्वीपस्तु मे रक्षां करोतु स्वर्णपर्वतः ।।३६।।

पातु मां नन्दनोद्यानं रक्षन्तु कल्पपादपाः ।
अधस्तेषां सदा पातु विचित्रा रत्नभूमिका ।।३७।।

श्रीरत्नमन्दिरं पातु सततं पातु वेदिका ।
श्वेतच्छत्रं सदा पातु रत्नसिंहासनं सदा ।।३८।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सिंहासनस्य पार्श्वस्था धर्मो ज्ञानं च रक्षतु ।
वैराग्यं रक्षयेन्नित्यमैश्वर्यं रक्षयेत् सदा ।।३९।।

अधर्मो रक्षयेन्नित्यमज्ञानमपि रक्षतु ।
अवैराग्यं तु मां पातु अनैश्वर्यं तु पातु माम् ।।४०।।

सिंहासनस्य मध्यस्थं पद्मं मां परिरक्षतु ।
कंदो मां पातु तत्रैव पद्मनालं च सर्वदा ।।४१।।

ऊर्ध्वं चाधस्तथा पातु तत्वरूपा च कर्णिका ।
सूर्यस्य मण्डलं पातु पातु मां सोममण्डलम् ।।४२।।

वह्नेश्च मण्डलं पातु सत्वं मां पातु सर्वदा ।
रजस्तु पातु मां नित्यं पातु नित्यं तमोगुणः ।।४३।।

आत्मतत्वं तथा विद्या शिवतत्वं तथैव च ।
सदाशिवस्य यत्तत्वं तत्सर्वं पातु सर्वदा ।।४४।।

ज्ञानमाया कला नित्या तथात्मानो विभूतयः ।
रत्नसिंहासने देव्यो रक्षां कुर्वन्तु सर्वदा ।।४५।।

ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ।
एते पञ्च महाप्रेता रक्षां कुर्वन्तु सर्वदा ।।४६।।

सुधार्णवासनं पातु पातु पीताम्बुजासनम् ।
देव्यासनं सदा पातु पातु चक्रासनं सदा ।।४७।।

सर्वमन्त्रासनं पातु साध्यसिद्धासनं तथा ।
तत्रैव संस्थिता देव्यो रक्षां कुर्वन्तु सर्वदा ।।४८।।

ईश्वरी सुन्दरी वाणी वशिनी श्रीश्च मालिनी ।
सिद्धेश्वरी परा वाक् च महात्रिपुरसुन्दरी ।।४९।।

नवधा पातु मां नित्यं त्रैलोक्यवशकारिणी ।
सिद्धेश्वर्यादयः सर्वा त्रिपुराद्याश्च पान्तु माम् ।।५०।।

अवन्तु गुरवो नित्यं दिव्यसिद्धौघमानवाः ।
मुनिवेदनागसंख्या रक्षां कुर्वन्तु सर्वदा ।।५१।।

समस्ताः प्रकटा गुप्तास्तथा गुप्ततराश्च याः ।
सम्प्रदाया कुलाः कौला निगमाश्च रहस्यगाः ।।५२।।

तथैवातिरहस्याश्च परापररहस्यगाः ।
एतास्तु सततं रक्षां कुर्वन्तु योगिनीगणाः ।।५३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्रैलोक्यमोहनं चक्रं सर्वाशापरिपूरकम् ।
सर्वसंक्षोभणं चक्रं सर्वसौभाग्यदायकम् ।।५४।।

सर्वार्थसाधनं चक्रं सर्वरक्षाकरं परम् ।
सर्वरोगहरं चक्रं सर्वसिद्धिप्रदायकम् ।।५५।।

सर्वानन्दमयं चक्रं नवमं चक्रनायकम् ।
नवधाचक्रसंकेतं यो जानाति स पूजकः ।।५६।।

प्रथमे चतुरस्रं च तत्रस्था देवतागणाः ।
अणिमा पश्चिमे पातु लघिमा चोत्तरे तथा ।।५७।।

पूर्वद्वारे तु महिमा चेशित्वा पातु दक्षिणे ।
वशित्वं पातु वायव्ये प्राकाम्या पातु ईशके ।।५८।।

भुक्तिसिद्धिस्तथाऽग्नेये यामित्विच्छास्तु नैर्ऋते ।
अधः पातु सदा प्राप्तिः सर्वकामप्रदायिनी ।।५९।।

सर्वकामप्रदा पातु ऊर्ध्वं चोर्ध्वनिवासिनी ।
चतुरस्रं मध्यमा च पातु मां तदनन्तरम् ।।६०।।

भैरवश्चासिताङ्गो यः कामरूपे च पीठके ।
ब्रह्माणी सहितः पूर्वे द्वारे मां परिरक्षतु ।।६१।।

मलये चाग्निदिग्भागे संस्थितो रुरुभैरवः ।
माहेशी सहितः पातु कुलाचारस्य सिद्धये ।।६२।।

चण्डः कौलगिरौ रक्षां कौमारीसहितो यमे ।
करोतु भैरवो नित्यं पूजकानां च सिद्धये ।।६३।।

वैष्णवी सहितः क्रोधः कुलाख्ये पीठराजके ।
नैर्ऋत्ये सदा पातु सर्वकामार्थसिद्धये ।।६४।।

चौहारो पश्चिमे पातु वाराहीसहितः सदा ।
उन्मत्तभैरवो रक्षां करोतु मम सर्वदा ।।६५।।

जालंधरे महापीठे कपाली भैरवः सदा ।
इन्द्राणीसहितो रक्षां वायव्यां प्रकरोतु मे ।।६६।।

उड्डीयाणोत्तरे पीठे चामुण्डा सहितस्तथा ।
भीषणो भैरवः पातु कुलाम्नायस्य सिद्धये ।।६७।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

संहारश्चण्डिका सार्द्धं देवीकोटे च पीठके ।
ईशान्यां सर्वदा पातु कुलाचारस्य सिद्धये ।।६८।।

सर्वसंक्षोभिणी मुद्रा पश्चिमे पातु सर्वदा ।
द्राविणी चोत्तरे पातु पूर्वे चाकर्षिणी तथा ।।६९।।

याम्ये वश्या सदा पातु उन्मादा मारुते सदा ।
ईशे महांकुशा पातु त्रिखण्डा चाग्निकोणके ।।७०।।

नैर्ऋत्यां बीजरूपा च ऊर्ध्वं रक्षतु खेचरी ।
महामुद्रात्वधः पातु योगिनी योनिरूपिणी ।।७१।।

एताश्चक्रस्थिता नित्यं देवताः सर्वकामदाः ।
चतुरस्रे त्रिरेखायां रक्षां कुर्वंतु सर्वदा ।।७२।।

कामाकर्षणरूपा च बुद्ध्याकर्षणरूपिणी ।
चित्ताकर्षणरूपा च धैर्याकर्षणरूपिणी ।।७३।।

स्पर्शाकर्षणरूपा च रूपाकर्षणरूपिणी ।
अहंकाराकर्षिणी च शब्दाकर्षणरूपिणी ।।७४।।

रसाकर्षणरूपा च गन्धाकर्षणरूपिणी ।
स्मृत्याकर्षणरूपा च नामाकर्षणरूपिणी ।।७५।।

बीजाकर्षणरूपा च आत्माकर्षणरूपिणी ।
अमृताकर्षिणी देवी शरीराकर्षिरूपिणी ।।७६।।

एताश्चक्रस्थिता नित्याः स्वरजाः षोडशाः कलाः ।
सर्वाभीष्टप्रदा देव्यो रक्षां कुर्वन्तु सर्वदा ।।७७।।

अनङ्गकुसुमा पूर्वे दक्षिणेऽनङ्गमेखला ।
पश्चिमेऽनङ्गमदना उत्तरे मदनातुरा ।।७८।।

अनङ्गरेखा चाग्नेये नैर्ऋत्येऽनङ्गवेगिनी ।
अनङ्गाङ्कुशा वायव्ये ईशे चानङ्गमालिनी ।।७९।।

कवर्गाद्यष्टवर्गस्था अष्टौ चानङ्गशक्तयः ।
रक्षां कुर्वन्तु ताः सर्वा देव्यश्चाष्टदले स्थिताः ।।८०।।

सर्वसंक्षोभिणीशक्तिः सर्वविद्राविणी तथा ।
सर्वाकर्षणशक्तिश्च सर्वाह्लादनकारिणी ।।८१।।

सर्वसम्मोहिनी शक्तिः सर्वस्तम्भनकारिणी ।
सर्वजृम्भणशक्तिश्च सर्वतो वशकारिणी ।।८२।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सर्वरञ्जनशक्तिश्च सर्वोन्मादस्वरूपिणी ।
सर्वार्थसाधिनी शक्तिः सर्वसम्पत्तिकारिणी ॥८३॥

सर्वमन्त्रमयी शक्तिः सर्वद्वन्द्वक्षयङ्करी ।
चतुर्द्दशारचक्रस्था रक्षां कुर्वन्तु सर्वदा ॥८४॥

सर्वसिद्धिप्रदादेवी सर्वसम्पत्प्रदा तथा ।
सर्वप्रियङ्करी चैव सर्वमङ्गलकारिणी ॥८५॥

सर्वकामप्रदा देवी सर्वदुःखविमोचिनी ।
सर्वमृत्युप्रशमनी सर्वविघ्नविनाशिनी ॥८६॥

सर्वाङ्गसुन्दरी देवी सर्वसौभाग्यदायिनी ।
बहिर्दशारचक्रस्था रक्षां कुर्वन्तु सर्वदा ॥८७॥

सर्वज्ञा सर्वशक्तिश्च सर्वैश्वर्यप्रदायिनी ।
सर्वज्ञानमयी देवी सर्वव्याधिविनाशिनी ॥८८॥

सर्वाधारस्वरूपा च सर्वपापहरा परा ।
सर्वानन्दमयी देवी सर्वरक्षास्वरूपिणी ॥८९॥

तथैव हि महेशानी सर्वेप्सितफलप्रदा ।
अन्तर्द्दशारचक्रस्था रक्षां कुर्वन्तु सर्वदा ॥९०॥

वाग्देवी वशिनी पातु पातु कामेश्वरी च माम् ।
मेदिनी विमला पातु अरुणा जयिनी च माम् ॥९१॥

सर्वेश्वरी च मां रक्षेत् कौलिनी पातु मां सदा ।
अष्टकोणान्तरे देव्यो रक्षां कुर्वन्तु सर्वदा ॥९२॥

पाशाङ्कुशौ शराश्चापं नित्यमायुधदेवताः ।
षडङ्गयुवती पातु चाङ्गस्था चाङ्गरूपिणी ॥९३॥

महादेव्यश्च चक्रस्था रक्षां कुर्वन्तु सर्वदा ।
श्रीमत् त्रिकोणमध्ये तु तत्र कोणत्रयेषु च ॥९४॥

मध्ये च सर्वदा पान्तु चतस्रः पीठदेवताः ।
कामे कामेश्वरी पातु सर्वानन्दमयी च माम् ॥९५॥

जालन्धरे महापीठे पातु मां भगमालिनी ।
सूर्येन्दुवह्निपीठे तु विन्ध्ये विन्ध्यनिवासिनी ॥९६॥

ब्रह्मस्वरूपिणी पातु श्रीमत् त्रिपुरसुन्दरी ।
त्रैलोक्यमोहने चक्रे चतुरस्रे सुशोभने ॥९७॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पातु मामनिशं देवी त्रिपुरा परमेश्वरी ।
सर्वाशापूरके चक्रे षोड़शारे मनोहरे ।।९८।।

तत्र चक्रेश्वरी नित्यं पातु मां त्रिपुरेश्वरी ।
तयाष्टदलचक्रे तु सर्वसंक्षोभकारके ।।९९।।

तत्र चक्रेश्वरी नित्या पायात् त्रिपुरसुन्दरी ।
चतुर्दशारचक्रे तु सर्वसौभाग्यदायके ।।१००।।

तत्र चक्रेश्वरी नित्यं पायात् त्रिपुरवासिनी ।
बहिर्दशारचक्रे तु सर्वार्थसाधके परे ।।१०१।।

त्रिपुरा श्रीः सदा पातु मम कल्याणहेतवे ।
अन्तर्दशारचक्रे तु सर्वरक्षाकरे परे ।।१०२।।

नित्यं चक्रेश्वरी देवी पायात् त्रिपुरमालिनी ।
तथाष्टकोणचक्रे च सर्वरोगहरे परे ।।१०३।।

पातु मां त्रिपुरा सिद्धा देवी चक्रेश्वरी सदा ।
सर्वसिद्धिप्रदे चक्रे अष्टकोणान्तरे सदा ।।१०४।।

चक्रेश्वरी च मे रक्षां करोतु त्रिपुराम्बिका ।
सर्वानन्दमये चक्रे श्रीमत् त्रिकोणमध्यगे ।।१०५।।

महाचक्रेश्वरी पातु श्रीमत् त्रिपुरसुन्दरी ।
नित्या कामेश्वरी पातु पातु मां भगमालिनी ।।१०६।।

क्लिन्ना मां सर्वदा पातु भेरुण्डा पातु मां सदा ।
विन्ध्याद्रिवासिनी च मां पातु विन्ध्येश्वरी तथा ।।१०७।।

शिवदूती च मां पातु त्वरिता पातु मां सदा ।
कुलसुन्दरी मां पातु नित्यानित्या च पातु माम् ।।१०८।।

नित्या नीलपताका च विजया पातु मां सदा ।
श्रीसर्वमंगला पातु नित्यं ज्वालांशुमालिनी ।।१०९।।

विचित्रा सर्वदा पातु षोडशी पातु सुन्दरी ।
महाविद्या तुरीया या पातु मां बहुरूपिणी ।।११०।।

महासप्तशती पातु नित्यमानन्दकारिणी ।
चतुरस्रो महादेव्यो योगिन्यः पान्तु मां सदा ।।१११।।

डाकिनी राकिनी चैव लाकिनी काकिनी तथा ।
शाकिनी हाकिनी पातु चक्रस्था योगिनीगणाः ।।११२।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वर्णस्था मातृकाः सर्वा रक्षां कुर्वन्तु सर्वदा ।
चतुरस्रे महाचक्रे बुद्धो मां परिरक्षतु ।
पातु मामनिशं देवः षोडशारे प्रजापतिः ।।११३।।

तथाष्टदले चक्रे तु शिवो मां परिरक्षतु ।
चतुर्दशारचक्रे च भास्करो रक्षयेत्सदा ।।११४।।

द्विदशारे तथा पातु प्रभुर्नारायणो हरिः ।
अष्टारचक्रमध्ये तु पातु मां परमेश्वरी ।।११५।।

नवचक्रेश्वरी नित्या या नित्या परमा कला ।
पातु मामनिशं देवी श्रीमत् त्रिपुरसुन्दरी ।।११६।।

महात्रिपुरसुन्दर्याश्चिन्तनीया च या कला ।
ब्रह्मस्वरूपिणी पातु पञ्चमी परदेवता ।।११७।।

पञ्चतत्वं तथा पातु यत्किंचित् परमं परम् ।
नित्यं पञ्चगुणैः पातु पञ्चमी परदेवता ।।११८।।

श्रीविद्या च तथा लक्ष्मीर्महालक्ष्मीस्तथैव च ।
त्रिशक्तिः सर्वसाम्राज्यलक्ष्म्यः पञ्च प्रकीर्तिताः ।।११९।।

श्रीविद्या च परंज्योतिः परं निष्कलदेवताः ।
अजपा मातृकाश्चैव पञ्चकोशाः प्रकीर्तिताः ।।१२०।।

श्रीविद्या पञ्चकामेशी पारिजातेश्वरी तथा ।
त्रिकुटा पञ्चबाणेशी पञ्चकल्पलताः स्मृताः ।।१२१।।

श्रीविद्यामृतपीठेशी सुधा श्रीरमृतेश्वरी ।
अन्नपूर्णेति विख्याता पञ्चकामदुघाः स्मृताः ।।१२२।।

श्रीविद्या सिद्धलक्ष्मीश्च मातङ्गी भुवनेश्वरी ।
वाराही चेति विख्याता पञ्चरत्नाः प्रकीर्तिताः ।।१२३।।

पञ्चमी सततं पातु नित्यं रक्षतु पञ्चमी ।
शान्ति करोतु मे नित्यं पञ्चमी परदेवता ।।१२४।।

ईशान्यां सर्वदा पातु नित्यं निर्माल्यवासिनी ।
शेषिका सुन्दरी पातु बिन्दुचक्रनिवासिनी ।।१२५।।

नित्यं कामकला पातु मुद्रा मां पातु खेचरी ।
शक्तिर्मा सर्वदा पातु मूलाधारनिवासिनी ।।१२६।।

इदं त्रिपुरसुन्दर्याः स्तवराजं मनोहरम् ।
पूजाक्रमेण कथितं साधकानां सुखावहम् ।।१२७।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रमेणानेन विधिना श्रीमत् त्रिपुरसुन्दरीम् ।
सम्पूज्य साधकश्रेष्ठो रक्षामन्त्रं सदा पठेत् ।।१२८।।

प्रात:काले शुचिर्भूत्वा निशायामर्द्धरात्रके ।
अथवा सङ्कटे प्राप्ते राजस्थानेषु दुर्गमे ।।१२९।।

जले वा ज्वलने वापि श्मशाने दुर्गमे गिरौ ।
यत्र तत्र भये प्राप्ते सर्वत्रैव पठेन्नर: ।।१३०।।

सर्वावयवभावेन देवीं संचिन्त्य साधक: ।
रक्षां कुर्वीत यत्नेन सर्वोपद्रवनाशिनीम् ।।१३१।।

स्तोत्रं चाद्भुतमेवेदं त्रैलोक्ये चापि दुर्लभम् ।
गोपनीयं प्रयत्नेन यदीच्छेदात्मनो हितम् ।।१३२।।

यस्मै कस्मै न दातव्यं न प्रकाश्यं कदाचन ।
शिष्याय भक्तियुक्ताय साधकाय प्रकाशयेत् ।।१३३।।

भ्रष्टेभ्य साधकेभ्योऽपि बान्धवेभ्यो न दर्शयेत् ।
दत्ते च सिद्धिहानि: स्यादित्याज्ञा शाङ्करैः मता ।।१३४।।

मन्त्रा: पराङ्मुखा यान्ति क्रुद्धा भवति सुन्दरी ।
अशुभं च भवेत्तस्य तस्माद्यत्नेन गोपयेत् ।।१३५।।

यद्गृहे विद्यते ग्रन्थं लिखितं स्तोत्रमुत्तमम् ।
चञ्चलापि स्थिरी भूत्वा कमला तत्र तिष्ठति ।।१३६।।

तस्माद्यत्नादिदं ग्रन्थं पूजयेद् गन्धपुष्पकैः ।
पूजाफलं भवेन्नित्यं सान्निध्ये सुन्दरी भवेत् ।।१३७।।

स्तवराजमिदं पुन्यं य: पठेत्सुसमाहित: ।
यत्फलं लभते तस्माच्छृणुध्वं साधकास्तथा ।।१३८।।

वारमेकं तु योऽधीयात् प्राप्नोति पूजनं फलम् ।
विदितो मातृचक्रस्य साधको भुवि जायते ।।१३९।।

मासमेकं क्रमेणैव पठेद् भक्तिपरायण: ।
स्वर्गेऽपि विदितो भूत्वा देवीपुत्रस्तु भूतले ।।१४०।।

भक्त्या वै धारयेद्यस्तु लिखित्वा स्तोत्रमुत्तमम् ।
शिखायामथवा कण्ठे करे वा वामदक्षिणे ।।१४१।।

स भवेत् साधक: श्रेष्ठो मातृणां च भवेत् प्रिय: ।
लभते सर्वकामाँश्च परं स्वस्त्ययनं भवेत् ।।१४२।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तस्मादिदं प्रयत्नेन धारयेद्विधिना सदा ।
पठित्वा पूजयित्वा तु त्रैलोक्यं वशमानयेत् ।।१४३।।

भक्त्या यद् दीयते तस्मै मन्त्रो रक्षाकरः परः ।
धृत्वा सुवर्णमध्यस्थं सर्वकामाँस्ततो लभेत् ।।१४४।।

यद् यद्वाञ्छति कामांश्च भुक्तिमुक्तिकराँश्च यान् ।
लभते नात्र सन्देहो भुवि स्वर्गे रसातले ।।१४५।।

दृष्टवा तं साधकश्रेष्ठं ग्रहराक्षसहिंसकाः ।
दूरादेव पलायन्ते न समर्थाश्च हिंसितुम् ।।१४६।।

विषं निर्विषतां याति यान्ति पापानि संक्षयम् ।
देववन्मानुषो भूत्वा भुनक्ति विपुलं सुखम् ।।१४७।।

तस्मान्नित्यं पठेद्धीमान् मुक्तिकामार्थसिद्धये ।
भक्त्या तु प्रजपेद्देवीं स्वरक्षां सर्वदा पठेत् ।।१४८।।

पूर्वजातपरिज्ञानं वेत्ति जन्मसहस्रकम् ।
न पुनर्जायते योनौ मरणं नास्ति चापरम् ।।१४९।।

गन्धर्वरूपवान् भूत्वा सम्पूज्य परमेश्वरीम् ।
रक्षामन्त्रं पठित्वा तु देवत्वं लभते ध्रुवम् ।।१५०।।

अपुत्रो लभते पुत्रं दरिद्रो लभते धनम् ।
असाध्यं साधयेत्सर्वं दुर्लभं सुलभं भवेत् ।।१५१।।

अतिदुर्गेषु घोरेषु भीमे निगडबन्धने ।
यत्र यस्तु पठेद् भक्त्या ध्रुवं मुच्येत बन्धनात् ।।१५२।।

यत्र कुत्रस्थितश्चापि शुचिर्वा यदि वाऽशुचिः ।
देव्याः स्तोत्रं पठित्वा तु ध्रुवं मुच्येत संकटात् ।।१५३।।

अत्यन्तरोगयुक्तो वा यदि स्तोत्रं पठेन्नरः ।
सर्वं वा श्लोकमेकं वा सद्यो रोगात्प्रमुच्यते ।।१५४।।

मोहनस्तम्भनाकर्षमारणोच्चाटनं वशम् ।
कल्पनादेव जायन्ते सर्वसिद्धिमुपालभेत् ।।१५५।।

इति त्रिपुरसुन्दर्याः स्तवराजं मनोहरम् ।
रक्षामन्त्रं च शुभदं शिवेन परिकीर्तितम् ।।१५६।।

आकाशे सुप्रकाशे सकलगुणमयीं सुन्दरीं रक्तनेत्रां
नित्यं पद्मासनस्थां तरुणरविनिभां रक्तचन्द्रप्रभाभाम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आत्मानं सर्वभावैः सकलगुणयुतं सर्वदा यो हि पश्येत्
साक्षाद्देवः शिवो वा मदनदहनकृत् खेचरो जायते सः ।।१५७।।

।।इति श्रीरुद्रयामले बहुरूपाष्टकप्रस्तारे शिवप्रणीतपञ्चमी-स्तवराजं समाप्तम् ।। श्रीः ।।

विधेरज्ञानेन द्रविणविरहेणालसतया
विधेयाऽशक्यत्वात् तव चरणयोर्या च्युतिरभूत् ।
तदेतत् क्षन्तव्यं जननि सकलोद्धारिणि शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ।।१।।

यत्रैव यत्रैव मनो मदीयं तत्रैव तत्रैव तव स्वरूपम् ।
यत्रैव यत्रैव शिरो मदीयं तत्रैव तत्रैव पदद्वयं ते ।।२।।

इति श्री संवत् १७९३ आश्विन् वदि ८ शनौ लेखः । श्रीमत्तपननन्दिनीतीरविराजमानपारेषकाशीदासरणछोडदासस्येदं पुस्तकं ।

महान्तं विश्वासं तव चरणपङ्केरुहयुगे
विधायान्यन्नैवाश्रितमिह मया दैवतमुमे ।
तथापि त्वच्चेतो यदि मयि न जायेत सदयं
निरालम्बो लम्बोदरजननि कं यामि शरणम् ।।१।।

श्रीचण्डिकायै नमः सत्यम् ।

1095/174

ŚRUTABODHAḤ
श्रुतबोधः

Author :—Kālidāsaḥ

Foll. 8; 19.5 × 13 cms.; paper; lines per page 8; letters per line 20; Devanāgarī script; Sanskrit; 19th c.; presented by Jhūnthā Lekhaka.

It is a ms. on prosody

1198/277

ŚLOKAḤ
श्लोकः

Folio 1; 19.5 × 11.2 cms.; paper; 6 lines in all; 78 letters in all; Devanāgarī script; Sanskrit; 19th c.; damaged;

white letters on dark back-ground within a rectangular border; worth exhibiting.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

।।ॐ।। चित्रं नर्तनमंबरे शिखरिणौ शीतांशुबिंबे तमः
संचारं जलजं कपोतरणितं कामागमप्रक्रियाम् ।
मीनौ विद्युति तारकानिपतनं ज्योत्स्ना विकोशाम्बुजं
कुर्वाते कुरुते करोति कुरुतः कुर्वंत्यलं कुर्वते ।।१।।

1320/400(4) ṢAṢṬHĪDEVĪPŪJANAM

षष्ठीदेवी पूजनम्

From—Brahmavaivarttapurāṇa (Prakṛtikhaṇḍa)

Foll. 28 to 33; 15x12.3 cms.; paper; lines per page 6; letters per line 9; Devanāgarī script; Sanskrit; 19th c.; bound; old; bold letters.

956/35 SAṄKRĀNTĪPHALAM

संक्रान्तिफलम्

Foll. 4; 24.5x16.4 cms.; paper; lines per page 15; letters per line 31; Devanāgarī script; Sanskrit; 1923 V.S.

938/17 SAṄKRĀNTI VRATĀNI

संक्रान्तिव्रतानि

Foll. 5; 16.5x13 cms.; paper; lines per page 12; letters per line 20; Devanāgarī script; Sanskrit; 20th c.

931/10 SANDHYĀ PRAYOGAḤ (Yajurvedīyaḥ)

सन्ध्याप्रयोगः (यजुर्वेदीयः)

Foll. 13; 17x10.2 cms.; paper; lines per page 6; letters per line 15; Devanāgarī script; Sanskrit; 19th c.

933/12 SANDHYĀVIDHIḤ (Yajurvedīyaḥ)

सन्ध्याविधिः (यजुर्वेदीयः)

Foll. 6; 22.5x10.3 cms.; paper; lines per page 10; letters per line 40/41; Devanāgarī script; Sanskrit; 20th c.

1243/323 SANDHYĀ (according to Śākta-mata)

सन्ध्या (शाक्तमतानुगता)

Foll. 12; 18.8x9.7 cms; paper; lines per page 5; letters per line 20/21; Devanāgarī script; Sanskrit; 20th c.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1276/356 **SARASVATĪSTOTRAM**

सरस्वतीस्तोत्रम्

Form—Brahmāṇḍapurāṇa

Foll. 2; 22x10.5 cms.; paper; lines per page 6; letters per line 29; Devanāgari script; Sanskrit; 1951 V S. (1894 A.D.), Āśvina Kṛṣṇa 6.

1004/83 **SĀṄKHYA TATTVAM**

सांख्यतत्त्वम्

Foll. 11; 19x9.5 cms.; paper; lines per page 6; letters per line 28; Devanāgarī script; Sanskrit; 1919 V.S. (1857 A.D.). It is a Vedānta ms.

Begins :— ।। श्रीगणेशाय नमः ।। श्रीकपिलदेवाय नमः ।।

अजामेकां लोहितशुक्लकृष्णां
बह्वीः प्रजाः सृजमानां नमामः ।
अजां एतां जुषमाणां भजन्ते
जहत्येनां भुक्तभोगां नुमस्तान् ।।१।।

कपिलाय महामुनये मुनये शिष्याय तस्य चासुरये ।
पञ्चशिखाय तथेश्वरकृष्णायैते नमस्यामः ।।२।।

अथ ग्रन्थमूलम् —
दुःखत्रयाऽभिघाताज्जिज्ञासा तदपघातके हेतौ ।
दृष्टे सा पार्था चेन्नैकान्तात्यन्ततो भावात् ।।१।।

दृष्टवदानुश्रविकः सह्यविशुद्धिक्षयाऽतिशययुक्तः ।
तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात् ।।२।।

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ।।३।।

दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धित्वात् ।
त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ।।४।।

Closing :—प्राप्ते शरीरभेदे चरितार्थत्वात्प्रधानविनिवृत्तौ ।
ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति ।।६८।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

परमार्थसाधनमिदं गुह्यं परमर्षिणा समाख्यातम् ।
स्थित्युत्पत्तिप्रलया श्चिन्त्यंते सर्वभूतानाम् ।।६९।।

एतत्पवित्रमग्र्यं च मुनिरासुरयेऽनुकम्पया प्रददौ ।
आसुरिरपि पञ्चशिखाय तेन बहुधा कृतं तन्त्रम् ।।७०।।

शिष्यपरम्परयागतमीश्वरकृष्णेन चैतदार्याभिः ।
संक्षिप्तमार्यमतिना सम्यग्विज्ञाय सिद्धान्तम् ।।७१।।

सप्तत्यां खलु येऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य ।
आख्यायिका विहिता परवादविवर्जिताश्चापि ।।७२।।

इति सांख्यतत्वं सं. १९१९

... /483/34 MJM **SĀṄKHYAYOGAŚĀKHĀ**

सांङ्ख्ययोगशाखा (भगवगद्गीतानुवाद)

Author :—Gaṇapati Bhāratī

Foll. 109; 30.5x21.5 cms.; paper; lines per page 22; letters per line 21; Devanāgarī script; Sanskrit-Hindi; 1856 V.S. (1799 A.D.); bound.

A Hindi translation of Bhagavadgītā under orders of Savāī Pratapa Singh.

Included in the Catalogue of Mss. in M.J.M. at no. 4 (Hindi) pp. 64-65.

1291/371 **SĀMBAŚIVAPŪJANAM**

साम्बशिवपूजनम्

Compiled.

Foll. 2; 16x11.3 cms.; paper; lines per page 8; letters per line 19; Devanāgarī script; Sanskrit; 20th c.
It is a ms. of Dharmaśāstra.

1227/307(3) **ŚĀRAGĪTĀ**

सारगीता

Foll. 6 to 19; 9x8.2 cms.; paper; lines per page 8; letters per line 19; Devanāgarī script; Hindi; 1935 V.S. (1878 A.D.), Bhādrapada sudi 7, Tuesday.

Translation of selected portions of Gīta in Dhuṇḍhāḍī.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1320/400(6)

SURABHĪSTOTRAM
सुरभीस्तोत्रम्

From—Braḥmavaivartta purāṇa

(Prakṛtikhaṇḍa)

Foll. 50 to 56; 15x12.3 cms.; paper; lines per page 6; letters per line 9; Devanāgarī script; Sanskrit; 19th c ; bound; old; bold letters.

1262/342

SŪRYAKAVACHAM
सूर्यकवचम्

Foll. 11; 6x5.2 cms.; paper; lines per page 4; letters per line 6; Devanāgarī script; Sanskrit; 20th c.; bound.

1357/447

SŪRYAKAVACHAM
सूर्यकवचम्

Foll. 23; 16.3×10.5 cms ; paper; lines per page 7; letters per line 19; Devanāgarī script; Sanskrit; 1931 V.S. (1874 A.D.); Āṣāḍha śukla 13; brittle. With the above title the ms. contains :—

(1) महालक्ष्मीकवचम् ff. 1 to 5(a)

(2) रक्षामंत्र (in Hindi) ff. 5(a) to 7(a)

(3) महालक्ष्मीहृदयस्तोत्रम् ff. 7(a) to 11(b)

(4) महालक्ष्मीपूजनविधि (in Hindi Rajasthani) ff. 11(b) to 15(b)

(5) सूर्याष्टकस्तोत्र का अर्थ (in Hindi) ff. 15(b) to 18(a)

(6) सूर्यकवच का अर्थ (in Hindi-Rajasthani) ff. 18(b) to 23(b)

इति श्री ब्रह्मयामले सूर्यकवचस्य अर्थ भाषा सम्पूर्णम् ।।
असाढ शुक्ला १३ सं० १९३१

।। अथ विधि (महालक्ष्मी पूजा) लिख्यते ।।

जे महालक्ष्मी निजमंत्र छै, सो जपिजे । प्रथम तो स्नान कीजे पाछै लाल धोती पहिरिजे । लाल आसन राखिजे । गूगल, धूप, अगर, चन्दन, कस्तूरी, गोरोचन, (तगर और नागरमोथ्यो) रा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

परमार्थसाधनमिदं गुह्यं परमर्षिणा समाख्यातम् ।
स्थित्युत्पत्तिप्रलया श्चिन्त्यंते सर्वभूतानाम् ।।६९।।

एतत्पवित्रमग्रयं च मुनिरासुरयेऽनुकम्पया प्रददौ ।
आसुरिरपि पञ्चशिखाय तेन बहुधा कृतं तन्त्रम् ।।७०।।

शिष्यपरम्परयागतमीश्वरकृष्णेन चैतदार्याभिः ।
संक्षिप्तमार्यमतिना सम्यग्विज्ञाय सिद्धान्तम् ।।७१।।

सप्तत्यां खलु येऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य ।
आख्यायिका विहिता परवादविवर्जिताश्चापि ।।७२।।

इति सांख्यतत्वं सं. १९१९

... /483/34 MJM **SĀṄKHYAYOGAŚĀKHĀ**

सांङ्ख्ययोगशाखा (भगवगद्गीतानुवाद)

Author :—Gaṇapati Bhāratī

Foll. 109; 30.5x21.5 cms.; paper; lines per page 22; letters per line 21; Devanāgarī script; Sanskrit-Hindi; 1856 V.S. (1799 A.D.); bound.

A Hindi translation of Bhagavadgītā under orders of Savāī Pratapa Singh.

Included in the Catalogue of Mss. in M.J.M. at no. 4 (Hindi) pp. 64-65.

1291/371 **SĀMBAŚIVAPŪJANAM**

साम्बशिवपूजनम्

Compiled.

Foll. 2; 16x11.3 cms.; paper; lines per page 8; letters per line 19; Devanāgarī script; Sanskrit; 20th c.
It is a ms. of Dharmaśāstra.

1227/307(3) **ŚĀRAGĪTĀ**

सारगीता

Foll. 6 to 19; 9x8.2 cms.; paper; lines per page 8; letters per line 19; Devanāgarī script; Hindi; 1935 V.S. (1878 A.D.), Bhādrapada sudi 7, Tuesday.

Translation of selected portions of Gītā in Dhuṇḍhāḍī.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1320/400(6)

SURABHĪSTOTRAM
सुरभीस्तोत्रम्

From—Braḥmavaivartta purāṇa

(Prakṛtikhaṇḍa)

Foll. 50 to 56; 15x12.3 cms.; paper; lines per page 6; letters per line 9; Devanāgarī script; Sanskrit; 19th c; bound; old; bold letters.

1262/342

SŪRYAKAVACHAM
सूर्यकवचम्

Foll. 11; 6x5.2 cms.; paper; lines per page 4; letters per line 6; Devanāgarī script; Sanskrit; 20th c.; bound.

1357/447

SŪRYAKAVACHAM
सूर्यकवचम्

Foll. 23; 16.3×10.5 cms; paper; lines per page 7; letters per line 19; Devanāgarī script; Sanskrit; 1931 V.S. (1874 A.D.); Āṣāḍha śukla 13; brittle. With the above title the ms. contains :—

(1) महालक्ष्मीकवचम् ff. 1 to 5(a)
(2) रक्षामंत्र (in Hindi) ff. 5(a) to 7(a)
(3) महालक्ष्मीहृदयस्तोत्रम् ff. 7(a) to 11(b)
(4) महालक्ष्मीपूजनविधि (in Hindi Rajasthani) ff. 11(b) to 15(b)
(5) सूर्याष्टकस्तोत्र का अर्थ (in Hindi) ff. 15(b) to 18(a)
(6) सूर्यकवच का अर्थ (in Hindi-Rajasthani) ff. 18(b) to 23(b)

इति श्री ब्रह्मयामले सूर्यकवचस्य अर्थ भाषा सम्पूर्णम् ।।
असाढ शुक्ला १३ सं० १९६१

।। अथ विधि (महालक्ष्मी पूजा) लिख्यते ।।

जे महालक्ष्मी निजमंत्र छै, सो जपिजे । प्रथम तो स्नान कीजे पाछै लाल धोती पहिरिजे । लाल आसन राखिजे । गूगल, धूप, अगर, चन्दन, कस्तूरी, गोरोचन, (तगर और नागरमोथ्यो) रा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अष्टगन्ध धूप कीजे, कोयला डालि करि खेवजे । मिश्री, लवंग, इलायची तांबूल ऊपर मेलिजे । चौको दीजे, आसण बिछाजे, बैठि एकान्त जाइ लाल गौमुखी माला १०८ फेरिजे, महालक्ष्मी आवै, धन पावै । अटूट धन होय । रोग जाता रहै, पुत्र की प्राप्ति हो, राज को बन्धन-बेडी टूटै, सर्वजनवश्य होय, राज पावै ।

दीपमालिका नै मेरुशिखा लीजे, मोरचन्दवो जो पर्वत में होइ छै सो पहचानिजे महालक्ष्मी मस्तक को छत्र छै, जगां देखि लीजै । दिवाली कै पूर्व प्रथम दिन सुपारी चावल से न्योति आवै, दीपमालिका दीपक की ज्योति हो जाबा पर स्नान करि दिगम्बर होय ढोक दीजे, पवित्र जगह करि धूप–दीप नैवेद्य-ताम्बूल पुष्प सुपारी पूजन करि पाछै जड समेत ले लीजे, घर आय पधराजे दीप अखण्ड राखिजे । मोरशिखा के बीज स्वर्ण तथा रूपा माँहि मँढाय पास राखै तो धन मिलै, लाभ होय । अनाज माँही राखे तो अटूट होय । गाय का घी कै साथ खाय तो बुद्धि बढ़ै, ज्ञान उपजै, राजद्वार में जाय तो उसैं मस्तक पर धारण करै तो वाद विवाद जीतै । रविवार के दिन मोरशिखा गउदुग्ध में स्त्री को तीन दिन दे देवे तो गर्भं बाधा न हो । ऋतु समय पर हो । बड़जटा मोरशिखा तीन दिन देवे तो पुत्र होय । मृतवत्सा के बालक न जीते हों तो मोरशिखा दूध के साथ बालक को प्रथम घूँटी देवे । माता भी लेवे तो बालक जीवे । शीतला में घूँटी देवे तो शीतला सहाय करै । रक्त कोढ़ होय तो शहद में ६४ दिन चाटै तो रक्त कोढ़ जाय । नींद न आती हो तो रसोत मिला लेप करै तीन दिन तक, तो नींद आवै । चीनी खांड कस्तूरी अंजन करै तो फूला दूर हो । मोरशिखा बासी पानी से अंजन करै तो धुंध जाय । मोरशिखा हथेली में ले अंजन करै तो रतौंधी जाय । सिरस बीज मोरशिखा अंजन करै तो भूत बकरै, मोरशिखा गंधक भोगली से घालि बालक के गले बाँधे तो नजर न लगे । यदि सर्प काटे तो मोरशिखा पानी में घोलकर पीवै तो सर्प विष ऊपर चढ़ै नहीं । मोरशिखा पानी में घोलकर पिलावै तो स्त्री का कष्ट छूटै । मोरशिखा गाय का दूध में घोलकर पिलावै जे इस्त्री आवै कपड़ा होय । मोरशिखा का छिलका दूध में स्त्री को पिलावै तो खूब दूध होय । मोरशिखा दांत में दबाकर बोले तो वाद में विजयी होय । मोरशिखा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ताबीज में मँढाय कमर में बाँधै तो धरणि ठिकाणै आ जाय। मोरशिखा पोपल के साथ खाय तो ज्वर जाय। मोरशिखा घोलकर पिलावै तो दृष्टि बढ़ै। मोरशिखा पहनै तो दृष्टि-दोष नहीं लागै। मोरशिखा बाँटि ऊपरि लाजे, बालो जाय। मोरशिखा २ रती पाने से पीलिया जावै। मोरशिखा के उपर्युक्त गुण कहे हैं। नीचो होय तो संजीवनी जड़ी लै। घणां देवतां समानि छै। महालक्ष्मीजी के मस्तक पर विराजै छै सो सर्व ही सिद्धि करै। महादेवजी कह्यो पारबतीजी सुणि इहि काल माँहि परबताँ मैं करी सो सर्व ही सुख करता होय। राजा-प्रजा वश्य भवती। गुप्त करणी। गुप्त राखणी। इति मोरपंख का गुण सम्पूर्णम्॥

1238/318(8)

SŪRYAGĀYATRĪ

सूर्यगायत्री

Foll. 1 to 10: 13 × 7.5 cms ; paper; lines per page 7; letters per line 19; Devanāgarī script; Sanskrit; 19th c.; bound.

927/6

SŪRYASAHASRANĀMA

सूर्यसहस्रनाम

Compliled alphabetically.

Foll. 23; 11 × 8.5 cms.; paper; lines per page 7; letters per line 12; Devanāgarī script; Sanskrit; 19th c.; scribe —Gopī; bound; written with black and red ink.

1127/206

SŪRYA STAVAḤ

सूर्यस्तवः

From—Mahābhārata

Foll. 3; 11 × 8.7 cms.; paper; lines per page 8; letters per line 15; Devanāgarī script; Sanskrit; 19thc.; presented by Gaṇeśa, son of Chūniyā.

1168/247(2)

SŪRYASTOTRAM

सूर्यस्तोत्रम्

Foll. 4(a) to 6; 11 × 8 cms.; paper; lines per page 5; letters per line 11; Devanāgarī script; Sanskrit; 19th c ; presented by Ghanaśyāma Brāhmaṇa Pārāśara. It is preceded by इन्द्राक्षी स्तोत्र on ff. 1 to 4(a). Other particulars are as above.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1102/181 **SŪRYĀRYĀSTOTRAM**

सूर्यार्यास्तोत्रम्

Foll. 5; 10×7 cms.; paper; lines per page 5; letters per line 12; Devanāgarī script; Sanskrit; 19th c.; presented by Gaṇeśa Lekhaka.

Begins : —।।श्रीगणेशाय नमः ।।

उद्यन्नद्य विवस्वानारोहन्नुत्तरां दिशं देवः
हृद्रोगं मम सूर्यो हरिमाणं चाशु नाशयतु ।।१।।

निमिषार्द्धेनैकेन द्वे शते द्वे सहस्रे च ।
क्रममाणो योजनानां नमोऽस्तु ते नलिननाथाय ।।२।।

शिवरूपाज्ज्ञानमहं त्वत्तो मुक्तिं जनार्दनाकारात् ।
शिखिरूपाच्चैश्वर्यं भवतश्चारोग्यमिच्छामि ।।३।।

कर्म्मज्ञानखदशकं मनश्च जीव इति विश्वसर्गाय ।
द्वादशधा यो विभजति स द्वादशमूर्तिरस्तु मुदे ।।४।।

त्वं यजुर्ऋक्साम त्वं त्वमातमा त्वं वषट्कारः ।
त्वं विश्वं त्वं हंसस्त्वं भानो परमहंसश्च ।।५।।

त्वचि दोषा हृदि दोषा दृशि दोषा येऽखिलेन्द्रियजदोषाः ।
तान् पूषा हतदोषानीषद्रोषाग्निना दहतु ।।६।।

तिमिरमिव नेत्रतिमिरं पटलमिवाशेषरोगपटलं च ।
काचमिव धीनिकोचं कालपितः मे निराकुरु तान् ।।७।।

धर्मार्थकाममोक्षप्रतिरोधिन उग्रतापवेदकरान् ।
लुप्तीकृतेन्द्रियगणान् गदान् विखण्डयतु चण्डांशुः ।।८।।

यस्य सहस्रांशोरभीषुलेशो हिमांशुबिम्बगतः ।
भासयति नक्तमखिलं खिलयात् स विपद्गणानरुणः ।।९।।

येन धिनांधं तिमिरं जगदेतद्यत्र भवति धृतबोधम ।
तं नलिनीभर्तारं हर्तारं चापदामीडे ।।१०।।

वाताश्मरिदुर्न्नामत्वग्दोषमहोदरप्रमेहांश्च ।
ग्रहणिभगंदरमुख्यान् मम महारुजःस्वामिन् संहरसि ।।११।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2.

त्वं माता त्वं भ्राता त्वं पिता त्वं धनं त्वमाचार्य्यः ।
त्वं भर्ता त्वं हर्ता विपदामर्क ! प्रसीद मम ।।१२।।

इत्यार्याद्वादशकं साम्बस्य पुरतो नभस्तलात्पतितम् ।
पठतां भाग्यसमृद्धिः समस्तरोगोपशान्तिः स्यात् ।।१३।।

इति सूर्यार्या समाप्ता ।।

1028/107 SŪRYĀRYĀSTOTRAM

सूर्यार्यास्तोत्रम्

Foll. 3; 15.5×9.5 cms.; paper; lines per page 6; letters per line 18; Devanāgarī script; Sanskrit; 20th c.; scribe–Gopāla Brāḥmaṇa Lekhaka.

Begins : – ॐ उदयाचलतिलकाय ·······

1278/358 SŪRYĀRYĀ(dvādaśaka) STOTRAM
(also known as Sāmba Dvādaśakam)

सूर्यार्या (द्वादशक) स्तोत्रम् साम्बद्वादशकं वा

Foll. 1 page; 42×15.3 cms.; lines 26 in all; letters per line 20; Devanāgarī script; Sanskrit; 20th c.; same text as in no. 1102/181 p. 250–51.

1316/396(2) SŪRYĀṢṬAKAM

सूर्याष्टकम्

Foll.18 to 21; 16.3×11.5 cms ; paper; lines per page 7; letters per line 16; Devanāgarī script; Sanskrit; 20th c.

1099/178 SŪRYĀṢṬAKAM

सूर्याष्टकम्

Foll. 6; 10×7 cms.; paper; lines per page 4; letters per line 9; Devanāgarī script; Sanskrit; 19th c.

1323/403 SAUNDARYALAHARĪ STOTRAM

सौन्दर्यलहरीस्तोत्रम्

Author—Śaṅkarāchāryaḥ

Foll. 26; 21×10.5 cms.; paper; lines per page 6; letters per line 24; Devanāgarī script; Sanskrit; 20th; very well written within red, black and golden border lines. A beautiful painting of Devi on the first cover page.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

1335/415 SAUNDARYALAHARĪ STOTRAM with ct.

सौन्दर्यलहरी स्तोत्रम् (सव्याख्यम्)

Author—Text–Śaṅkarāchāryaḥ

ct. by Raṅgadāsa p/o Kavirāja

Foll. 71; 31×14 cms ; paper; lines per page 11; letters per line 34/44; Devanāgarī script; Sanskrit; 19th c.

Begins text :--शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चेदेवं देवो न खलु कुशलः स्पंदितुमपि ।
अतस्त्वामाराध्यां हरिहरविरंच्यादिभिरपि
प्रणंतुं स्तोतुं वा कथमकृतपुण्यः प्रभवति ।।१।।

Begins ct. ।। श्रीगणेशाय नमः ।।
सकलसुरासुरमनुजनालिनीचरणकमलोऽणिमादिप्रवरसिद्धि–
संसेवितपदप्रदानपरिच्युतदुर्लभरजोनिकरः कपिलपुरःसर–
सिद्धाकांक्षितदर्शनो भगवान् श्रीशङ्करः परमापद्गतजनतोद्धा-
रार्थविरचितकारुण्यशेवधिर्महाविद्यांस्तामेव स्तौति–
शिवः शक्त्या युक्त इति ।।

अत्र स्तोत्रे प्रतिपाद्यप्रतिपादकभावसम्बन्धः संसारदुःखतरण–
कामोऽधिकारी मोक्षप्राप्तिः परमं प्रयोजनं लक्ष्मीप्राप्ति-
रौत्कृष्ट्यादिप्राप्तिरवान्तरप्रयोजनमिति । एतत्स्तोत्रं यथामति
व्याख्यायते । न हि शंकराचार्यवदनप्रसूतमहाविद्यारहस्यं
सकलमिदमित्थमिति व्याख्यातुं विरञ्चिरपि पर्याप्तो भवति
तस्मात्तेषां चरणरजोविलिप्तभालोऽहं यथाशक्ति व्याख्यास्य
इति ।। अत्रैकाक्षरयोजना । शिव इति । शिवः परमात्मा यदि
शक्त्या युक्तो भवति तर्हि प्रभवितुं शक्तो भवति जगज्जननादौ
ईष्टे इति ध्वनिः । एवं हि शिवस्य शक्त्या शबलितस्यैव जगदुपा-
दानकारणतेति श्रुतिशेखरार्थः । विपक्षे बाधकमाह । देवः
स्वप्रकाशोऽपि शिव एवं शक्त्या युक्तो न चेत्तर्हि स्पन्दितुमपि
चलितुमपि खल्विति वाक्यालंकारे निश्चयार्थे वा कुशलो न
भवेत् । लोकेऽप्यशक्तः शिवोऽपि शव एव भण्यते । तस्मादत्र
जगज्जननादौ प्राधान्यं शवेत्यभिगतमेवेत्यर्थः । तस्मान्न केवलः
शिवः प्रभवति शक्तिविरहित किंतु शक्त्या शबलित एवेत्यर्थः ।
तदुक्तं 'प्रतिर्वाच्या विद्याद्वितयसचिवस्येति' अत्र निगममाह ।
अत इति । अकृतपुण्यः पुमांस्त्वां प्रणंतुं स्तोतुं वा कथं प्रभवति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नंतु वा न समर्थो भवति । कथमिति थन् प्रत्ययान्तमव्ययं । तत्कथमपीत्याह । अत एतस्याशयं गूढमपि स्फोटयति । हरिहर-विरिंच्यादिभिरिति । एभिराराद्धं योग्यामिति । अत्रेदं रहस्यं । हरिर्जगत्पालनसामर्थ्यं त्वदाराधनसंपादितमेवाभिवहति । हरो जगत्संहरणसामर्थ्यं त्वदाराधनसम्पादितमेव धत्ते । विरि-ञ्चिरपि जगत्सर्जनसामर्थ्यं त्वदाराधनसंपादितमेवाभिवहति । यत एषामेतत्सामर्थ्यं त्वदनुग्रहाधीनं अतः पूर्वोदाहृतोऽर्थ युज्यते । एतेषां कृतीनां त्वदग्रनुहापेक्षा तर्हि कुतस्तरामितरेषामकृतीनां व्यापारसामर्थ्यमित्यर्थः । शिवः शक्त्या युक्त इत्यत्रेदं रहस्यं । शिवः अकारः सः शक्त्या युक्तः सम्पुटितः । अत्र शक्तिः सानुस्वार एकार एवं वाग्भवं बीजं भवति ऐं सः प्रभवितुं शक्तः स्वभावं प्राप्तुं शक्तः प्र· सर्वोत्तमो जलदबीजमयो हकारः, भः सानुस्वार ईकारः सरेफः बं कामराजबीजं । एवं हि ह्रीं क्लीं इति संभवति । अत्र जगत्सर्जनाय कामराजेन विरंचिराराधया-मास । पालनशक्तये वाग्भवेन हरिः । संहरणाय मारणरुद्र-स्तदुक्तं च

"स्वसामर्थ्यप्राप्त्यै हरिविधिशिवैः सेव्यचरणे ।
चिरं खिन्नं पाहि प्रणतममले दीनमनिशम् ।।१।।"

Ends :– प्रदीपज्वालाभिर्दिवसकरनीराजनविधिः
सुधासूतेश्चन्द्रोपलजललवैरर्घघटना ।
स्वकीयैरम्भोभिः सलिलनिधिसौहित्यकरणं
त्वदीयाभिर्वाग्भिस्तव जननि वाचां स्तुतिरियम् ।।१०३।।

हे वाचां जननि वाचां मातर्मदीयाभिर्वाग्भिर्मम वाणीभिः तवेयं स्तुतिः, यतस्त्वं वाचां जननी मम रूढ स्यायं अभिमानः । इयं मम वाणीति अत्रानुरूपं दृष्टान्तमाह । प्रदीपज्वालाभिः । प्रदीपार्चिभिर्दिवसकरनीराजनविधिः । दिवसकरः श्रीभानुस्-तस्य यथा नीराजनाचरणं अहोऽयं मम प्रदीपावलीभिर्भासां निधिर्नीराजते यथा नीराजनकर्तुरभिमानस्तथा ममापीत्यर्थः ।। पुनरपि सुधासूतेश्चन्द्रमसः, सुधां सूतीति सुधासूतिस्तस्य तथा चन्द्रोपलजललवैरर्घघटनां चन्द्रोपलश्चन्द्रकान्तमणिस्तस्य ये जललवास्तैः । ते तु चन्द्रमरीचिसम्पर्कादेवोद्गच्छन्ति । तत्र स्वीयाभिनिवेशवान् यथा चन्द्रास्यार्घं प्रयच्छति तस्याप्युपहासो यथा पुनरपि स्वकीयैः समुद्रोच्छैरम्भोभिः सलिलनिधि-सौहित्यकरणं सलिलनिधेः समुद्रस्य सुहितभावः सौहित्यं तस्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

